गुह्याद् गुह्यतरो मंत्रो वाञ्छाचिंतामणिः स्मृतः ।
शीर्षादि पादपर्यन्तं सदापातु मनूत्तमम् ॥५॥
इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् ।
श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम् ॥६॥
कुष्ठादिरोगशमनं महाव्याधि विनाशनम् ।
त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत् ॥७॥
बहुना किमिहोक्तेन यद्यन्मनसि वर्तते ।
तत्तत्सर्व भवत्येव कवचस्य च धारणात् ॥८॥
भूतप्रेत पिशाचाश्च यक्ष गंधर्व राक्षसाः ।
ब्रह्म राक्षस वेताला नैव द्रष्टुमपि क्षमाः ॥९॥
दूरादेव पलायंते तस्य संकीर्तनादपि ।
भूर्जपत्रे समालिख्य रोचनागुरु कुंकुमैः ॥१०॥
रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः ।
धारयेत् साधक श्रेष्ठस्त्रैलोक्यविजयी भवेत् ॥११॥
त्रिलोहमध्यगं कृत्वा धारयेद् दक्षिणेभुजे ।
शिखायामथवा कंठे सोऽपि सूर्य्यो न संशयः ॥१२॥
इति ते कथितं साम्ब त्रैलोक्ये मंगलाधिपम् ।
कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ॥१३॥
अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम् ।
सिद्धिर्न जायते तस्य कल्पकोशितैरपि ॥१४॥

॥ इति ब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्य कवचं समाप्तम् ॥

॥ श्रीसूर्य वज्रपञ्जर कवचम् ॥

॥ श्री भैरव उवाच ॥

यो देव देवो भगवान् भास्करो महसां निधिः ।
गायत्रीनायको भास्वान् सवितेति प्रगीयते ॥१॥
तस्याहं कवचं दिव्यं वज्रपंजरकाभिधम् ।
सर्वमंत्रमयं गुह्यं मूलविद्यारहस्यकम् ॥२॥
सर्वपापापहं देवि! दुःख-दारिद्र्य नाशनम् ।
महाकुष्ठहरं पुण्यं सर्वरोगनिवर्हणम् ॥३॥
सर्वशत्रुसमूहघ्नं संग्रामे विजयप्रदम् ।
सर्वतेजोमयं सर्वदेवदानव पूजितम् ॥४॥
रणे राजभये घोरे सर्वोपद्रवनाशनम् ।
मातृका वेष्टितं वर्म भैरवानन निर्गतम् ॥५॥
ग्रहपीडाहरं देवि! सर्व संकट नाशनम् ।
धारणादस्य देवेशि! ब्रह्मा लोक पितामह ॥६॥
विष्णुर्नारायणो देवि! रणे दैत्याञ्जयिष्यति ।
शङ्करः सर्वलोकेशो वासवोऽपि दिवस्पतिः ॥७॥
औषधीशः शशि देवी! शिवोऽहं भैरवेश्वरः ।
मन्त्रान्तकं परं वर्म सवितुः सारमुत्तमम् ॥८॥
यो धारयेद् भुजे मूर्ध्नि रविवारे महेश्वरि! ।
स राजवल्लभो लोके तेजस्वी वैरिमर्दनः ॥९॥
बहुनोक्तेन किं देवि! कवचस्यास्य धारणात् ।
इह लक्ष्मीधनारोग्यवृद्धिर्भवति नान्यथा ॥१०॥
परत्र परमा मुक्तिः देवानामपि दुर्लभा ।
कवचस्यास्य देवेशि! मूलविद्यामयस्य च ॥११॥
वज्रपंजरकाख्यस्य मुनिर्ब्रह्मा समीरितः ।
गायत्र्यं छन्द इत्युक्तं देवता सविता स्मृतः ॥१२॥

माया बीजं शरत् शक्तिः नमः कीलकमीश्वरि! ।
सर्वार्थ साधने देवि! विनियोगः प्रकीर्तितः ॥१३॥

विनियोगः - ॐ अस्य श्रीवज्रपञ्जर कवचस्य ब्रह्मा ऋषिः, गायत्र्यं छन्दः, श्रीसविता देवता, ह्रीं बीजं, सः शक्तिः, नमः कीलकं, सर्वार्थ साधने वज्रपंजरकवच पाठे विनियोगः।

ऋष्यादि न्यासः - ब्रह्मा ऋषये नमः शिरसि, गायत्र्यं छन्दसे नमः मुखे, श्रीसविता देवतायै नमः हृदि, ह्रीं बीजाय नमः गुह्ये, सः शक्तये नमः नाभौ, नमः कीलकाय नमः पादयोः, सर्वार्थ साधने वज्रपंजर कवच पाठे विनियोगाय नमः अञ्जलौ।

ध्यानम्–

रक्ताम्बुजासनमशेष - गुणैकसिन्धुम्,
भानुं समस्त जनतामधिपं भजामि ।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्य मौलिमरुणाङ्गरुचिं त्रिनेत्रम् ॥

मानस पूजन कर कवच पाठ करें यथा-

॥ कवच पाठ ॥

ॐ अं आं इं ईं शिरः पातु ओं सूर्यो मंत्रविग्रहः ।
उं ऊं ऋं ॠं ललाटं मे ह्रां रविः पातु चिन्मयः ॥१॥
लृं लॄं एं ऐं पातु नेत्रे, ह्रीं ममारुण - सारथिः ।
ओं औं अं अः श्रुती पातु, सः सर्वजगदीश्वरः ॥२॥
कं खं गं घं पातु गण्डौ, सूं सूरः सुरपूजितः ।
चं छं जं झं च नासां मे, पातु र्यां अर्यमा प्रभुः ॥३॥
टं ठं डं ढं मुखं पायाद् यं योगीश्वर पूजितः ।
तं थं दं धं गलं पातु, नं नारायणवल्लभः ॥४॥
पं फं बं भं मम स्कंधौ, पातु मां महसां निधिः ।
यं रं लं वं भुजौ पातु, मूलं सकलनायकः ॥५॥
शं षं सं हं पातु वक्षो, मूलमंत्रमयो ध्रुवः ।
ळं क्षः कुक्षिं सदा पातु, ग्रहनाथो दिनेश्वरः ॥६॥

ङं ञं णं नं मं मे पातु, पृष्ठं दिवस नायकः ।
अं आं इं ईं उं ऊं ऋं ॠं, नाभिं पातु तमोपहः ॥७॥
ऌं ॡं एं ऐं ओं औं अं अः लिङ्गं मेऽव्याद् ग्रहेश्वरः ।
कं खं गं घं चं छं जं झं, कटिं भानुर्ममाऽवतु ॥८॥
टं ठं डं ढं तं थं दं धं जानू भास्वान् ममाऽवतु ।
पं फं बं भं यं रं लं वं, जङ्घे मेऽव्याद् विभाकरः ॥९॥
शं षं सं हं ळं क्षः पातु, मूलं पादौ त्रयीतनुः ।
ङं ञं णं नं मं मे पातु सविता, सकलं वपुः ॥१०॥
सोमः पूर्वे च मां पातु, भौमोऽग्नौ मां सदाऽवतु ।
बुधो मां दक्षिणे पातु, नैऋत्यां गुरुरेव माम् ॥११॥
पश्चिमे मां सितः पातु, वायव्यां मां शनैश्चरः ।
उत्तरे मां तमः पायादैशान्यां मां शिखी तथा ॥१२॥
ऊर्ध्वं मां पातु मिहिरो, मामधस्ताज्जगत्पतिः ।
प्रभाते भास्करः पातु, मध्याह्ने मां दिनेश्वरः ॥१३॥
सायं वेदप्रियः पातु निशीथे विस्फुरापतिः ।
सर्वत्र सर्वदा सूर्यः पातु मां चक्रनायकः ॥१४॥
रणे राजकुले द्यूते विवादे शत्रु - सङ्कटे ।
संग्रामे च ज्वरे रोगे, पातु मां सविता प्रभुः ॥१५॥
ॐ ॐ ॐ उत ॐ उ ऊ हसमयः सूर्योऽवतान्मां भयाद्
ह्रां ह्रीं ह्रुं ह ह हा हसौः हसहसौः हंसोऽवतात् सर्वतः ।
सः सः सः सससा नृपाद्वनचराच्चौराद्रणात् संकटात्,
पायान्मां कुलनायकोऽपि सविता ॐ ह्रीं हसौः सर्वदा ॥१६॥
द्रां द्रीं द्रूं दधनं तथा च तरणिर्भांभैर्भयाद् भास्करो,
रां रीं रूं रु रु रूं रविर्ज्वरभयात् कुष्ठाच्च शूलामयात् ।
अं अं आं विविवीं महामयभयं मां पातु मार्तण्डको,
मूलव्याप्ततनुः सदाऽवतु परं हंसः सहस्त्रांशुमान् ॥१७॥

॥ फलश्रुति ॥

इति श्रीकवचं दिव्यं, वज्रपञ्जरकाभिधम् ।
सर्वदेव रहस्यं च मातृका मंत्र वेष्टितम् ॥१॥
महारोगभयघ्नं च पापघ्नं मन्मुखोदितम् ।
गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं शिवे! ॥२॥
लिखित्वा रविवारे तु तिष्ये वा जन्मभे प्रिये! ।
अष्टगंधेन दिव्येन सुधाक्षीरेण पार्वति! ॥३॥
अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि! ।
कनकीकाष्ठ - लेखन्या कवचं भास्करोदये ॥४॥
श्वेतसूत्रेण रक्तेन श्यामेनावेष्टयेद् गुटीम् ।
सौवर्णेनाथ संवेष्ट्य धारयेत् मूर्ध्नि वा भुजे ॥५॥
रणे रिपूञ्जयेद् देवि! वादे सदसि जेष्यति ।
राजमान्यो भवेन्नित्यं सर्वतेजोमयो भवेत् ॥६॥
कण्ठस्था पुत्रदा देवि! कुक्षिस्था रोगनाशिनी ।
शिरस्थाः गुटिका दिव्या राजलोकवशङ्करी ॥७॥
भुजस्था धनदा नित्यं तेजोबुद्धि विवर्धिनी ।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ॥८॥
कण्ठे सा धारयेन्नित्यं बहुपुत्रा प्रजायते ।
यस्य देहे भवेन्नित्यं गुटिकैषा महेश्वरि! ॥९॥
महास्त्राणीन्द्र मुक्तानि ब्रह्मास्त्रादीनि पार्वति! ।
तद् देहं प्राप्य व्यर्थानि भविष्यन्ति न संशयः ॥१०॥
त्रिकालं यः पठेन्नित्यं कवचं वज्रपञ्जरम् ।
तस्य सद्यो महादेवि! सविता वरदो भवेत् ॥११॥
अज्ञात्वा कवचं देवि! पूजयेद् यस्त्रयीतनुम् ।
तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फलम् ॥१२॥
शतावर्तं पठेद् वर्म सप्तम्यां रविवासरे ।
महाकुष्ठार्दितो देवि! मुच्यते नात्र संशयः ॥१३॥

नीरोगो यः पठेद् वर्म दरिद्रो वज्रपञ्जरम् ।
लक्ष्मीवाञ्जायते देवि! सद्यः सूर्यप्रसादतः ॥१४॥
भक्त्या यः प्रपठेद् देवि! कवचं प्रत्यहं प्रिये! ।
इह लोके श्रियं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥१५॥

॥ इति श्रीरुद्रयामले श्री सूर्य वज्रपञ्जर कवचम् ॥

॥ अथ सूर्य स्तवराज स्तोत्रम् ॥

॥ वसिष्ठ उवाच ॥

स्तुवंस्तत्र ततः साम्बः कृशो धमनिसंततः ।
राजन्नाम सहस्रेण सहस्रांशु दिवाकरम् ॥१॥
खिद्यमानं तु तं दृष्ट्वा सूर्यः कृष्णात्मजं तदा ।
स्वप्ने तु दर्शनं दत्त्वा पुनर्वचनमब्रवीत् ॥२॥

॥ श्रीसूर्य उवाच ॥

साम्ब साम्ब महाबाहो शृणु जाम्बवतीसुत ।
अलं नामसहस्रेण पठ स्तवमिमं शुभम् ॥३॥
यानि नामानि गुह्यानि पवित्राणि शुभानि च ।
तानि ते कीर्तयिष्यामि श्रुत्वा वत्सावधारय ॥४॥
विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ।
लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ॥५॥
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ।
तपनतापनश्चैव शुचिः सप्ताश्ववाहनः ॥६॥
गभस्तिहस्तो ब्रध्नश्च सर्वदेवनमस्कृतः ।
एकविंशतिरित्येष स्तव इष्टः सदा मम ॥७॥
देहारोग्यकरश्चैव धनवृद्धियशस्करः ।
स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥८॥
य एतेन महाबाहो द्वे संध्ये स्तवनोदये ।
स्तौति मां प्रणतो भूत्वा सर्वपापै प्रमुच्यते ॥९॥

कायिकं वाचिकं चैव मानसं यच्च दुष्कृतम् ।
एतज्जाप्येन तत्सर्वं प्रणश्यति न संशयः ॥१०॥
पूजितोऽयं महामंत्रः सर्वपापहरः शुभः ।
एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः ॥११॥

॥ इति साम्बपुराणे सूर्यस्तवराज स्तोत्रं समाप्तम् ॥

॥ अथ सूर्यस्याष्टोत्तर शतनाम स्तोत्रम् ॥

॥ जन्मेजय उवाच ॥

कथं कुरुणामृषभः स तु राजा युधिष्ठिरः ।
विप्रार्थमाराधितवान् सूर्यमद्भुत दर्शनम् ॥१॥

॥ वैशम्पायन उवाच ॥

शृणुष्वावहितो राजन्! शुचिर्भूत्त्वा समाहितः ।
क्षणं च कुरु राजेन्द्र! सम्प्रवक्ष्याम्यशेषतः ॥२॥
धौम्येन तु यथा पूर्वे पार्थाय सु-महात्मने ।
नामाष्टशतमाख्यातं तच्छृणुष्व महामते ॥३॥

॥ धौम्य उवाच ॥

सूर्योऽर्यमा भगस्त्वष्टा पूर्षार्कः सविता रविः ।
गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः ॥४॥
पृथिव्यापश्च तेजश्च खं वायुश्च परायणम् ।
सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ॥५॥
इन्द्रो विवस्वान् दीप्तांशुः शुचिः शौरि शनैश्चरः ।
ब्रह्मा विष्णु रुद्रश्च स्कंदो वै वरुणो यमः ॥६॥
वैद्युतो जाठरश्चाग्निरैन्धनस्तेजसां पतिः ।
धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ॥७॥
कृतं त्रेता द्वापरश्च कलि सर्वमलाश्रयः ।
कला काष्ठा मुहूर्त्ताश्च क्षपा यामस्तथा क्षणः ॥८॥

संवत्सरकरोऽश्वत्थ कालचक्रो विभावसुः ।
पुरुषः शाश्वतो योगी व्यक्ताव्यक्त सनातनः ॥९॥
कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः ।
वरुणः सागरोंऽशुश्च जीमूतो जीवनोऽरिहा ॥१०॥
भूताश्रयो भूतपतिः सर्वलोकनमस्कृतः ।
स्त्रष्टा संवर्तको वह्निः सर्वस्यादिरलोलुपः ॥११॥
अनंतः कपिलो भानुः कामदः सर्वतोमुखः ।
जयो विशालो वरदः सर्वधातु निषेचिता ॥१२॥
मनः सुपर्णो भूतादिः शीघ्रगः प्राणधारकः ।
धन्वन्तरिर्धूमकेतुरादि देवोऽदितेः सुतः ॥१३॥
द्वादशात्माऽरविंदाक्षः पिता माता पितामहः ।
प्रजाद्वारं सर्गद्वारं मोक्षद्वारं त्रिविष्टरम् ॥१४॥
दाहकर्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।
चराचरात्मा सूक्षात्मा मैत्रेयः करुणान्वितः ॥१५॥

॥ फलश्रुति ॥

एतद् वै कीर्तनीयस्य सूर्यस्यामिततेजसः ।
नामाष्टशतकं वेदं प्रोक्तमेतत् स्वयंभुवा ॥१॥
सुरगण पितृ यक्षसेवितं ह्यसुरनिशाचर सिद्धवन्दितम् ।
वरकनक हुताशनप्रभं प्रणिपतितोऽसि हिताय भास्करम् ॥२॥
सूर्योदये यः सुसमाहितः पठेत् सपुत्रदारान् धनरत्नसंचयान् ।
लभेत् जातिस्मरतां नरः सदा धृतिं च मेधां च स विन्दते पुमान् ॥३॥
इमं स्तवं देववरस्य यो नरः प्रकीर्तयेच्छुचि सुमनाः समाहितः ।
विमुच्यते शोकदावाग्नि सागराल्लभेत् कामान् मनसा यथेप्सितान् ॥४॥

॥ इति महाभारते वनपर्वणि धौम्य युधिष्ठर संवादे श्रीसूर्यस्याष्टोत्तरशतनाम स्तोत्रं समाप्तम् ॥

॥ आदित्यहृदय स्तोत्रम् ॥

॥ पूर्व पीठिका ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद राममगस्त्यो भगवांस्तदा ॥२॥
राम राम महाबाहो श्रृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसे ॥३॥
आदित्य हृदयं पुण्यं सर्वशत्रु विशानम् ।
जयावहं जपं नित्यमक्षयं परमं शिवम् ॥४॥
सर्वमङ्गल माङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोक - प्रशमनमायुर्वर्धनमुत्तमम् ॥५॥

विनियोगः –**ॐ अस्य श्रीआदित्य हृदय स्तोत्रस्यागस्त्य ऋषिः, अनुष्टुप् छन्दः, आदित्यहृदय भूतो भगवान् ब्रह्मा देवता, निरस्ताशेषविघ्नतया ब्रह्मविद्यासिद्धौ सर्वशत्रुक्षयार्थ पूर्वकं सर्वत्र जयसिद्धौ च विनियोगः।**

ऋष्यादिन्यास :– **अगस्त्य ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। आदित्य हृदयभूत ब्रह्मदेवतायै नमः हृदि। ॐ बीजाय नमः गुह्ये। रश्मिमते शक्तये नमः पादयोः। ॐ तत्सवितुरित्यादि गायत्री कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।**

करन्यासः– इस स्तोत्र के करन्यासादि तीन तरह से हो सकते है। **केवल प्रणव से, गायत्री मंत्र से अथवा रश्मिमते** इत्यादि छः नाम मंत्रों से।

ॐ रश्मिमते	अंगुष्ठाभ्यां नमः,	हृदयाय नमः।
ॐ समुद्यते	तर्जनीभ्यां नमः,	शिरसे स्वाहा।
ॐ देवासुरनमस्कृताय	मध्यमाभ्यां नमः,	शिखायै वषट्।
ॐ विवस्वते	अनामिकाभ्यां नम,	कवचाय हुम्।
ॐ भास्कराय	कनिष्ठिकाभ्यां नमः,	नेत्रत्रयाय वौषट्।
ॐ भुवनेश्वराय	करतलकरपृष्ठाभ्यां नमः,	अस्त्राय फट्।

इसके बाद गायत्री मंत्र का ध्यान कर स्तोत्र का पाठ करें।

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥१॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावन: ।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभि ॥२॥
एष ब्रह्मा च विष्णुश्च शिव: स्कंद: प्रजापति: ।
महेन्द्रो धनद: कालो यम: सोमो ह्यपांपति: ॥३॥
पितरो वसव: साध्या अश्विनौ मरुतोमनु: ।
वायुर्वह्नि: प्रजा: प्राण ऋतुकर्ता प्रभाकर: ॥४॥
आदित्य सविता सूर्य: खग: पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुहिरण्यरेता दिवाकर: ॥५॥
हरिदश्व: सहस्त्रार्चि सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथन: शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान् ॥६॥
हिरण्यगर्भ शिशिरस्तपनोऽहस्करो रवि: ।
अग्निर्भोऽदिते: पुत्र: शङ्ख: शिशिरनाशन: ॥७॥
व्योमनाथस्तमोभेदी ऋग्यजु: सामपारग: ।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगम: ॥८॥
आतपी मण्डली मृत्यु: पिङ्गल: सर्वतापन: ।
कविर्विश्वो महातेजा रक्त: सर्वभवोद्भव: ॥९॥
नक्षत्र ग्रह ताराणामधिपो विश्वभावन: ।
तेज सामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥१०॥
नम: पूर्वाय गिरये पश्चिमायाद्रये नम: ।
ज्योतिर्गणानां पतये दिनाधिपतये नम: ॥११॥
जयाय जयभद्राय हर्यश्वाय नमो नम: ।
नमो नम: सहस्त्रांशो आदित्याय नमो नम: ॥१२॥
नम: उग्राय वीराय सारङ्गाय नमो नम: ।
नम: पद्म प्रबोधाय प्रचण्डाय नमो ऽस्तुते ॥१३॥

ब्रह्मेशानाच्युतेशाय सूरायादित्य वर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१४॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥१५॥
तप्त चामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥१६॥
नाशयेत्येष वै भूतं तमेव सृजतिप्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥१७॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष चैवाग्नि होत्रं च फलं चैवाग्निहोत्रिणाम् ॥१८॥
देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥१९॥
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषः कश्चिन्नवसीदति राघव ॥२०॥
पूजयस्वै नमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यति ॥२१॥
अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि ।
एव मुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२२॥

वैसे तो मूल स्तोत्र यहीं तक है, परन्तु कुछ विद्वान आगे के चार श्लोक पढ़ते हैं।

एतच्छ्रुत्वा महातेजा नष्टश्लोकोऽभवत् तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥१॥
आदित्यं प्रेक्ष्य जप्त्वेदं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूषा धनुरादाय वीर्यवान् ॥२॥
रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत् ।
सर्वयत्नेव महता वृतस्तस्य वधेऽभवत् ॥३॥
अथ रविवरदन्निरीक्ष्यरामं मुदितमनाः परमं प्रहृज्यमाणः ।
निशिचरपतिं संक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥४॥

॥ इति वाल्मीकीय रामायणे रामरावण युद्ध परिश्रान्ते अगस्त्य ऋषि कृत आदित्य स्तोत्रं समाप्तम् ॥

॥ अथ चाक्षुषीविद्या साधना ॥ (नेत्रोपनिषद्)

प्राचीन ग्रंथों में नेत्ररोगहारी चाक्षुषी विद्या के कई पाठ मिलते है उनमें दो प्रयोग अधिक प्रचलित है। उन्हीं का वर्णन यहाँ किया जा रहा है। रविवार को पुष्य या हस्त नक्षत्र अथवा शुभ चन्द्रबल देखकर रविवार को प्रारंभ करें। प्रातः काल उदित होते सूर्य की ओर मुँह करके बैठे। सूर्य का ध्यान करके मंत्र जप व स्तुति पाठ करें। बारह रविवार अवश्य करें।

(१)

विनियोगः- **ॐ अस्य श्री चाक्षुषी विद्याया अहिबुध्न्य ऋषिः, गायत्री छन्दः, सविता देवता, चक्षुरोग निवृत्तये पाठे विनियोगः।**

ऋष्यादिन्यासः- **अहिबुध्न्य ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। सविता देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।**

ध्यानम् :—

भास्वद्रत्नाढ्य मौलिः स्फुरदधार रुचा रंजित चारुकेशो
भास्वान् यो दिव्य तेजाः करकमलयुतः स्वर्णवर्णः प्रभामि ।
विश्वाकाशावकाशो ग्रहगण सहितो भाति यश्चोदयाद्रौ
सर्वानन्दप्रदाता हरि हर नमितः पातु मां विश्वचक्षुः ॥

ॐ चक्षुः चक्षुः चक्षुः तेजः स्थिरोभव। मां पाहि पाहि त्वरितं चक्षुरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय। यथाऽन्धो न स्यामिति कल्पय कल्पय कल्याणं कुरु कुरु। यानि यानि चास्मात् पूर्व जन्मोपार्जितानि चक्षुः प्रतिरोधक दुष्कृतानि तानि सर्वाणि निर्मूलय निर्मूलय। ॐ चक्षुस्तेजोदार्त्रे दिव्याय भास्कराय। ॐ नमः करुणा कराय अमृताय ॐ नमः सूर्याय। ॐ नमो भगवते श्रीसूर्यायाक्षि तेजसे नमः।

खेचराय नमः। महते नमः। रजसे नमः। तमसे नमः। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय। उष्णो भगवान् शुचिरूपः। हंसो भगवान् शुचिप्रतिरूपः। ॐ विश्वरूपं घृणिनं जातवेदसं हिरणमयं ज्योतिरूपं तपन्तम्। सहस्त्ररश्मि शतधा वर्तमानः पुरः प्रजानामुदयत्येष सूर्यः ॥

ॐ नमो भगवते श्री सूर्यायादित्यायाऽक्षितेजसेऽहो वाहिनी वाहिनी

स्वाहा। ॐ वय सुपर्णा उपसेदरिन्द्रं प्रियमेधा ऋषयो ना धभानाः । अप ध्वान्तमुर्णहि पूर्धि चक्षुर्मु भूग्ध्यस्मान्निधयेव बद्धान् ॥

ॐ पक्षिराजाय विद्महे सुवर्णपक्षाय धीमहि तन्नो गरुडः प्रचोदयात्। ॐ पुण्डरीकाक्षाय नमः। ॐ पुष्करेक्षणाय नमः। ॐ कमलेक्षणाय नमः। ॐ विश्वरूपाय नमः। ॐ श्रीमहाविष्णवे नमः। ॐ श्रीसूर्यनारायणाय नमः। ॐ शांतिः शांतिः शांतिः।

फलश्रुति :- एवं चाक्षुष्मती विद्यया स्तुतः श्रीसूर्यनारायणः सुप्रीतोऽब्रवीत चाक्षुष्मती विद्यां ब्राह्मणो यो नित्यमधीते न तस्याक्षिरोगो भवति, न तस्यकुलेऽन्धो भवति। अष्टौ ब्राह्मणान् ग्राहयित्वाऽथ विद्या सिद्धिर्भवति। य एवं वेद स महान् भवति।

(२)

ॐ सूर्यायाक्षितेजसे नमः खेचराय नमः। असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्माऽमृतं गमय। उष्णो भगवान शुचिरूपः। हंसो भगवान शुचिर प्रतिरूपः। वय सुपणो उपसे दरिद्रं प्रिय मेधा ऋषयो नाधमानाः। अवध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्। पुण्डरीकाक्षाय नमः। पुष्करेक्षणाय नमः। अमलेक्षणाय नमः। कमलेक्षणाय नमः। विश्वरूपाय नमः। श्रीमहाविष्णवे नमः।

॥ चाक्षुषी यंत्रम् ॥

कांसी की थाली में अनार की लकड़ी की कलम व हल्दी के घोल की स्याही से यह यंत्र लिखे। तांबे की दीपदानी में चौमुखा दीपक जलावें। दीपक थाली में रखें यंत्र की पूजा आरती करें।

चाक्षुषी स्तोत्र की १२ आवृति करें चाक्षुषी मंत्र की ५-६-१२ माला नित्य करें।

८	१५	२	७
६	३	१२	११
१४	९	८	१
४	५	१०	१३

॥ चाक्षुषी बीजमंत्र:॥

मंत्र :- ॐ ह्रीं हंसः।

इस मंत्र से आर्थिक लाभ समृद्धि भी मिलती है, नेत्र रोग में भी लाभप्रद है। सूर्य दोष का निवारण भी इस मंत्र जाप से होता है।

॥ अथ सूर्यव्रत विधि ॥

बारह महिनों में प्रत्येक मास के रविवारों को जिस विधि से व्रत करना चाहिये उसका वर्णन इस प्रकार से है।

भविष्यपुराण में मान्धाता-वसिष्ठ संवाद में इसका विधान कहा गया है। इसके प्रभाव से संतान हीनों को पुत्र प्राप्ति होवें, असाध्य रोगों व दरिद्रता योग से मुक्ति मिलें।

व्रत आरंभ करते समय संकल्प करे -

सूर्यव्रतं करिष्यामि यावद्वर्षं दिवाकर।
व्रतं सम्पूर्णतां यातु त्वत्प्रसादात्प्रभाकर॥

पश्चात् -

ततः प्रातः समुत्थाय नद्यादौ विमले जले।
स्नात्वा संतर्पयेद् देवान् पितृंश्च वसुधाधिप॥१॥
उपलिप्य शुचौ देशे सूर्यं तत्र समर्चयेत्।
विलिखेत् तत्र पद्मं तु द्वादशारं सकर्णिकम्॥२॥
ताम्रपात्रे तथा पद्मं रक्त चंदन वारिणा।
तत्र संपूजयेद् देवं दीननाथं सुरेश्वरम्॥३॥

प्रातः काल नदी या तालाब में अथवा कूपादि पर शुद्ध जल से स्नान कर संध्या-तर्पण करें। गोमय व मृत्तिका से शुद्ध किये स्थान पर सूर्य की पूजा करें। एक ताम्रपात्र (तामड़ी) में रक्त चंदन से बारह दलों का कमल बनाकर उसमें सूर्य के १२ नामों से पूजा करें। १२ मासों के १२ आदित्य के नाम व प्रत्येक मास की विधि इस प्रकार है -

मासे मासे च ये राजान् विशेषास्ताञ्छृणुष्व वै।
मार्गशीर्षे यजेन्मित्रं नारिकेलार्घ्यमुत्तमम्॥१॥

नैवेद्ये तण्डुला देयाः साज्याश्च गुढसंयुताः ।
पत्रत्रयं तुलस्यास्तु प्राश्य तिष्ठेज्जितेन्द्रियः ॥२॥
दद्याद् विप्राय भोज्यं तु दक्षिणा सहितं नृप ।
पौषे विष्णुं समभ्यर्च्य नैवेद्ये कृशरं तथा ॥३॥
बीजपूरेण चैवार्घ्यं घृतं प्राश्यं पलत्रयम् ।
दद्यात् घृत तु विप्राय भोजनेन समन्वितम् ॥४॥
माघे वरुणनामानं संपूज्य सतिलं गुडम् ।
भोजनं दक्षिणां दद्यान्नैवेद्यं कदली फलम् ॥५॥
अर्घ्यं तेनैव दत्त्वा तु प्राश्या मुष्टित्रयं तिलाः ।
फाल्गुने सूर्यमभ्यर्च्य नैवेद्यं सघृतं दधि ॥६॥
अर्घ्यं जंबीर सहितं दधि प्राश्यं पलत्रयम् ।
दधितण्डुलदानं च भोजने समुदाहृतम् ॥७॥
चैत्रे भानुं च सम्पूज्य नैवेद्ये घृतपूरिकाः ।
दाडिमीफलमर्घ्ये च प्राश्यं दुग्धं पलत्रयम् ॥८॥
विप्राय भोजनं दद्यान्मिष्टान्नं तु सदक्षिणाम् ।
वैशाखे तपनः प्रोक्तो माषान्नं सघृतं स्मृतम् ॥९॥
अर्घ्यं दद्यात्तु द्राक्षाभिः प्राशने गोमयं स्मृतम् ।
कुर्यान्माषान्नदानं च सघृतं वै सदक्षिणाम् ॥१०॥
इन्द्रं ज्येष्ठे यजेद् राजान् नैवेद्ये तु करम्भकम् ।
अर्घ्यं च सहकारेण प्राश्यं जलाञ्जलित्रयम् ॥११॥
दध्योदन समायुक्तं भोजनं ब्राह्मणस्य तु ।
आषाढे रविमभ्यर्च्य जातीं चिपिटकं तथा ॥१२॥
विप्राय भोजनं दद्यात् प्राशयेन्मरिचत्रयम् ।
गभस्तिं श्रावणेऽभ्यर्च्य नैवेद्ये सत्तूपूरिकाः ॥१३॥
अर्घदाने च हि प्रोक्तं त्रपुसीफलमेव च ।
मुष्टित्रयं च सक्तूनां प्राशने समुदाहृतम् ॥१४॥

विप्राय भोजनं दद्याद् दक्षिणा सहितं नृप ।
यमो भाद्रपदे पूज्यः कूष्माण्डं साज्यमोदनम् ॥१५॥
गोमूत्रं प्राशने ह्युक्तं ब्राह्मणान् भोजयेत्तथा ।
हिरण्यरेता आश्विने नैवेद्ये शर्करा स्मृता ॥१६॥
दाडिमेनार्घ्यदानं तु प्राश्यं खण्डपलत्रयम् ।
विप्राय परया भक्त्या भोजने शालि शर्कराः ॥१७॥
दिवाकरः कार्तिके च रम्भायाः फलमेव च ।
पायसं चैव नैवेद्ये पायसं प्राशने स्मृतम् ॥१८॥
पायसैर्भोजयेद् विप्रान् दद्यात् ताम्बूल दक्षिणे ।
एवं व्रतं समाप्यैतत् तत उद्यापनं चरेत् ॥१९॥

(बीजपूर = बिजोरा नींबू, कृशर= तिल चावल की खिचड़ी, जम्बीर = जंभीरी नीम्बू, पूरिका = पूरी, माषान्न = उड़द, करम्भ = दही सत्तू दलिया, ओदन = भात, चिपिट = चिवड़ा, सक्तु = सत्तू, शालि = मिश्री, रंभाफल = केला)

॥ इति सूर्यव्रतविधानम् ॥

॥ सूर्यार्घविधानम् ॥

दद्यादर्घ्यं प्रतिदिनं वारे वा तस्य चोदिते ॥२॥ प्रभाते मंडलं कृत्त्वा पूर्ववत्पीठमर्चयेत्॥ पात्रं ताम्रमयं प्रस्थतोयग्राहि मनोहरम् ॥३॥ विधाय तत्र मनुना पूरयेत्तच्छुभोदकैः ॥ कुंकुमं रोचनं राजीरक्तचन्दनवैणवान् ॥४॥ करवीरजपालाशीकुशश्यामाकतंडुलान्॥ निक्षिपेत्सलिले तस्मिन्नैक्यं संकल्प्य भानुना ॥५॥ सांगमभ्यर्चयेत्तस्मिन्भास्करं प्रोक्तलक्षणम्॥ गंधपुष्पादिनैवेद्यैर्यथाविधि विधानवित् ॥६॥ तद्विधाय जपेन्मंत्रं सम्यगष्टोत्तरं शतम्॥ पुनः संपूज्य गंधाद्यैर्जानुभ्यामवनीं गतः ॥७॥ आमस्तकं तदुद्धृत्त्य व्योम्नि सावरणे रवौ ॥ दृष्टिं विधाय स्वैक्येन मूलमंत्रं धिया जपन् ॥८॥

मूलमंत्रः- ''ॐ ह्रींघृणिः सूर्यआदित्यः श्रीं''।

दद्यादर्घ्यं दिनेशाय प्रसन्नेनांतरात्मना। कृत्वा पुष्पाञ्जलिं भूयो

जपेदष्टोत्तरं शतम्॥९॥ यावदर्घामृतं भानुः समादत्ते निजैः करैः॥ तेन तृप्तो दिनमणिर्दद्यात्तस्मै मनोरथान्॥१०॥ अर्घ्यदानमिदं पुण्यं पुंसामारोग्य वर्द्धनम्॥ धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदम्॥११॥ तेजोवीर्ययशः कांतिविद्याविभवभाग्यदम्॥

॥ इत्यष्टाक्षरसूर्यमंत्रविधानं सार्घ्यं समाप्तम् ॥

॥ सूर्याष्टक स्तोत्रम्॥

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोस्तुते ॥१॥
सताश्व रथमारूढं प्रचण्डं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥२॥
लोहितं रथमारूढं सर्वलोक पितामहम् ।
महापाप - हरं देवं तं सूर्यं प्रणमाम्यहम् ॥३॥
त्रैगुण्यं च महाशूरं ब्रह्मा विष्णु महेश्वरम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥४॥
बृहितं तेजः पुञ्जं च वायुमाकाशमेव च
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५॥
बन्धूक पुष्प संकाशं हारकुण्डल भूषितम् ।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ।
तं सूर्य जगकर्तारं महातेजः प्रदीपनम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥६॥
तं सूर्य जगतां नाथं ज्ञान विज्ञान मोक्षदम् ।
महापाप हरं देवं तं सूर्यं प्रणमाम्यहम् ॥८॥

॥ इति सूर्याष्टकं समाप्तम् ॥

॥ सूर्य स्तुति ॥

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादि हेतुं
ब्रह्माहरात्मकमलक्ष्य-मचिन्त्य रूपम् ॥१॥
प्रातर्नमामि तरणिं तनुवाङ् मनोभिः
ब्रह्मेन्द्र पूर्वक सुरैर्नतमर्चितं च ।
वृष्टि प्रमोचन विनिग्रह हेतुभूतं
त्रैलोक्य पालनपरं त्रिगुणात्मकम् ॥२॥
प्रातर्भजामि सवितारमनन्त शक्तिः
पापौघ शत्रुभयरोग हरं परं च ।
तं सर्वलोक कलनात्मक कालमूर्ति
गोकण्ठबन्धन विमोचनमादि देवम् ॥३॥

॥ सूर्य स्तवन ॥

सूर्य स्तवन को जपने से मनुष्य अपनी समस्त अभीष्ट वस्तुओं को प्राप्त करता है एवं मानव जीवनोपरांत स्वर्ग का सुख भी सहज प्राप्त करता है। श्रद्धा, विनय पूर्वक इस मंत्र का दैनिक जप साधक के लिए निश्चय ही हितकर होगा इसमें सन्देह नहीं है।

ॐ नमः सहस्त्रबाहवे आदित्याय नमो नमः ।
नमस्ते पवन हस्ताय वरुणाय नमो नमः ॥
नमः तिमिरनाशाय श्रीसूर्याय नमो नमः ।
नमः सहस्त्र जिह्वाय भानवे च नमो नमः ।
त्वं च ब्रह्मा त्वं च विष्णु रुद्रस्त्वं च नमो नमः ।
त्वमग्निस्सर्वभूतेषु वायुस्त्वं च नमो नमः ।
सर्वगः सर्वभूतेषु न हि किंचिन्त्वया विना ।
चराचरे जगत्मस्मिन् सर्वदेहे व्यवस्थितः ॥

॥ सूर्यार्यास्तोत्रम् ॥

शुकतुण्डच्छविसवितुश्चण्डरुचे: पुण्डरीकवनबन्धो: ।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशाया: ॥१॥

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि ।
कुरुतेऽञ्जलिं त्रिनेत्र: स जयति धाम्नां निधि: सूर्य: ॥२॥

उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय ।
अम्बरचूडामणये दिग्वनिताकर्णपूराय ॥३॥

जयति जनानन्दकर: करनिकरनिरस्ततिमिरसङ्घात: ।
लोकालोकालोक: कमलारुणमण्डल: सूर्य: ॥४॥

प्रतिबोधितकमलवन: कृतघटनश्चक्रवाकमिथुनानाम् ।
दर्शितसमस्तभुवन: परहितनिरतो रवि: सदा जयति ॥५॥

अपनयतु सकलकलिकृतमलपटलं सुप्रतप्तकनकाभ: ।
अरविन्दवृन्दविघटनपटुतरकिरणोत्कर: सविता ॥६॥

उदयाद्रिचारुचामर हयखुरपरिहितरेणुराग ।
हरितहय हरितपरिकर गगनाङ्गदीपक नमस्तेऽस्तु ॥७॥

उदितवति त्वयि विकसति मुकुलीयति समस्तमस्तमितबिम्बे ।
नह्यन्यस्मिन् दिनकरसकलं कमलायते भुवनम् ॥८॥

जयति रविरुदयसमये बालातप: कनकसंनिभो यस्य ।
कुसुमाञ्जलिरिव जलधौ तरन्ति रथसप्तय: सप्त ॥९॥

आर्या: साम्बपुरे सप्त आकाशात् पतिता भुवि ।
यस्य कण्ठे गृहे वापि न स लक्ष्म्या वियुज्यते ॥१०॥

आर्या: सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत् ।
तस्य गेहं च देहं च पद्मा सत्यं न मुञ्चति ॥११॥

निधिरेष दरिद्राणां रोगिणां परमौषधम् ।
सिद्धि: सकलकार्याणां गाथेयं संस्मृता रवे: ॥१२॥

॥ इति श्री याज्ञवल्क्यविरचितं सूर्यार्यास्तोत्रं सम्पूर्णम् ॥

॥ श्रीसूर्यमण्डलस्तोत्रम् ॥

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने ॥१॥
यन्मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम् ।
दारिद्रयदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥२॥
यन्मण्डलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम् ।
तं देवदेवं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥३॥
यन्मण्डलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ।
समस्ततेजोमयदिव्यरूपं पुनातु मां तत्सवितुर्वरेण्यम् ॥४॥
यन्मण्डलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम् ।
यत्सर्वपापक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥५॥
यन्मण्डलं व्याधिविनाशदक्षं यदृग्यजुःसामसु सम्प्रगीतम् ।
प्रकाशितं येन च भूर्भुवः स्वः पुनातु मां तत्सवितुर्वरेण्यम् ॥६॥
यन्मण्डलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसङ्घाः ।
यद्योगिनो योगजुषां च सङ्घाः पुनातु मां तत्सवितुर्वरेण्यम् ॥७॥
यन्मण्डलं सर्वजनेषु पूजितं ज्योतिश्च कुर्यादिह मर्त्यलोके ।
यत्कालकल्पक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम् ॥८॥
यन्मण्डलं विश्वसृजां प्रसिद्धमुत्पत्ति रक्षाप्रलयप्रगल्भम् ।
यस्मिन् जगत् संहरतेऽखिलं च पुनातु मां तत्सवितुर्वरेण्यम् ॥९॥
यन्मण्डलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् ।
सूक्ष्मान्तरैर्योगपथानुगम्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥१०॥
यन्मण्डलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसङ्घाः ।
यन्मण्डलं वेदविदः स्मरन्ति पुनातु मां तत्सवितुर्वरेण्यम् ॥११॥
यन्मण्डलं वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम् ।
तत्सर्ववेदं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम् ॥१२॥

मण्डलात्मकमिदं पुण्यं यः पठेत् सततं नरः ।
सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥१३॥

॥ इति श्रीमदादित्यहृदये मण्डलात्मकं स्तोत्रं सम्पूर्णम् ॥

॥ तृचाकल्पनमस्कार ॥

श्रीसूर्यनारायण भगवान् की प्रीति हेतु तृचाकल्पनमस्कार वैदिक मन्त्र और तन्त्राक्षर (बीजों) से संयुक्त ब्रह्मकर्मसमुच्चय में उपलब्ध है।

विधानम् - आसन पर बैठकर आचमन कर प्राणायाम करें, पुनः हाथ में जल लेकर संकल्प करे। संकल्प में देशकालपात्र-तिथि-वारादिका उच्चारणकर कहें-

'ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्री सवितृसूर्यनारायण प्रीत्यर्थं च तृचाकल्पविधिना नमस्काराख्यं कर्माहं करिष्ये'

इस प्रकार संकल्प कर जल छोड़ दें।

पुनः एक पात्र में जल भरकर उसमें गन्ध पुष्प, अक्षत रख दे। तदनन्तर हाथ में पुष्प लेकर श्रीसूर्यनारायण का ध्यान करें। **ध्यान का मन्त्र इस प्रकार है-**

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

इस प्रकार ध्यानकर निम्नोक्त मन्त्रों का उच्चारण करते हुए नमस्कार करें।

ॐ ह्रां उद्यन्नद्य मित्रमहः ह्रां ॐ मित्राय नमः ॥ ॐ ह्रीं आरोहन्नुत्तरां दिवम् ह्रीं ॐ रवये नमः ॥ ॐ ह्रूं हृद्रोगं मम सूर्य ह्रूं ॐ सूर्याय नमः ॥ ॐ ह्रैं हरिमाणं च नाशय ह्रैं ॐ भानवे नमः ॥ ॐ ह्रौं शुकेषु मे हरिमाणं ह्रौं ॐ खगाय नमः ॥ ॐ ह्रः रोपणाकासु दध्मसि ह्रः ॐ पूष्णे नमः ॥ ॐ ह्रां अथो हारिद्रवेषु मे ह्रां ॐ हिरण्यगर्भाय नमः ॥ ॐ ह्रीं हरिमाणं नि दध्मसि ह्रीं ॐ मरीचये नमः ॥ ॐ ह्रूं उदगादयमादित्यः ह्रूं ॐ आदित्याय नमः ॥ ॐ ह्रैं विश्वेन सहसा सह ह्रैं ॐ सवित्रे नमः ॥ ॐ ह्रौं

द्विषतिं मह्यंरन्धयन् ह्रौं ॐ अर्काय नमः॥ ॐ ह्रः मो अहं द्विषते रथं ह्रः ॐ भास्कराय नमः॥

ॐ ह्रां ह्रीं उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं ह्रां ह्रीं ॐ मित्ररविभ्यां नमः॥ ॐ ह्रूं ह्रैं हृद्रोगं मम सूर्य हरिमाणं च नाशय ह्रूं ह्रैं ॐ सूर्यभानुभ्यां नमः॥ ॐ ह्रौं ह्रः शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ह्रौं ह्रः ॐ खगपूषाभ्यां नमः॥ ॐ ह्रां ह्रीं अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ह्रां ह्रीं ॐ हिरण्यगर्भमरीचिभ्यां नमः॥ ॐ ह्रूं ह्रैं उदगादयमादित्यो विश्वेन सहसा सह ह्रूं ह्रैं ॐ आदित्यसवितृभ्यां नमः। ॐ ह्रौं ह्रः द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रथं ह्रौं ह्रः ॐ अर्कभास्कराभ्यां नमः॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं हृद्रोगं मम सूर्य हरिमाणं च नाशय ह्रां ह्रीं ह्रूं ह्रैं ॐ मित्ररविसूर्यभानुभ्यो नमः॥ ॐ ह्रौं ह्रः ह्रां ह्रीं शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ह्रौं ह्रः ह्रां ह्रीं ॐ खगपूषाहिरण्यगर्भमरीचिभ्यो नमः॥ ॐ ह्रूं ह्रैं ह्रौं ह्रः उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रथं ह्रूं ह्रैं ह्रौं ह्रः ॐ आदित्यसवित्रर्कभास्करेभ्यो नमः॥

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि। उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रथम्। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ मित्ररविसूर्यभानुखगपूष हिरण्यगर्भमरीच्यादित्य सवित्रर्कभास्करेभ्यो नमः।

इस मन्त्र की तीन बार आवृत्ति करनी चाहिये।

विनतातनयो देवः कर्मसाक्षी सुरेश्वरः ।
सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु ॥
आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्त्रेषु दारिद्र्यं नोपजायते ॥

नमो धर्मविधानाय नमस्ते कर्मसाक्षिणे ।
नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥

जो आदित्य को प्रतिदिन नमस्कार करते है, उन्हें सहस्त्रों जन्म तक दरिद्रता का क्लेश नहीं होता।

अनेन तृचाकल्पनमस्काराख्येन कर्मणा भगवान् श्री सवितृसूर्यनारायणः प्रीयतां न मम। (इस तृचाकल्प नमस्कार कर्म से भगवान् सवितृ सूर्यनारायण प्रसन्न होवें।)

॥ याज्ञवल्क्यकृत सूर्यस्तोत्रम् ॥

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे ।
ऋग्यजुः सामभूताय त्रयीधाम्ने च ते नमः ॥१॥
नमोऽग्नीषोमभूताय जगतः कारणात्मने ।
भास्कराय परं तेजस्सौषुम्नं रुचि बिभ्रते ॥२॥
कलाकाष्ठानिमेषादि कालज्ञानात्मरूपिणे ।
ध्येयाय विष्णुरूपाय परमाक्षर-रूपिणे ॥३॥
बिभर्ति यः सुरगणानाप्यायेन्दुं स्वरश्मिभिः ।
स्वधामृतेन च पितृंस्तस्मै तृप्त्यात्मने नमः ॥४॥
हिमाम्बुधर्मवृष्टिनां कर्ता भर्ता च यः प्रभुः ।
तस्मै त्रिकालरूपाय नमः सूर्याय वेधसे ॥५॥
अपहन्ति तमो यश्च जगतोऽस्य जगत्पतिः ।
सत्त्वधामधरो देवो नमस्तस्मै विवस्वते ॥६॥
सत्कर्मयोग्यो न जनो नैवापः शुद्धिकारणम् ।
यस्मिन्ननुदिते तस्मै नमो देवाय भास्वते ॥७॥
स्पृष्टो यदंशुभिर्लोकः क्रियायोग्यो हि जायते ।
पवित्रताकारणाय तस्मै शुद्धात्मने नमः ॥८॥
नमः सवित्रे सूर्याय भास्कराय विवस्वते ।
आदित्यादिभूताय देवादिनां नमो नमः ॥९॥

हिरण्मयं रथं यस्य केतवोऽमृतवाजिनः ।
वहन्ति भुवनालोकिचक्षुषं तं नमाम्यहम् ॥१०॥

॥ श्री पराशर उवाच ॥

इत्येवमादिभिस्तेन स्तूयमानस्य वै रविः ।
वाजिरूपधरः प्राह व्रियतामिति वाञ्छितम् ॥११॥
याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम् ।
यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ ॥१२॥
एवमुक्तौ ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥१३॥
यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम ।
वाजिनस्ते समाख्याताः सूर्योऽप्यश्वोऽभवद्यतः ॥१४॥
शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम् ।
काण्वाद्याः सुमहाभाग याज्ञवल्क्याः प्रकीर्तिताः ॥१५॥

॥ महाराज मनुकृत सूर्यस्तुति ॥

नमो नमो वरेण्याय वरदायांशुमालिने ।
ज्योतिर्मय नमस्तुभ्यमनन्तायाजिताय ते ॥
त्रिलोक चक्षुषे तुभ्यं त्रिगुणायामृताय च ।
नमो धर्माय हंसाय जगज्जनन हेतवे ॥
नरनारीशरीराय नमो मीष्ढुष्टमाय ते ।
प्रज्ञानायाखिलेशाय सप्ताश्वाय त्रिमूर्तये ॥
नमो व्याहृतिरूपाय त्रिलक्षायाशुगामिने ।
हर्यश्वाय नमुस्तुभ्यं नमो हरितबाहवे ॥
एकलक्षविलक्षाय बहुलक्षाय दण्डिने ।
एकसंस्थद्विसंस्थाय बहुसंस्थाय ते नमः ॥
शक्तित्रयाय शुक्लाय रवये परमेष्ठिने ।
त्वं शिवस्त्वं हरिर्देव त्वं ब्रह्मा त्वमेव हि ॥

त्वमोंकारो वषट्कारः स्वधा स्वाहा त्वमेव हि ।
त्वामृते परमात्मनं न तत्पश्यामि दैवतम् ॥

॥ सर्वग्रह पीड़ा नाशक सूर्य प्रयोग ॥

दत्तात्रेय तंत्र में सूर्य मंत्र जाप का विशेष प्रयोग सर्वग्रहपीड़ा निवारण हेतु तथा महादरिद्री पातकी योग के नाश के लिये दिया गया है।

इसके साथ ही तांत्रिक विधि भी दी गई है।

आक, धत्तूरा, अपामार्ग, दूर्वा, वट इन सबकी जड़ें लेवे, खेजड़ा के पत्ते, आम के पत्ते और गूलर के पत्ते इन सबको एक मिट्टी के बरतन में इकट्ठा कर रखें तथा दूध, घी, चावल, चना, मूंग, गेहूँ, तिल, गौमूत्र, सरसों, लाल सफेद चंदन, शहद और छाछ ये सब वस्तुयें उस पात्र में डालें और शनिवार को सायंकाल के समय पीपल के वृक्ष की जड़ में गड्ढा खोदकर गाड़ देवे और उसी समय पीपल के वृक्ष नीचे या देवालय में जाकर दश सहस्त्र जप निम्न मंत्र करें या करायें। एक समय में पूरे नहीं हो सके तो दूसरे दिन रविवार तक कर लेवें।

मंत्र - **ॐ नमो भगवते भास्कराय अस्माकं सर्व ग्रहाणां पीड़ा नाशनं कुरु कुरु स्वाहा।**

॥ इति दरिद्रता नाशक सूर्य प्रयोग ॥

॥ सूर्य शान्ति प्रयोगः ॥

रोग लक्षण -

मस्तिष्क रोग, हृदय रोग, नेत्र रोग, उच्चरक्त चाप, पित्त जनित रोग, मस्तिष्क ज्वर, मिर्गी, ताप लहरी(लू), सिर दर्द, मस्तिष्क संबन्धी विकृतियाँ एवं सूर्य पीड़ा में इस यंत्र का प्रयोग करें।

उपचार-

१. उक्त सूर्य यंत्र को प्रातःकाल रविवार या कृतिका या उत्तरा फाल्गुनी या उत्तराषाढ़ा नक्षत्र में अष्टगंध से भोजपत्र पर अनार की कलम से लिखकर प्राण प्रतिष्ठा एवं पूजन कर ताँबे की ताबीज में धारण करें।

६	१	८
७	५	३
२	९	४

२. रविवार को बिल्व की जड़, लाल डोरे में सूर्य मंत्र से अभिमंत्रित करके बाँधने से भी सूर्य बाधा की शान्ति होती है।

३. निम्नलिखित औषधियों के चूर्ण से स्नान करने पर भी सूर्य बाधा की शान्ति होती है। यथा कनेर, दुपहरिया, नागरमोथा, देवदारु, मैनसिल, केसर, इलायची, पद्माख, महुवा के फूल, सुगन्ध-बाला।

४. गेहूँ, गुड़, घी, लाल वस्त्र, ताँबा, सोना, बछड़े सहित गाय, माणिक्य, लालचन्दन के दान से भी सूर्य-बाधा की शान्ति होती है।

ध्यानम्- नित्य हाथ जोड़कर भगवान् सूर्य का ध्यान करें-

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्ग वाहनः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥

भगवान् सूर्य के निम्न मंत्रों में से किसी एक मंत्र का जप करें-

मंत्राः-

१. ॐ घृणिः सूर्याय नमः। २. ॐ घृणिः सूर्य आदित्याय नमः। ३. ॐ ह्रीं ह्रीं सूर्याय नमः। ४. ॐ ह्रां ह्रीं ह्रौं सः सूर्याय नमः। ५. ॐ भास्कराय विद्महे महातेजाय धीमहि तन्नः सूर्यः प्रचोदयात्।

प्रत्येक मंत्र की जप संख्या २८ हजार है।

॥ अर्जुनकृत सूर्यस्तवन ॥

जयति किरणमाली भासुरः सप्तसप्तिः ।
सकलभुवनधामा प्राब्दिगन्ताट्टाहासः ॥
भवति विगतपापं कीर्तनादेव यस्य ।
प्रचुरकलुषदोषैर्ग्रस्तमङ्गं नराणाम् ॥
उद्यन्तमम्बरतले सुरसिद्धसङ्घाः ।
सब्रह्मदैत्यमुनि किन्नरनागयक्षाः ॥

त्वामर्चयन्ति विबुधाः प्रणतैः
शिरोभिश्चञ्चत्किरीटमणि भाभिरनुत्तमाभिः ।
उत्साहशक्तिमय शौर्यसमन्वितानां
सेवाप्रयोगरचनाविधि तत्पराणाम् ॥
कार्याणि यन्न फलदानि भवन्ति पुंसां
हेतुस्त्वभक्तिरिह नाथ तवेति नूनम् ।
तेजोराशिस्त्वमिह शरणं सर्वतो दुःखितानां
त्वत्तुल्योऽन्यो जगति सकले नास्ति कश्चिद्दयालुः ।
त्वय्येकस्मिन् भवति सफला भक्तिरन्विष्यमाणा
त्वामासाद्य प्रभवति कुतो व्याधिदुःखं नराणाम् ॥
कः कुष्ठाभिहतः क्वचारिभिरथो को व्याधिभिः पीडितः
के पङ्ग्वन्धजडाः कः शीर्णचरणः को वा विपन्नक्रिणः ।
इत्येवं प्रसमीक्ष्य देव कृपया दोषात्परित्रायसे
कस्यान्यस्य परोपकार निरता चेष्टा यथैषा तव ॥
उदधिजलतरंग क्षोभलोलाक्षियुग्मैः
सफणिमणिमयूखोद्भासि - तैर्लेलिहद्भिः ।
प्रणिपतित - शिरोभिर्नागमुख्यैरजस्त्रं
श्रुतिभिरनुपमाभिः स्तूयसे पुष्कलाभिः ॥
तव सुरवर गच्छतोऽनुसरन्ति
त्रिदशनदीकमलोद्गतानि वालैः ।
कनककमलरेणु पिंजितानि
भ्रमरकुलानि पतंग चामराणि ॥
त्वं विष्णुस्त्वं शशाङ्कस्त्वमसुरमन्थनः षण्मुखस्त्वं धनेश-
स्त्वं कालस्त्वं च धाता क्षितिधरमलयापाश्रयस्त्वं हुताशः ।
ॐ कारस्त्वं द्विजानां त्वमिह जलनिधिस्त्वं शरस्त्वं च रुद्र-
स्त्वं मुख्यस्त्वं पयोदो व्रतयमनियमास्त्वं जगत् सर्वमेव ॥

(स्कंधपुराणे अवन्तिखण्डे-४३)

॥ श्रीसूर्य अष्टोत्तरशत–नामावली ॥

ॐ ह्रीं अरुणाय नमः।
ॐ ह्रीं शरण्याय नमः।
ॐ ह्रीं करुणारस सिन्धवे नमः।
ॐ ह्रीं असमानबलाय नमः।
ॐ ह्रीं आर्तरक्षकाय नमः।
ॐ ह्रीं आदित्याय नमः।
ॐ ह्रीं आदिभूताय नमः।
ॐ ह्रीं अखिलागमवेदिने नमः।
ॐ ह्रीं अच्युताय नमः।
ॐ ह्रीं अखिलज्ञाय नमः।
ॐ ह्रीं अनन्ताय नमः।
ॐ ह्रीं इनाय नमः।
ॐ ह्रीं विश्वरूपाय नमः।
ॐ ह्रीं इज्याय नमः।
ॐ ह्रीं इन्द्राय नमः।
ॐ ह्रीं भानवे नमः।
ॐ ह्रीं इन्दिरामन्दिराप्ताय नमः।
ॐ ह्रीं वन्दनीयाय नमः।
ॐ ह्रीं ईशाय नमः।
ॐ ह्रीं सुप्रसन्नाय नमः।
ॐ ह्रीं सुशीलाय नमः।
ॐ ह्रीं सुवर्चसे नमः।
ॐ ह्रीं वसुप्रदाय नमः।
ॐ ह्रीं वसवे नमः।
ॐ ह्रीं वासुदेवाय नमः।
ॐ ह्रीं उज्ज्वलाय नमः।
ॐ ह्रीं उग्ररूपाय नमः।
ॐ ह्रीं ऊर्ध्वगाय नमः।
ॐ ह्रीं विवस्वते नमः।
ॐ ह्रीं उद्यत्किरणजालाय नमः।
ॐ ह्रीं हृषीकेशाय नमः।
ॐ ह्रीं ऊर्जस्वलाय नमः।
ॐ ह्रीं वीराय नमः।
ॐ ह्रीं निर्जराय नमः।
ॐ ह्रीं जयाय नमः।
ॐ ह्रीं उरुद्वयभावरूपयुक्त –सारथये नमः।
ॐ ह्रीं ऋणिबन्धाय नमः।
ॐ ह्रीं रुग् हन्त्रे नमः।
ॐ ह्रीं ऋक्षचक्रचराय नमः।
ॐ ह्रीं ऋजुस्वभावचित्ताय नम :।
ॐ ह्रीं नित्यस्तुत्याय नमः।
ॐ ह्रीं ऋकारमातृकावर्ण –रूपाय नमः।
ॐ ह्रीं उज्ज्वलत्-तेजसे नमः।
ॐ ह्रीं ऋक्षादिनाथमित्राय नमः।
ॐ ह्रीं पुष्कराक्षाय नमः।
ॐ ह्रीं लुप्तदन्ताय नमः।

ॐ ह्रीं शान्ताय नमः।
ॐ ह्रीं कान्तिदाय नमः।
ॐ ह्रीं घनाय नमः।
ॐ ह्रीं कनत्कनकभूषाय नमः।
ॐ ह्रीं खद्योताय नमः।
ॐ ह्रीं ऊनिताखिल दैत्याय नमः।
ॐ ह्रीं सत्यानन्द स्वरूपिणे नमः।
ॐ ह्रीं अपवर्गप्रदाय नमः।
ॐ ह्रीं आर्तशरण्याय नमः।
ॐ ह्रीं एकाकिने नमः।
ॐ ह्रीं भगवते नमः।
ॐ ह्रीं सृष्टिस्थित्यन्तकारिणे नमः।
ॐ ह्रीं गुणात्मने नमः।
ॐ ह्रीं घृणिभृते नमः।
ॐ ह्रीं बृहते नमः।
ॐ ह्रीं ब्रह्मणे नमः।
ॐ ह्रीं ऐश्वर्यदाय नमः।
ॐ ह्रीं शर्वाय नमः।
ॐ ह्रीं हरिदश्वाय नमः।
ॐ ह्रीं शौरये नमः।
ॐ ह्रीं दशदिक् सम्प्रकाशाय नमः।
ॐ ह्रीं भक्तवश्याय नमः।
ॐ ह्रीं ऊर्जस्कराय नमः।
ॐ ह्रीं जयिने नमः।
ॐ ह्रीं जगदानन्द हेतवे नमः।
ॐ ह्रीं जन्ममृत्युजराव्याधि वर्जिताय नमः।
ॐ ह्रीं उच्चस्थानसमारूढ रथस्थाय नमः।
ॐ ह्रीं असुरारये नमः।
ॐ ह्रीं कमनीयकराय नमः।
ॐ ह्रीं अब्जवल्लभाय नमः।
ॐ ह्रीं अन्तर्बहिःप्रकाशाय नमः।
ॐ ह्रीं अचिन्त्याय नमः।
ॐ ह्रीं आत्मरूपिणे नमः।
ॐ ह्रीं अच्युताय नमः।
ॐ ह्रीं अमरेशाय नमः।
ॐ ह्रीं परस्मै ज्योतिषे नमः।
ॐ ह्रीं अहस्कराय नमः।
ॐ ह्रीं रवये नमः।
ॐ ह्रीं हरये नमः।
ॐ ह्रीं परमात्मने नमः।
ॐ ह्रीं तरुणाय नमः।
ॐ ह्रीं वरेण्याय नमः।
ॐ ह्रीं ग्रहाणांपतये नमः।
ॐ ह्रीं भास्कराय नमः।
ॐ ह्रीं आदिमध्यान्तरहिताय नमः।
ॐ ह्रीं सौख्यप्रदाय नमः।
ॐ ह्रीं सकलजगतांपतये नमः।
ॐ ह्रीं सूर्याय नमः।

ॐ ह्रीं कवये नमः।
ॐ ह्रीं अनुप्रसन्नाय नमः।
ॐ ह्रीं नारायणाय नमः।
ॐ ह्रीं श्रीमते नमः।
ॐ ह्रीं परेशाय नमः।
ॐ ह्रीं श्रेयसे नमः।
ॐ ह्रीं तेजोरूपाय नमः।
ॐ ह्रीं भक्तकोटिसौख्यप्रदायिने नमः।
ॐ ह्रीं श्रीहिरण्यगर्भाय नमः।
ॐ ह्रीं निखिलागमवेद्याय नमः।
ॐ ह्रीं सम्पत्कराय नमः।
ॐ ह्रीं नित्यानन्दाय नमः।
ॐ ह्रीं इष्टार्थदाय नमः।
ॐ ह्रीं छायाउषादेवी समेताय नमः।

॥ इति श्रीसूर्य अष्टोत्तरशत नामावली ॥

॥ सिद्ध सूर्य यंत्रम् ॥

यंत्र महात्म्य- यह चमत्कारी सूर्य यंत्र मनुष्य के समस्त कार्यों को सिद्ध करता है। इस यंत्र के प्रभाव से भगवान् सूर्यनारायण की कृपा प्राप्त होती है। इस यंत्र को धारण करने से खाँसी, दमा, गर्मी, कुष्ठरोग त्वचा व नेत्ररोग नष्ट होते है।

यंत्र निर्माण की विधि इस प्रकार है-

गुरु-शुक्रास्त, मलमास एवं गुर्वादित्यादि (सूर्य-बृहस्पति जब एक राशिस्थ हो ऐसे) निषिद्ध समय को छोड़कर शुद्ध दिनों में किसी भी महिने के शुक्ल पक्ष में रविवार को जिस दिन कृत्तिका नक्षत्र हो, उस दिन रविकृत्तिका योग में अथवा उत्तराफाल्गुनी, उत्तराषाढा, पुष्य नक्षत्र में आक के दूध, केसर, गोरोचन और आक के पत्तों के रस से मसी (स्याही) बनाकर आक की कलम से इस यंत्र को भोजपत्र पर लिखकर **"ॐ ह्रीं हंसः घृणिः सूर्याय नमः"** इस सूर्य मंत्र से १०८ बार अभिमंत्रित कर सुवर्ण के ताबीज में रखकर दक्षिण भुजा में धारण करने से मनुष्य के सब कार्य सिद्ध होते है (साधारण मनुष्य ताँबे के ताबीज में धारण कर सकते है)

किसी भी महिने के शुक्लपक्ष में रविवार के दिन जब पुष्य, कृत्तिका, उत्तराफाल्गुनी अथवा उत्तराषाढा नक्षत्र रहे तब धारण करने से सूर्य का अनिष्ट फल शमन होता है एवं मनुष्य का तेज बढता है।

यंत्रम्-

६	३२	३	३४	३५	१
७	११	२७	२८	८	३०
१९	१४	१६	१५	२३	२४
१८	२०	२२	२१	१७	१३
२५	२९	१०	९	२६	१२
३६	५	३३	४	२	३१

॥ अथ सूर्याथर्वशीर्षमुपनिषत् ॥

अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः ब्रह्मान्रिषिः आदित्यो देवता गायत्री छन्दः हंसाद्यग्निनारायण युक्तं बीजम्। हृल्लेख शक्तिः। द्विपदादिसर्ग संयुक्तं कीलकम्। धमार्थ काममोक्षेषु जपे विनियोगः।

षट्स्वरारूढ बीजेन षडंगं रक्ताम्बुजसंस्थं सप्ताश्वरथिनं हिरण्यवर्णं। चतुर्भुजं पद्मद्वयाभय वरदहस्तं। कालचक्र प्रणेतारं च श्रीसूर्यनारायणं॥ यऽ एवं वेद स वै ब्राह्मणः। ॐ भूः ॐ भुवः ॐ स्वः ॐ मह ॐ जनः ॐ तपः ॐ सत्यं तत्सवितुर वरेण्यम् भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् परोरजसे सावदोम् ॐ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम्॥ सूर्य आत्मा जगतस्तस्थुषश्च। सूर्याद्वैखल्विमानि भूतानि जायन्ते। सूर्याद्यज्ञाः पर्जन्योऽन्नमात्मा।

नमस्ते आदित्याय त्वमेव केवलं कर्त्तासि। त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं रुद्रोऽसि। त्वमेव प्रत्यक्ष मृगसि। त्वमेव प्रत्यक्षं यजुरसि। त्वमेव प्रत्यक्षं सामासि। त्वमेव प्रत्यक्षमथर्वासि। त्वमेव सर्वं छंदोसि। आदित्याद्वायुर्जायते। आदित्याद्भूमिर्जायते। आदित्यादापोजायते। आदित्याज्ज्योतिर्जायते। आदित्याद्व्योम दिशो जायंते। आदित्याद्वेदा जायंते। आदित्याद्देवा जायंते। आदित्यो वा ऽएष एतन्मंडलंपति। असावादित्यो ब्रह्म। आदित्यो ऽन्तःकरण मनोबुद्धि चित्ताहंकाराः। आदित्यो वै व्यान समानोदानापान प्राणाः। आदित्यो वै श्रोत्र त्वक् चक्षु रसनानासाः। आदित्यो वै वाक् पाणि पादोपस्थ पायूनि।

आदित्यो वै शब्द स्पर्श रूप रस गंधाः। आदित्यो वै वचना दान गमनानन्द विसर्गाः। आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः। नमो मित्राय भानवे मृत्योर्मा पाहिभ्राजिष्णवे विश्वहेतवे नमः। सूर्यो नो दिवस्पातु वातो अंतरिक्षात्। अग्निर्नः पार्थिवेभ्यः सूर्याद्वै भूतानि सूर्येण पालितानि तु। सूर्य लयं प्रानुवंति य सूर्यः सोहमेव च। चक्षुर्नो देवः सविता। चक्षुर्न उत पर्वतः। चक्षुर्धाता दधातु नः।

आदित्याय विद्महे सहस्त्रकराय धीमहि। तन्नः सूर्यः प्रचोदयात्। सविता पश्चात्तात्। सवितापुरस्तात्। सवितोत्तरात्तात् सविता धरात्तात्। सविता नः सुवतु सर्वतातिम्। सवितानोरासतांदीर्घमायुः ओमित्येकाक्षरं ब्रह्म घृणिरिति द्वे अक्षरे सूर्य इत्यक्षर द्वयम्। आदित्य इति। त्रीण्यक्षराणि एतद्वै सूर्यास्याष्टाक्षरमनुम् 'ॐ घृणिः सूर्य आदित्य' इति मंत्रः। यः सदाहर हर्जषति। सो ऽब्रह्मण्यो ब्राह्मणो भवति। सूर्याभिमुखं जप्त्वा महाव्याधि भयात्प्रमुच्यते। अलक्ष्मीर्नश्यति अभक्ष्य भक्षणात् पूतो भवति। अपेयपानात्पूतो भवति। अगम्या- गमनात्पूतो भवति। व्रात्य संभाषणात्पूतो भवति। मध्याह्ने सूर्याभिमुखः पठेत् सद्यः पंचमहापापात्प्रमुच्यते। सैषा सावित्री विद्या न कस्यचित्प्रशंसेत्। एतन्महाभागः प्रातः पठति स भाग्यवान जायते। पशून विदति वेदार्थं लभते। त्रिकालं जत्वा क्रतु शतफलं प्राप्नोति। हस्तादित्ये जपति स महामृत्यं तरति। य एवं वेद।

(इत्युपनिषत्। इति सूर्याथर्वशीर्षम्।)

॥ चन्द्र तन्त्रम् ॥

॥ अथ चन्द्रवैदिकमन्त्रप्रयोगः॥

मंत्रः - ॐ इमंदेवाऽअसपत्नठं.सुवध्वम्महतेक्षत्राय महतेज्यैष्ठ्याय महते जानराज्ज्यायेंद्रस्येंद्रियाय इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएषवो मीराजासोमोस्माकं ब्राह्मणाना ँ राजा॥१२॥

विनियोगः- ॐ इमं देवा इति मन्त्रस्य गौतम ऋषिः। द्विपदाविराट् छन्दः। सोमो देवता। असपत्नमिति बीजम्। सोमप्रीत्यर्थे जपे विनियोगः॥

ऋष्यादि न्यासः- ॐ गौतम ऋषये नमः शिरसि॥१॥ ॐ द्विपदा विराट्छन्दसे नमः मुखे॥२॥ ॐ सोमदेवतायै नमः हृदि॥३॥ॐ असपत्न बीजाय नमः गुह्ये॥४॥ ॐ सोमप्रीत्यर्थे जपे विनियोगाय नमः सर्वाङ्गे॥ इति ऋष्यादिन्यासः॥५॥

करन्यासः- ॐ इमं देवाऽअसपत्न ठ्ठ सुवध्वमित्यङ्गुष्ठाभ्यां नमः॥१॥ ॐ महतेक्षत्रायेति तर्जनीभ्यां नमः॥२॥ ॐ महतेज्ज्यैष्ठ्यायेति मध्यमाभ्यां नमः॥३॥ ॐ महते जानराज्ज्यायेन्द्रियायेत्यनामिकाभ्यां नमः॥४॥ ॐ इमममुष्यपुत्रममुष्यै इति कनिष्ठिकाभ्यां नमः॥५॥ ॐ पुत्रमस्यै व्विशऽएषवो मीराजासोमोऽस्माकं ब्राह्मणाना ठ्ठ राजेति करतलकर पृष्ठाभ्यां नमः॥६॥ इति करन्यासः॥

हृदयादिन्यासः - ॐ इमन्देवाऽअसपत्न ठं सुवध्वमिति हृदयाय नमः॥१॥ ॐ महते क्षत्रायेति शिरसे स्वाहा॥२॥ ॐ महतेज्ज्यैष्ठ्यायेति शिखायै वषट्॥३॥ ॐ महते जानराज्यायेंद्रस्येंद्रियायेति कवचायहुम्॥४॥ॐ इमममुष्यपुत्र ममुष्यै इति नेत्रत्रयाय वौषट्॥५॥ ॐ पुत्रमस्यै व्विशऽएष वोमीराजा सोमोऽस्माकं ब्राह्मणाना ठ्ठ राजा इत्यस्त्राय फट्॥६॥ इति हृदयादिन्यासः।

मन्त्रन्यासः - ॐ इमं देवा इति शिरसि॥१॥ ॐ असपत्नमिति

ललाटे ॥२ ॥ॐ सुवध्वमिति नासिकायाम् ॥३ ॥ ॐ महतेक्षत्रायेति मुखे ॥४ ॥ ॐ महते ज्यैष्ठ्यायेति कंठे ॥५ ॥ ॐ महतेजानराज्यायेंद्रस्येंद्रियायेति हृदये ॥६ ॥ इमममुष्येतिनाभौ ॥७ ॥ ॐ पुत्रममुष्यै इति कट्याम् ॥८ ॥ॐ पुत्रमस्यै इति जंघयोः ॥९ ॥ ॐ विशऽएषवोमीराजासोमो -स्माकंब्राह्मणाना ७ राजेति पादयोः ॥१० ॥

एवं न्यासविधिं कृत्वा ध्यायेत्-

ॐ श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डकरो द्विबाहुः ।
चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः ॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्।

अस्य जपसंख्या एकादशसहस्त्राणि ११००० जपांते पलाशसमित्तिल पायसघृतैर्दशांशहोमः ॥ अन्यत्सर्वं पूर्ववत्।

॥ अथ दानद्रव्याणि ॥

सद्वंशपात्र स्थिततण्डुलांश्च कर्पूरमुक्ताफलशुभ्रवस्त्रम् ।
युगोपयुक्तं वृषभं च रौप्यं चन्द्राय दद्याद्घृतपूर्णकुंभम् ॥

॥ इति चंद्रमंत्रप्रयोगः ॥

॥ चन्द्र तांत्रिक मंत्राः ॥

एकाक्षर मंत्र- सौं

इस मंत्र के ऋषि भार्गव, छन्द पंक्ति,देवता चन्दमा है।

षडंगन्यास- **आं सौं हृदयाय नमः । ईं सौं शिरसे स्वाहा । ऊं सौं शिखायै वषट् । ऐं सौं कवचाय हुम् । औं सौं नेत्रत्रयाय वौषट् । अः सौं अस्त्राय फट् ।**

श्वेताब्जं संस्थं रजतकान्ति-हारविराजितम् ।
नीलकेशं च कुमुदं वामे दक्षकरे वरम् ।
दधानं भावयेद्देवं मृगाङ्कं मणि-मौलिकम् ॥

त्र्यक्षर मंत्र- वं सं वं

इस मंत्र के **एकतत्त्व ऋषि। छन्द श्री। सोम देवता। 'रुं'** बीज तथा **आं** शक्ति है।

इस अमृत मंत्र से जल अभिमंत्रित कर पीने से धनायु की वृद्धि होती है। चन्द्रविम्ब में ध्यान कर अमृत किरणों का आवाहन करना चाहिये।

॥ षडक्षर मंत्रः ॥

ॐ स्वौं सोमाय नमः।

इसके अंगन्यास **स्वां, स्वीं, स्वूं, स्वैं, स्वौं स्वः** से करें।

ध्यानम्–

कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुबिंबाननं
मुक्तादामविभूषितेन वपुषा निर्मूलयन्तं तमः।
हस्ताभ्यां कुमुदं वरं विदधतं नीलालकोद्भासितं
स्वस्यांकस्थमृगोदिताश्रयगुणं सोमं सुधाब्धिं भजे ॥

इस मंत्र का मस्तक में ध्यान करने से अकाल मृत्यु तथा कष्टों से मुक्ति मिलती है। दीर्घायु होकर राज्यैश्वर्य की प्राप्ति होवें। चार लाख जप करने पर अनायास धन प्राप्ति होवें।

पूर्णिमा के दिन निराहार रहकर चन्द्रोदय समय पूर्व पश्चिमाभिमुख तीन आयताकार मण्डल भूमि पर बनायें। उसके पश्चिम में विहित आसन पर बैठकर मंडल में सोमपूजा कर उस पर चाँदी के पात्र में दूध भरकर रखें। उस पात्र का स्पर्श १०८ बार मंत्र जपे।

तदुपरान्त निम्न मंत्र से अर्घ देवें–

ॐ विद्ये विद्यामालिनी चन्द्रिणि चारुमुखि स्वाहा ।

इससे सर्वकामना सिद्ध होवें। विद्या की प्राप्ति होवें।

॥ दशाक्षर मंत्रः ॥

ॐ श्रीं श्रीं श्रूं सों सोमाय नमः।

अन्यच्च– ॐ श्रीं श्रीं श्रूं सः सोमाय नमः।

इसके ऋष्यादि पूर्ववत् है।

॥ अथ चन्द्रमोमंत्रप्रयोग:॥

अथ चन्द्रमसो वक्ष्ये मनुं सर्वसमृद्धिदम्॥

॥ अथ षडक्षरचन्द्रमंत्रप्रयोग:॥

मंत्रो यथा- (शारदातिलके) **'सौं सोमाय नम:'** इति षडक्षरमंत्र:॥

विनियोग:- **अस्य सोममंत्रस्य भृगुर्ऋषि:। पंक्तिश्छंद:। सोमो देवता। सौं बीजम्॥ नम: शक्ति:। मम सर्वेष्टसिद्धये जपे विनियोग:॥**

ऋषिन्यास:-**ॐ भृगुऋषये नम:,शिरसि। पंक्तिश्छंदसे नम:,मुखे। सोमदेवतायै नम:,हृदि। सौं बीजाय नम:, गुह्ये। नम: शक्तये नम:,पादयो:। विनियोगाय नम:। सर्वांगे॥ इति ऋष्यादिन्यास:।**

करन्यास:- **ॐ सां अंगुष्ठाभ्यां नम:। ॐ सीं तर्जनीभ्यां नम:। ॐ सूं मध्यमाभ्यां नम:। ॐ सैं अनामिकाभ्यां नम:। ॐ सौं कनिष्ठिकाभ्यां नम:। ॐ स: करतलकरपृष्ठाभ्यां नम:।**

अङ्गन्यास:-**ॐ सां हृदयाय नम:। ॐ सीं शिरसे स्वाहा॥ ॐ सूं शिखायै वषट्॥ ॐ सैं कवचाय हुम्॥ ॐ सैं नेत्रत्रयाय वौषट्॥ ॐ स्त्र: अस्त्राय फट्॥ इति हृदयादिषडंगन्यास:॥**

ध्यानम्—

कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुबिंबाननं
मुक्तादामविभूषितेन वपुषा निर्मूलयन्तं तम:।
हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं
स्वस्यांकस्थभृगूदिताश्रयगुणं सोमं सुधाब्धिं भजे॥

॥ यंत्रपूजनम्॥

सर्वतोभद्रमंडले सोमतोभद्रमंडले वा मं मंडूकादिसोमांतपीठ देवता: संस्थाप्य **'ॐ मं मंडूकादिसोमांतपीठदेवताभ्यो नम:।'** इति पीठदेवता:संपूज्य तन्मध्ये **''ॐ सौं सोमाय रोहिणीपतये नम:''** इति संपूज्य रौप्यादिनिर्मितं यंत्रमग्न्युतारणपूर्वकं**''सौं सर्वशक्तिकमलासनाय नम: ''** इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारै: संपूज्य देवाज्ञां गृहीत्वावरणपूजां कुर्यात्॥

तत्र क्रमः ॥

सोम यंत्र पर चन्द्रमा की पूजा कर यंत्र के आवरण देवताओं का पूजन करें।

चन्द्र पूजन यंत्रम्

प्रथमावरणम् - (षट्कोणकेसरेषु) अग्निकोणे- **ॐ सां हृदयाय नमः।** निर्ऋतिकोणे- **ॐ सीं शिरसे स्वाहा।** वायव्ये- **ॐ सूं शिखायै वषट्।** ऐशान्ये-**ॐ सैं कवचाय हुम्।** पूज्यपूजकयोर्मध्ये- **ॐ सौं नेत्रत्रयाय वौषट्।** देवतापश्चिमे-**ॐ सः अस्त्राय फट्॥** इति षडंगानि पूजयेत्॥

मूलमन्त्र मंत्र के पुष्पाञ्जलि देवें -

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

इति पठित्वा पुष्पांजलिं च दत्त्वा **पूजिताः तर्पिताः सन्तु** इति वदेत्।

द्वितीयावरणम् - ततोऽष्टदले- पूज्यपूजकयोर्मध्ये प्राचीं तदनुसारेण अन्या दिशःप्रकल्प्य प्राचीक्रमेण वामावर्तेन च। **ॐ रोहिण्यै नमः। रोहिणीश्रीपादुकां पूजयामि तर्पयामि नमः॥** इति सर्वत्र॥ **ॐ कृत्तिकायै नमः। कृत्तिकाश्रीपा०पू०त०॥ ॐ रेवत्त्यै नमः। रेवती श्री पा०पू०त०॥ ॐ**

भरण्यै नमः। भरणीश्रीपा०पू०त० ॥ ॐ रात्र्यै नमः। रात्रि श्रीपा०पू०त० ॥ ॐ आर्द्रायै नमः। आर्द्राश्रीपा०पू०त० ॥ ॐ ज्योत्स्नायै नमः। ज्योत्स्नाश्रीपा०पू०त० ॥ ॐ कलायै नमः। कलाश्रीपा०पू०त० ॥

इति पूजयित्वा पुष्पांजलिं च दद्यात्।

अभिष्टसिद्धिं मे देहि..........द्वितियावरणार्चनम्। इतिद्वितीयावरणम् ॥

तृतीयावरणम् -(ततोऽष्टदलाग्रेषु)- **ॐ आं आदित्याय नमः। आदित्यश्रीपा०पू०त० ॥ ॐ भौं भौमाय नमः। भौमश्रीपा०पू०त० ॥ ॐ बुं बुधाय नमः॥ बुधश्रीपा०पू०त० ॥ ॐ शं शनैश्चराय नमः। शनैश्चरश्रीपा०पू०त० ॥ ॐ बृं बृहस्पतये नमः। बृहस्पतिश्रीपा०पू०त० ॥ ॐ रां राहवे नमः। राहुश्रीपा०पू०त० ॥ ॐ शुं शुक्राय नमः। शुक्रश्रीपा०पू०त० ॥ ॐ कें केतवे नमः। केतु श्री पा०पू०त० ॥**

इत्यष्टौ ग्रहान् पूजयित्वा पुष्पांजलिं च दद्यात्।

अभिष्टसिद्धिं मे देहि..........तृतीयावरणार्चनम्। इति तृतीयावरणम्।

चतुर्थावरणम् - (ततो भूपुरे पूर्वादिक्रमेण)- **ॐ लं इन्द्राय नमः। इन्द्रश्रीपा०पू०त० ॥ ॐ रं अग्नये नमः। अग्निश्रीपा०पू०त० ॥ ॐ मं यमाय नमः। यम श्री पा०पू०त० ॥ ॐ क्षं निर्ऋतये नमः। निर्ऋतिश्रीपा०पू०त० ॥** ॐ वं वरुणाय नमः। वरुण श्रीपा०पू०त० ॥ ॐ यं वायवे नमः। **वायुश्रीपा०पू०त० ॥ ॐ कुं कुबेराय नमः। कुबेरश्रीपा०पू०त० ॥ ॐ हं ईशानाय नमः। ईशानश्रीपा०पू०त० ॥**

इन्द्रेशानयोर्मध्ये- **ॐ आं ब्रह्मणे नमः। ब्रह्मश्रीपा०पू०त० ॥** वरुणनिर्ऋत्योर्मध्ये - **ॐ ह्रीं अनंताय नमः। अनंतश्रीपा०पू०त० ॥**

इति दिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात्।

अभिष्टसिद्धिं मे देहि..........चतुर्थावरणार्चनम्। इति चतुर्थावरणम्।

पञ्चमावरणम् - (तद्बाह्ये)- **ॐ वं वज्रायनमः। ॐ शं शक्तयेनमः। ॐ दं दंडायनमः। ॐ खं खड्गाय नमः। ॐ पं पाशाय नमः। ॐ अं अंकुशाय नमः। ॐ गं गदायै नमः। ॐ त्रिं त्रिशूलाय नमः। ॐ पं पद्माय नमः। ॐ चं चक्रायनमः।**

इत्यस्त्राणि पूजयित्वा पुष्पांजलिं च दद्यात्। इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात्। अस्य पुरश्चरणं षडलक्षजप: षट्सहस्त्रहोम:। तत्तद्दशांशेन तर्पणमार्जन ब्राह्मण भोजनं च कुर्यात्। एवं कृते मंत्र: सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्॥

तथा च-

रसलक्षं जपेन्मंत्रं साधको विजितेन्द्रिय: ।
तत्सहस्त्रं प्रजुहुयात्पायसेन ससर्पिषा ॥१॥
सोमांतं पूजिते पीठे पूजयेद्रोहिणीपतिम् ।
एवं सिद्धमनुर्मंत्री संपदां वसतिर्भवेत् ॥२॥
हृत्पुंडरीकमध्यस्थं ताराहारविभूषणम् ।
तारापतिं स्मरन्मंत्री त्रिसहस्त्रं मनुं जपेत् ॥३॥
राज्यैश्वर्यं दरिद्रोऽपि प्राप्नुयाद्वत्सरांतरे ।
पूर्वोक्तसंख्यं प्रजपेच्छशिनं मूर्ध्नि चिंतयेत् ॥४॥
रोगापमृत्युदु:खानि जित्वा वर्षशतं वसेत् ।
ब्रह्मचर्यरत: शुद्धश्चतुर्लक्षमिदं जपन् ॥५॥
निधानं भूगतं सद्य: प्राप्नुयाद्यत्नवर्जितम् ।
जितेन्द्रियो जपेन्मंत्रं पूर्णिमायां विशेषत: ॥६॥
भवेत्सौभाग्यनिलय: संपदामपरो निधि: ।
घोराञ्ज्वराञ्छिरोरोगानभिचारानुपद्रवान् ॥७॥
विद्विषामपि संघातं नाशयेन्मनुनाऽमुना ।
पौर्णमास्यां निराहारो दद्यादर्घ्यं विधूदये ॥८॥
प्राक्प्रत्यगायतं कुर्याद्भूतले मंडलत्रयम् ।
निषण्ण: पश्चिमे मंत्री मंडलेविहितासने ॥९॥
मध्यस्थे स्थापयेत्पश्चात्पूजाद्रव्याण्यशेषत: ।
अस्मिन्हि मंडले सोममर्चयित्वांबुजान्विते ॥१०॥
राजतं चषकं भद्रं स्थापयेत्पुरत: सुधी: ।
गोदुग्धेन समापूर्य स्पृष्ट्वा तं प्रजपेन्मनुम् ॥११॥

अष्टोत्तरशतं पश्चाद्विद्यामंत्रेण देशिकः ।
दद्यादर्घ्यं शशांकाय सर्वकामार्थसिद्धये ॥१२॥
अनेन विधिना कुर्वन्प्रतिमासमतंद्रितः ।
षणमासाभ्यंतरे सिद्धिं साधकेंद्रः समश्नुते ॥१३॥
श्रियमत्यूर्जितां पुत्रान्सौभाग्यं विपुलं यशः ।
कन्यामिष्टामवाप्नोति कन्यापि वरमीप्सितम् ॥१४॥
बहुना किमिहोक्तेन सर्वं दद्यान्निशापतिः ।

॥ इति षडक्षरचन्द्रमोमंत्रप्रयोगः ॥

॥ अथ विद्या प्राप्ति हेतु प्रयोग ः॥

मंत्रः- विद्ये विद्यामालिनि चंद्रिणी चन्द्रमुखी स्वाहा।

इस मंत्र के जप कर पूर्णिमा को अर्घादि [illegible]न करें।

॥ चन्द्र कवचम् ॥

विनियोगः - ॐ अस्य श्रीचन्द्र कवचस्य गौतम ऋषिः, अनुष्टुप् छन्दः, श्रीचन्द्रो देवता, श्रीचन्द्र प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः- शिरसि गौतम ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीचन्द्र-देवतायै नमः। सर्वाङ्गे श्रीचन्द्र प्रीत्यर्थे पाठे विनियोगाय नमः।

ध्यानम्—

समं चतुर्भुजं वन्दे केयूर-मुकुटोज्ज्वलम् ।
वासुदेवस्य नयनं शंकरस्य च भूषणम् ॥

॥ कवच—पाठ ॥

शशी पातु शिरोदेशं भालं पातु कलानिधिः ।
चक्षुषी चन्द्रमा पातु श्रुती पातु निशापतिः ॥
प्राणं क्षपाकरः पातु मुखं कुमुदबान्धवः ।
पातु कण्ठं च मे सोमः स्कन्धौ जैवातृकस्तथा ॥

करौ सुधाकरः पातु वक्षः पातु निशाकरः ।
हृदयं पातु मे चन्द्रो नाभिं शंकरभूषणः ॥
मध्यं पातु सुरश्रेष्ठः कटिं पातु मधुकरः ।
ऊरू तारापतिः पातु मृगाङ्को जानुनी सदा ॥
अब्धिजः पातु मे जङ्घे प ातु पादौ विधुः सदा ।
सर्वाण्यन्यानि चाङ्गानि पातु चन्द्रोऽखिलं वपुः ॥
एतद्धि कवचं दिव्यं भुक्ति-मुक्ति प्रदायकम् ।
यः पठेच्छृणुयाद् वापि सर्वत्र विजयी भवेत् ॥

॥ इति श्रीब्रह्मयामले तन्त्रे श्री चन्द्रकवचम् ॥

॥ श्रीचन्द्राष्टविंशति नाम स्तोत्रम् ॥

चन्द्रस्य शृणु नामानि शुभदानि महीपते! ।
यानि श्रुत्वा नरो दुःखान्मुच्यते नात्र संशयः ॥

विनियोगः- ॐ अस्य श्रीचन्द्राष्ट विंशति नाम स्तोत्रस्य गौतम ऋषिः, विराट् छन्दः, श्रीचन्द्रो देवता, श्रीचन्द्र प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः- शिरसि श्री गौतम ऋषये नमः। मुखे विराट् छन्दसे नमः। हृदि श्रीचन्द्रोदेवतायै नमः। सर्वाङ्गे श्रीचन्द्र प्रीत्यर्थे पाठे विनियोगाय नमः।

॥ नामावलि स्तोत्रम् ॥

सुधाकरश्च सोमश्च ग्लौरब्जः कुमुदप्रियः ।
लोकप्रियः शुभ्रभानुश्चन्द्रमा रोहिणीपतिः ॥
शशी हिमकरो राजा द्विजराजो निशाकरः ।
आत्रेयः इन्दुः शीतांशुरौषधीशः कलानिधिः ॥
जैवातृको रमाभ्राता क्षीरोदार्णव सम्भवः ।
नक्षत्रनायकः शम्भु शिरश्चूडामणिर्विभुः ॥
तापहर्ता नभोदीपो नामान्येतानि यः पठेत् ।

प्रत्यहं भक्ति संयुक्तस्तस्य पीड़ा विनश्यति ।
तद्दिने च पठेद्यस्तु लभेत् सर्वं समीहितम् ।
ग्रहादीनां च सर्वेषां भवेच्चन्द्रबलं सदा ॥

॥ इति श्रीब्रह्मयामले चन्द्राष्ट विंशति नाम स्तोत्रम् ॥

॥ अथ चन्द्रमसस्तोत्रम् ॥

ॐ श्वेताम्बरःश्वेतवपुः किरीटीश्वेतद्युतिर्दण्डधरो द्विबाहुः ।
चन्द्रोऽमृतात्मावरदः शशांकः श्रेयांसि मह्यं प्रददातुदेवः ॥१ ॥
दधिशंखतुषाराभं क्षीरोदार्णवसंभवम् ।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् ॥२ ॥
क्षीरसिन्धुसमुत्पन्नो रोहिणीसहितः प्रभुः ।
हरस्य मुकुटावास बालचन्द्र नमोऽस्तु ते ॥४ ॥
सुधामया यत्किरणाः पोषयंत्योषधीवनम् ।
सर्वान्नरसहेतुं तं नमामि सिन्धुनन्दनम् ॥५ ॥
राकेशं तारकेशं च रोहिणीप्रियसुन्दरम् ।
ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहुः ॥६ ॥

॥ इति चन्द्रमसस्तोत्रं संपूर्णम् ॥

॥ चन्द्रशान्ति प्रयोगः ॥

रोग लक्षण -

नेत्ररोग, हिस्टीरिया, पागलपन, खाँसी-जुकाम, उदर रोग, दमा, ब्रोंकाइटिस, गर्भाशय व प्रजनन अंगों के रोग, अतिसार, पेचिश आदि रोगों में एवं चन्द्रदोष में इस यंत्र का प्रयोग करें।

उपचार-

१. उक्त चन्द्रयंत्र सोमवार या रोहिणी या हस्त या श्रवण नक्षत्र के दिन अष्टगंध से अनार की कलम से भोजपत्र पर लिखकर चाँदी के ताबीज में प्राणप्रतिष्ठा,

पूजन कर धारण करें।

७	२	९
८	६	४
३	१०	५

२. क्षीरणी (खिरनी) की जड़ सोमवार को सफेद डोरे में चन्द्र मंत्र से अभिमंत्रित करके बाँधने से चन्द्र बाधा की शान्ति होती है।

३. पञ्चगव्य, चाँदी, मोती, शंख, सीप और कुमुद को जल में डालकर स्नान करने से चन्द्र बाधा की शान्ति होती है।

४. बाँस के पत्र में भरा हुआ चावल, कपूर, मोती, चाँदी, श्वेत वस्त्र, शङ्ख, दही, मिश्री, श्वेत पुष्प, श्वेत चन्दन, श्वेत गाय का घी, बछड़े सहित श्वेत गाय देने से चन्द्र बाधा की शान्ति होती है।

ध्यान – नित्य हाथ जोड़कर चन्द्रमा का '**ध्यान**' इस प्रकार करें–

श्वेताम्बरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्ड-धरो द्वि-बाहुः ।
चन्द्रोऽमृतात्मा वरदः किरीटी, मयि प्रसादं विदधातु देवः ॥

मन्त्र– निम्न मन्त्रों में से किसी एक मन्त्र का नित्य जप करे। यथा–

१ **ॐ सों सोमाय नमः।**

२ **ॐ ऐं क्लीं सोमाय नमः।**

३ **ॐ श्रां श्रीं श्रौं सः चन्द्राय नमः।**

४ **ॐ क्षीरपुत्राय विद्महे अमृततत्वाय धीमहि तन्नो चन्द्रः प्रचोदयात्।**

(प्रत्येक मन्त्र की जप संख्या ४४ हजार है)

॥ श्रीसोम (चन्द्र) अष्टोत्तरशत–नामावली ॥

ॐ सौं श्रीमते नमः।
ॐ सौं शशधराय नमः।
ॐ सौं चन्द्राय नमः।
ॐ सौं ताराधीशाय नमः।
ॐ सौं निशाकराय नमः।
ॐ सौं सुधानिधये नमः।
ॐ सौं सदाऽऽराध्याय नमः।
ॐ सौं सत्पतये नमः।

ॐ सौं साधुपूजिताय नमः।
ॐ सौं जितेन्द्रियाय नमः।
ॐ सौं जयोद्योगाय नमः।
ॐ सौं ज्योतिश्चक्रप्रवर्तकाय नमः।
ॐ सौं विकर्तनानुजाय नमः।
ॐ सौं वीराय नमः।
ॐ सौं विश्वेशाय नमः।
ॐ सौं विदुषां पतये नमः।
ॐ सौं दोषाकराय नमः।
ॐ सौं दुष्टदूराय नमः।
ॐ सौं पुष्टिमते नमः।
ॐ सौं शिष्टपालकाय नमः।
ॐ सौं अष्टमूर्तिप्रियाय नमः।
ॐ सौं अनन्ताय नमः।
ॐ सौं कष्टदारुकुठाराय नमः।
ॐ सौं स्वप्रकाशाय नमः।
ॐ सौं प्रकाशत्मने नमः।
ॐ सौं द्यु-चराय नमः।
ॐ सौं देवभोजनाय नमः।
ॐ सौं कलाधराय नमः।
ॐ सौं कालहेतवे नमः।
ॐ सौं कामकृते नमः।
ॐ सौं कामदायकाय नमः।
ॐ सौं मृत्युसंहारकाय नमः।
ॐ सौं अमर्त्याय नमः।
ॐ सौं नित्यानुष्ठानदाय नमः।
ॐ सौं क्षपाकाराय नमः।
ॐ सौं क्षीणपापाय नमः।
ॐ सौं क्षयवृद्धिसमन्विताय नमः।
ॐ सौं जैवातृकाय नमः।
ॐ सौं शुचये नमः।
ॐ सौं शुभ्राय नमः।
ॐ सौं जयिने नमः।
ॐ सौं जयफलप्रदाय नमः।
ॐ सौं सुधामयाय नमः।
ॐ सौं सुरस्वामिने नमः।
ॐ सौं भुक्तिदाय नमः।
ॐ सौं भद्राय नमः।
ॐ सौं भक्तानामिष्टदायकाय नमः।
ॐ सौं भक्तदारिद्रभञ्जनाय नमः।
ॐ सौं सामगानप्रियाय नमः।
ॐ सौं सर्वरक्षकाय नमः।
ॐ सौं सागरोद्भवाय नमः।
ॐ सौं भयान्तकृते नमः।
ॐ सौं भवितगम्याय नमः।
ॐ सौं भवबन्धविमोचकाय नमः।
ॐ सौं जगत्प्रकाशकरणाय नमः।
ॐ सौं जगदानन्दकारणाय नमः।
ॐ सौं निःसपत्नाय नमः।
ॐ सौं निराहाराय नमः।
ॐ सौं निर्विकाराय नमः।

ॐ सौं निरामयाय नमः।

ॐ सौं भूछायाऽऽच्छादिताय नमः।

ॐ सौं भव्याय नमः।

ॐ सौं भुवनप्रतिपालकाय नमः।

ॐ सौं सकलार्तिहराय नमः।

ॐ सौं सौम्यजनकाय नमः।

ॐ सौं साधुवन्दिताय नमः।

ॐ सौं सर्वागमज्ञाय नमः।

ॐ सौं सर्वज्ञाय नमः।

ॐ सौं सनकादिमुनिस्तुताय नमः।

ॐ सौं सितछत्रध्वजोपेताय नमः।

ॐ सौं सिताङ्गाय नमः।

ॐ सौं श्वेतमाल्याम्बरधराय नमः।

ॐ सौं सितभूषणाय नमः।

ॐ सौं श्वेतगन्धानुलेपनाय नमः।

ॐ सौं दशाश्वरथसंरूढाय नमः।

ॐ सौं दण्डपाणये नमः।

ॐ सौं धनुर्धराय नमः।

ॐ सौं कुन्दपुष्पोज्ज्वला
काराय नमः।

ॐ सौं नयनाब्जसमुद्भवाय नमः।

ॐ सौं आत्रेयगोत्रजाय नमः।

ॐ सौं अत्यन्तविनयाय नमः।

ॐ सौं प्रियदायकाय नमः।

ॐ सौं करुणारससम्पूर्णाय नमः।

ॐ सौं कर्कटकप्रभवे नमः।

ॐ सौं चतुरस्त्रसमारूढाय नमः।

ॐ सौं अव्ययाय नमः।

ॐ सौं चतुराय नमः।

ॐ सौं दिव्यवाहनाय नमः।

ॐ सौं विवस्वन्मण्डलाज्ञेयवासाय
नमः।

ॐ सौं वसुसमृद्धिदाय नमः।

ॐ सौं महेश्वरप्रियाय नमः।

ॐ सौं दान्ताय नमः।

ॐ सौं मेरुगोत्रप्रदक्षिणाय नमः।

ॐ सौं ग्रहमण्डल
मध्यस्थाय नमः।

ॐ सौं ग्रसितार्काय नमः।

ॐ सौं द्विजराजाय नमः।

ॐ सौं द्युतितकाय नमः।

ॐ सौं द्विभुजाय नमः।

ॐ सौं द्विजपूजिताय नमः।

ॐ सौं औदुम्बरनगावासाय नमः।

ॐ सौं उदाराय नमः।

ॐ सौं रोहिणीपतये नमः।

ॐ सौं नित्योदयाय नमः।

ॐ सौं मुनिस्तुताय नमः।

ॐ सौं नित्यानन्दफलप्रदाय नमः।

ॐ सौं सकलाह्लादनकराय नमः।

ॐ सौं पलाशसमिधप्रियाय नमः।

ॐ सौं चन्द्रमसे नमः।

॥ श्री भौमतन्त्रम् ॥

॥ अथ भौमवैदिकमंत्रप्रयोग: ॥

मंत्र: - ॐ अग्निर्म्मूर्द्धा दिव: ककुत्पति:-पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ इति मंत्र।

विनियोग:- ॐ अग्निर्मूर्द्धेति मंत्रस्य विरूपाक्ष ऋषि:। गायत्री छंद:। भौमो देवता। ककुद्बीजम्। भौमप्रीत्यर्थे जपे विनियोग: ॥

ऋष्यादि न्यास:- ॐ विरूपाक्ष ऋषये नम: शिरसि ॥१॥ ॐ गायत्री छंदसे नम: मुखे ॥२॥ ॐ भौमदेवतायै नम: हृदि ॥३॥ ॐ ककुद्बीजाय नम: गुह्ये ॥४॥ ॐ भौमप्रीतये जपे विनियोगाय नम: सर्वांगे ॥५॥ इति ऋष्यादिन्यास:।

करन्यास:- ॐ अग्निर्मूर्द्धेत्यंगुष्ठाभ्यां नम: ॥१॥ ॐ दिव: ककुदिति तर्जनीभ्यां नम: ॥२॥ पति: पृथिव्याऽअयमिति मध्यमाभ्यां नम: ॥३॥ ॐ अपामित्य अनामिकाभ्यां नम: ॥४॥ ॐ रेताꣳसीति कनिष्ठिकाभ्यां नम:। ॐ जिन्वतीति करतलकरपृष्ठाभ्यां नम:। इति करन्यास:।

हृदयादिन्यास:- अग्निर्मूर्द्धेति हृदयाय नम:। ॐ दिव: ककुदिति शिरसे स्वाहा ॥ ॐ पति: पृथिव्याऽअयमिति शिखायै वषट्। ॐ अपां कवचाय हुं। ॐ रेताꣳसीति नेत्रत्रयाय वौषट् ॥५॥ ॐ जिन्वतीत्यस्त्राय फट् ॥६॥ इति हृदयादिन्यास:।

मन्त्रन्यास:- ॐ अग्निरिति शिरसि ॥१॥ ॐ मूर्धा ललाटे ॥२॥ ॐ दिवो मुखे ॥३॥ ॐ ककुदितिहृदये ॥४॥ ॐ पतिर्नाभौ ॥५॥ ॐ पृथिव्या: कट्याम् ॥६॥ ॐ अयमूर्वो: ॥७॥ ॐ अपां जानुनो: ॥८॥ ॐ रेताꣳसि गुल्फयो: ॥९॥ ॐ जिन्वति पादयो: ॥१०॥

इति न्यासविधिं कृत्वा ध्यायेत्-

ॐ रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगतो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

भौमे दशसहस्त्राणीति जपसंख्या १०००० । जपांतेत खदिरसमित्तिल पायसघृतैर्दशांशहोमः ॥ अन्यत्सर्वं पूर्ववत् ।

अथ दानद्रव्याणि-

प्रवालगोधूममसुरिकाश्च वृषोरुणाश्चापि गुडः सुवर्णम् ।
आरक्तवस्त्रं करवीरपुष्पं ताम्रं च भौमाय वदंति दानम् ॥१॥

॥ इति भौममंत्रप्रयोगः ॥

॥ भौम तांत्रिक मंत्राः॥

१ षडक्षर मंत्र- ॐ हां हंसः खः खः ।

इसके ऋपि विरूप, छन्द गायत्री, एवं धरात्मज देवता है।

जपाभं शिवस्वेदजं हस्तेपद्म गदा शूल शक्तिर्वरं धारयन्तम् ।
अवन्तीसमुत्थं सु-मेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे ॥

(मेरुतंत्रे)-

जपाकुसुम-सङ्काशं शक्तिशूल गदाधरम् ।
मेषस्थं रक्तवस्त्रं तं वन्देऽहं धरात्मजम् ॥

२ अष्टाक्षर मंत्र- ॐ अङ्गारकाय नमः ।

इसके ब्रह्मा ऋषि, छन्द गायत्री, देवता भूमिपुत्र है।

आं इं ऊं ऐं औं अः से एक-एक षडङ्गन्यास करें।

नमाम्यङ्गारकं रक्तं रक्ताम्बर विभूषणम् ।
जानुस्थ वामहस्ताढ्यं भाजनेतर-पाणिकम् ॥

नवाक्षर मंत्र- ॐ अङ्गारकाय नमः ।

इसके ऋष्यादि न्यास पूर्ववत् है। बीज-अं तथा शक्ति आपः है।

दशाक्षर मंत्र- ॐ क्रां क्रीं क्रौं सः भौमाय नमः !

अन्यच्च- ॐ श्रीं क्लीं मनुं भौमाय नमः।

इस मंत्र के विरूपाक्ष ऋषि। छन्द गायत्री। देवता मंगल। बीज- ह्रीं। शक्ति-श्रीं। कीलक क्लीं है।

षडंगन्यासः- ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से हृदयादि न्यास करें।

वर्णन्यासः- ॐ ब्रह्मरन्ध्रे। श्रीं दक्षकर्णे। क्लीं वामकर्णे। मं दक्षनेत्रे। नुं वामनेत्रे। भौं-दक्षनासायाम्। मां -वामनासायाम्। यं मुखे। नं लिङ्गे। मः नमः गुदे।

देवानां स्वाङ्गे न्यासः- मंगल के २१ नामो से अपने अंगो में प्रत्येक नाम से न्यास करें।

यथा- ॐ मंगलाय नमः शिखायां। ॐ भूमिपुत्राय नमः मूर्ध्नि।

१. शिखा। २. मूर्ध्नि। ३. मस्तक। ४. दोनों नेत्र। ५. दोनों कर्ण। ६. दोनों नासा। ७. मुख। ८. चिबुक। ९. कण्ठ। १०. दोनों स्कंध। ११. दोनों बाहु। १२. दोनों हाथ। १३. उदर। १४. नाभि। १५. कटि। १६. लिंग। १७. स्फिच। १८. दोनों जानु। १९. दोनों जंघा। २०. पादयोः। २१. पार्श्वे।

ग्रह नामानि-

मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः।
स्थिरासनो महाकायः सर्वकर्मावरोधकः॥
लोहितो लोहितांगश्च सामगानां कृपाकरः।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः॥
ॐ अंगारको यमश्चैव सर्वरोगापहारकः।
वृष्टिकर्ताऽपहर्ता च सर्वकामफलप्रदः॥

ध्यानम्-

ध्याये भौमं रक्तवर्णं रक्तमाल्यांशुकावृतं।
कण्ठे कमलमालाढ्यं करयो शक्ति शूलके॥
भगवान् देवदेवेश! एह्येहि महाप्रभो।
ऐश्वर्यं वशमायातु भूतलेषु समाश्रिताम्।

मङ्गलानां मङ्गलं च सर्वकामा फलप्रदम् ॥

एकादशाक्षर मंत्र- ॐ ह्रीं श्रीं म्लां मं मङ्गलाय नमः।

ऋष्यादि दशाक्षर के ही है।

॥ अथ धनपुत्रादिप्रद मंगलमंत्र विधानम् ॥

मंत्रो यथा- "ॐ हां हंसः खं खः" (मंत्रमहोदधौ) इति षडक्षरो मन्त्रः।

अस्य विधानम् - मार्गशीर्षे वैशाखे वा शुक्लपक्षे चंद्रताराादिबलान्विते भौमवासरे व्रतं प्रगृह्य वक्ष्यमाणविधिना संवत्सर पर्यन्तं कार्यम्॥

तद्यथा-मंगलवारे अरुणोदयवेलायामुत्थाय शौचविधिं विधाय अपामार्गकाष्ठेन मौनधारणपूर्वकं दंतधावनं कृत्वा नद्यादौ गृहे वा यथाविधि स्नात्वा रक्तवाससी परिधाय नित्यकर्म समाप्य शिवालये स्वगृहे वा रक्तगोमय लिप्तमंडले स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य दक्षिणपार्श्वे रक्तचंदनरक्तपुष्पादीनि संपाद्य सपवित्रकर आचम्य मूलेन प्राणानायम्य

देशकालौ स्मृत्वा मम जन्मराशेः सकाशान्नामराशेः सकाशाज्जन्मलग्ना द्वर्षलग्नाद्वा गोचरात्-चतुर्थाष्टमादित्याधनिष्ट स्थानस्थित भौमसर्वानिष्ट फलनिवृत्ति पूर्वक तृतीयैकादशशुभ स्थान स्थित वदुत्तमफलावाप्त्यर्थम् आयुरारोग्य वृद्ध्यर्थमृणच्छेदार्थममुकरोगविनाशार्थ वा पुत्रप्राप्त्यर्थ श्रीमंगलदेवताप्रसन्नतार्थ भौमव्रतंकरिष्ये॥

तदंगत्वेन न्यास ध्यानपूजार्घ्य दानादि च करिष्ये। इति संकल्प्य कर्ता स्वदेहे न्यासान् कुर्यात्॥

विनियोगः- **ॐ अस्य मंत्रस्य विरूपाक्ष ऋषिः। गायत्री छंदः। धरात्मजो भौमो देवता। हां बीजम्। हंसः शक्तिः। सर्वेष्ट सिद्धये जपे विनियोगः।**

ऋष्यादि न्यासः- **ॐ विरूपाक्षऋषये नमः, शिरसि** ॥१॥ **गायत्रीछंद से नमः, मुखे** ॥२॥ **धरात्मजभौमदेवतायै नमः, हृदि** ॥३॥ **हां बीजाय नमः, गुह्ये** ॥४॥ **हंसः शक्तये नमः, पादयोः**॥५॥ **विनियोगाय नमः सर्वाङ्गे** ॥६॥ इति ऋष्यादिन्यासः॥

करन्यासः- **ॐ भौमाय अंगुष्ठाभ्यां नमः** ॥१॥ **ॐ हां भौमाय तर्जनीभ्यां**

नमः ॥२॥ ॐ हं भौमाय मध्यमाभ्यां नमः ॥३॥ ॐ सः भौमाय अनामिकाभ्यां नमः ॥४॥ ॐ खं भौमाय कनिष्ठिकाभ्यां नमः ॥५॥ ॐ खः भौमाय करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः।

हृदयादि षडंगन्यास- ॐ भौमाय हृदयाय नमः ॥१॥ ॐ हां भौमाय शिरसे स्वाहा ॥२॥ ॐ हं भौमाय शिखायै वषट् ॥३॥ ॐ सः भौमाय कवचाय हुम् ॥४॥ ॐ खं भौमाय नेत्रत्रयाय वौषट् ॥५॥ ॐ खः भौमाय अस्त्राय फट् ॥६॥ इति हृदयादि षडंगन्यासः।

देहन्यास - ॐ मंगलाय नमः अंघ्रोः ॥१॥ ॐ भूमिपुत्राय नमः जानुनोः ॥२॥ ॐ ऋणहर्त्रे नमः ऊर्वोः ॥३॥ ॐ धनप्रदाय नमः कट्याम् ॥४॥ ॐ स्थिरासनाय नमः गुह्ये ॥५॥ ॐ महाकायाय नमः उरसि ॥६॥ ॐ सर्वकामविरोधकाय नमः वामबाहौ ॥७॥ ॐ लोहिताय नमः दक्षिणबाहौ ॥८॥ ॐ लोहिताक्षाय नमः गले ॥९॥ ॐ सामगानां कृपाकराय नमः वदने ॥१०॥ ॐ धरात्मजाय नमः अंसयोः ॥११॥ ॐ कुजाय नमः नेत्रयोः ॥१२॥ ॐ भौमाय नमः ललाटे ॥१३॥ ॐ भूतिदाय नमः भ्रुवोः ॥१४॥ ॐ भूमिनंदनाय नमः मस्तके ॥१५॥ ॐ अंगारकाय नमः शिखायाम् ॥१६॥ ॐ यमाय नमः सर्वांगे ॥१७॥ ॐ सर्वरोगप्रहारिणे नमः मूर्धादिहस्तांतम् ॥१८॥ ॐ वृष्टिकर्त्रे नमः मूर्धादिपादांतम् ॥१९॥ ॐ वृष्टिहर्त्रे नमः पादादिमूर्धान्तम् ॥२०॥ ॐ सर्वरोगापहारकाय नमः दशदिक्षु च ॥२१॥ ॐ अंगारकाय नमः नाभौ ॥२२॥ ॐ वक्राय नमः वक्षसि ॥२३॥ ॐ भूमि नंदनाय नमः मूर्ध्नि ॥२४॥ इति न्यासं कृत्वा ध्यायेत् ।

अथ ध्यानम्-

जपाभं शिवस्वेदजं हस्तपद्मैर्गदाशूलशक्ती करे धारयंतम् ।
अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे ॥

इति ध्यात्वा मानसोपचारैः संपूज्य ताम्रार्घ्यपद्धतिमार्गेण संस्थाप्य पीठपूजादिकं कुर्यात् ॥

तद्यथा - पीठादौ रचिते सर्वतोभद्रमंडले लिंगतोभद्रमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य "ॐ मं मंडूकादिपरतत्त्वांत-

पीठदेवताभ्यो नमः'' इति संपूज्य नव पीठशक्तीः पूजयेत्॥

तद्यथा- पूर्वादिक्रमेण- **ॐ वामायै नमः ॥१ ॥ ॐ ज्येष्ठायै नमः ॥२ ॥ ॐ रौद्र्यै नमः ॥३ ॥ ॐ काल्यै नमः ॥४ ॥ ॐ कलविकरण्यै नमः ॥५ ॥ ॐ बलविकरण्यै नमः ॥६ ॥ ॐ बलप्रमथिन्यै नमः ॥७ ॥ ॐ सर्वभूतदमन्यै नमः ॥८ ॥** मध्ये- **ॐ मनोन्मन्यै नमः ॥ १ ॥** इति पूजयेत्।

॥ अथ भौम यंत्र पूजनम्॥

ततः स्वर्णपात्रे ताम्रपात्रे वा एकविंशतित्रिकोणात्मकं यंत्रं रक्तचंदननिर्मितां प्रतिमां वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छ वस्त्रेण संशोष्यं।

''**ॐ नमो भगवते सकल गुणात्म शक्ति युक्ताय भुमिपुत्राय योगपीठात्मने नमः**''। इति मंत्रेण पुष्पाद्यासानं दत्वा पीठमध्ये संस्थाप्य प्राणस्थापनं कृत्वा पुनर्ध्यात्वा मूलेन मूर्ति प्रकल्प्य ''**ॐ अंगारकाय विद्महे शक्तिहस्ताय धीमहि। तन्नो भौमः प्रचोदयात्**'' इति भौमगायत्र्या आवाहना

भौम पूजन यंत्रम्

दिरक्तगंधाक्षत रक्तपुष्पां तैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥

प्रथमावरणम् - तद्यथा- **यंत्रे अग्न्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ ॐ भौमाय हृदयाय नमः। हृदयश्रीपादुकां पूजयामि तर्पयामि नमः** इति सर्वत्र ॥१ ॥

ॐ हाँ भौमाय शिरसे स्वाहा। शिरः श्रीपा०पू०त० ॥ २ ॥ ॐ हं भौमाय शिखायै वषट्। शिखाश्रीपा०पू०त० ॥ ३ ॥ ॐ सः भौमाय कवचाय हुम्। कवच श्रीपा०पू०त० ॥ ४ ॥ ॐ खं भौमाय नेत्रत्रयाय वौषट्। नेत्रत्रय श्रीपा०पू०त० ॥ ५ ॥ ॐ खं भौमाय अस्त्राय फट्। अस्त्रश्रीपा०पू०त० ॥ ६ ॥ इति षडंगानि पूजयेत्।

ततः पुष्पांजलिमादाय मूलमुच्चार्य -

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति पठित्वा पुष्पांजलिं च दत्त्वा **पूजितास्तर्पिताः संतु** इति वदेत् ॥ इति प्रथमावरणम् ॥१ ॥

द्वितीयावरणम् - ७ से २७ संख्या तक यंत्र में अर्चन करें।

ततो यंत्रे पूज्यपूजकयोरंतराले प्राचीं तदनुसारेणान्या दिशः प्रकल्प्य प्राचीक्रमेण दक्षिणावर्तेन च **ॐ मंगलाय नमः। मंगल श्रीपा० पू० त० ॥१ ॥ ॐ भूमिपुत्राय नमः। भूमिपुत्र श्रीपा०पू०त० ॥ २ ॥ ॐ ऋणहर्त्रे नमः। ऋणहर्तृश्रीपा०पू०त० ॥ ३ ॥ ॐ धनप्रदाय नमः। धनप्रद श्रीपा०पू०त० ॥ ४ ॥ ॐ स्थिरासनाय नमः। स्थिरासन श्रीपा०पू०त० ॥ ५ ॥ ॐ महाकायाय नमः। महाकाय श्रीपा०पू०त० ॥ ६ ॥ ॐ सर्वकर्मावरोधकाय नमः। सर्वकर्मावरोधक श्रीपा०पू०त० ॥ ७ ॥ ॐ लोहिताय नमः। लोहित श्रीपा०पू०त० ॥ ८ ॥ ॐ लोहिताक्षाय नमः। लोहिताक्ष श्रीपा०पू०त० ॥** ९ ॥ ॐ सामगानां कृपाकराय नमः। सामगानां कृपाकर श्रीपा०पू०त० ॥ १० ॥ ॐ धरात्मजायनमः। धरात्मज श्रीपा०पू०त० ॥ ११ ॥ ॐ कुजाय नमः। कुज श्रीपा०पू०त० ॥ १२ ॥ ॐ भौमाय नमः। भौम श्रीपा०पू०त० ॥ १३ ॥ ॐ भूतिदाय नमः। भूतिद श्रीपा०पू०त० ॥ १४ ॥ ॐ भूमिनन्दनाय नमः। भूमिनंदन श्रीपा०पू०त० ॥ १५ ॥ ॐ अंगारकाय

नमः। अंगारक श्रीपा०पू०त० ॥१६॥ ॐ यमाय नमः। यम श्रीपा०पू० त० ॥१७॥ ॐ सर्वरोगप्रहारिणे नमः। सर्वरोग प्रहारिश्रीपा०पू० त० ॥१८॥ ॐ सर्ववृष्टिकर्त्रे नमः। सर्ववृष्टिकर्तृ श्रीपा० ॥१९॥ ॐ वृष्टिहर्त्रे नमः। वृष्टिहर्तृ श्रीपा०पू०त० ॥२०॥ ॐ सर्वरोगापहारकाय नमः। सर्वरोगा - पहारक श्रीपा०पू०त० ॥२१॥

ॐ इत्येकविंशतिनामभिः प्रत्येककोष्ठे पूजयित्वा पुष्पांजलिं च दद्यात्॥ इति द्वितीयावरणम् ॥२॥

तृतीयावरणम् - २८ से ३५ संख्यानुसार यंत्र में पूजन करें।

ततो यंत्रे पूर्वाद्यष्टसु दिक्षु - **ॐ ब्राह्म्यै नमः। ब्राह्मी श्रीपा०पू०त० ॥१॥ ॐ माहेश्वर्य्यै नमः। माहेश्वरीश्रीपा०पू०त० ॥२॥ ॐ कौमार्य्यै नमः। कौमारीश्रीपादुकां०पू०त० ॥३॥ ॐ वैष्णव्यै नमः। वैष्णवी श्रीपा०पू०त० ॥४॥ ॐ वाराह्यै नमः। वाराहीश्रीपा०पू०त० ॥५॥ ॐ इन्द्राण्यै नमः। इन्द्राणीश्रीपा०पू०त० ॥६॥ ॐ चामुंडायै नमः। चामुंडा श्रीपा०पू०त० ॥७॥ ॐ महालक्ष्म्यै नमः। महालक्ष्मीश्रीपा०पू०त० ॥८॥**

ॐ इत्यष्टौ मातृकाः संपूज्य पुष्पांजलिं च दद्यात्।

अभिष्ट सिद्धिं मे देहि...........तृतीयावरणार्चनम्। इति तृतीयावरणम् ॥३॥

चतुर्थावरणम्- ततो यंत्रे पूर्वादिक्रमेण- **ॐ लं इंद्राय नमः ॥१॥ ॐ रं अग्नये नमः। ॥२॥ ॐ मं यमाय नमः। ॥३॥ ॐ क्षं निर्ऋतये नमः। ॥४॥ ॐ वं वरुणाय नमः। ॥५॥ ॐ यं वायवे नमः। ॥६॥ ॐ कुं कुबेरायनमः। ॥७॥ ॐ हं ईशानाय नमः। ॥८॥** ॐ पूर्वेशानयोर्मध्ये- **ॐ आं ब्रह्मणे नमः ॥९॥ वरुणनिर्ऋत्योर्मध्ये ॐ ह्रीं अनंताय नमः। ॥१०॥**

इति दशदिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात्॥

अभिष्ट सिद्धिं मे देहि..........चतुर्थावरणार्चनम्। इति चतुर्थावरणम् ॥४॥

पंचमावरणम्- ततः पूर्वादिक्रमेण इन्द्रादिसमीषे **ॐ वं वज्राय नमः। ॥१॥ ॐ शं शक्तये नमः। ॥२॥ ॐ दं दंडाय नमः ॥३॥ ॐ खं**

खड्गाय नमः ॥४॥ ॐ पं पाशाय नमः ॥५॥ ॐ अं अंकुशाय नमः ॥६॥ ॐ गं गदायै नमः ॥७॥ ॐ त्रिं त्रिशूलाय नमः ॥८॥ ॐ पं पद्माय नमः ॥९॥ ॐ चं चक्राय नमः ॥१०॥

इत्यस्त्राणि संपूज्य पुष्पांजलिं च दद्यात्॥

अभिष्ट सिद्धिं मे देहि..........पंचमावरणार्चनम्। इति पंचमावरणम् ॥५॥

इत्यावरणपूजां कृत्वा धूपदीप गोधूमान्न नैवेद्य तांबूल दक्षिणा नीराजनादिभिः संपूज्य अर्घ्यं दद्यात्।

तद्यथा-जलपूर्णे ताम्रपात्रे गंधपुष्पाक्षत् फलानि च निक्षिप्य जानुभ्यामवनीं गत्वा-

ॐ भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः ।
सुतार्थिनी प्रपन्ना त्वां गृहाणार्घ्यं नमोऽस्तु ते ॥१॥
रक्तप्रवालसंकाश जपाकुसुमसन्निभ ।
महीसुत महाबाहो गृहाणार्घ्यं नमोऽस्तु ते ॥२॥

॥ अथ मंगलनामावलिस्तोत्रम् ॥

विनियोगः- ॐ अस्य श्रीभौमस्तोत्रस्य गर्गऋषिः। मंगलो देवता। त्रिष्टुप् छन्दः। ऋणापहरणे जपे विनियोगः।

अथ ध्यानम्-

रक्ताम्बरो रक्तवपुः किरीटी चतुर्मुखोमेघगदो गदाधृक् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ॥१॥
ॐ मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरात्मजो महाकायः सर्वकामार्थसाधकः ॥२॥
लोहितो लोहितांगश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥३॥
अंगारको यमश्चैव सर्वरोगापहारकः ।
वृष्टिकर्ताऽपहर्ता च सर्वकामफलप्रदः ॥४॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयम् ॥५॥

अंगारको ऽतिवलवानपि यो ग्रहाणां
स्वेदोद्भवस्त्रिनयनस्य पिनाकपाणेः ।
आरक्तचन्दनसुशीतलवारिणा योऽप्यभ्यर्चितोऽथ
विपुलां प्रददाति सिद्धिम् ॥६ ॥

भो भो धरात्मज इति प्रथितः पृथिव्यां
दुःखापहो दुरितशोकसमस्तहर्ता ।
नृणामृणं हरति तान्धनिनः प्रकुर्याद्यः
पूजितः सकलमंगलवासरेषु ॥७ ॥

एकेन हस्तेन गदां विभर्ति त्रिशूलमन्येन ऋजुक्रमेण ।
शक्तिं सदान्येन वरं ददाति चतुर्भुजो मंगलमादधातु ॥८ ॥

यो मंगलो मंगलमाद-धाति मध्य ग्रहो
यच्छति वाञ्छितार्थम् ।
धर्मार्थ कामादिसुखं प्रभुत्वं कलत्रपुत्रैर्न कदा वियोगः ॥९ ॥

कनकमयशरीरस्तेजसा दुर्निरीक्ष्यो
हुतवहसमकांतिर्मालवे लब्धजन्मा ।
अवनिजतनयेषु श्रूयते यः पुराणो दिशतु
मम विभूतिं भूमिजः सप्रभावः ॥१० ॥

॥ इति वसिष्ठसंहितायां भौमस्तोत्रं समाप्तम् ॥

॥ मंगल कवचम् ॥

मंगल देवता सभी कष्टों का निवारण करने वाले एवं सर्व-सिद्धि दायक है। यहाँ पर मंगल कवच, विनियोग, एवं ध्यान दिये जा रहे है।

विनियोगः- **ॐ अस्य श्री अंगारक कवच स्तोत्र मंत्रस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, अंगारको देवता, भौमप्रीत्यर्थे जपे विनियोगः।**

ध्यानम्-

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद् वरदः प्रशान्तः ॥

॥ कवचम् ॥

अंगारकः शिरोरक्षेन्मुखं वै धरणीसुतः ।
श्रवौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः ॥
नासां शक्तिधरः पातु मुखं मे रक्तलोचनः ।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ॥
वक्षः पातु वरांगश्च हृदयं पातु लोहितः ।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ॥
जानुजंघे कुजः पातु पादौ भक्तप्रियः सदा ।
सर्वाण्यन्यानि चांगानि रक्षेन्मे मेषवांहनः ॥
य इदं कवचं दिव्यं सर्वशत्रुनिवारणम् ।
भूत प्रेत पिशाचानां नाशनं सर्वसिद्धिदम् ॥
सर्वरोगहरं चैव सर्वसम्पत्प्रदं शुभम् ।
भुक्ति-मुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ॥
रोगबंध-विमोक्षं च सत्यमेतन्न संशयः ॥

मंगल का यह दिव्य कवच समस्त शत्रुओं को नष्ट करता है एवं ऋण-बाधा, चोट-दुर्घटना, से रक्षा करता है यह कवच भोग व मोक्ष देने वाला है। यह भूत प्रेत पिशाचादि व सभी रोगो का नाश करने वाला एवं कारागार से छुडाने वाला है।

॥ मंगल शान्ति प्रयोग ॥

रोग लक्षण-

मंगल ग्रह के प्रभाव से सभी प्रकार के तीव्र ज्वर, सूजन आदि शिकायतें चेचक, छाले, घाव, बवासीर, भगन्दर, फोडे-फुन्सी गठिया, कण्ठमाला, घेघा, गर्भपात आदि लक्षण एवं दुर्घटना योग होते है।

उपचार-

१. मंगल यंत्र को मंगलवार या मृगशिरा या चित्रा या धनिष्ठा नक्षत्र के दिन अष्टगंध से अनार की कलम से भोजपत्र पर लिखकर ताम्बे की ताबीज में प्राणप्रतिष्ठा कर उसका पूजनादि कर धारण करना चाहियें।

२. नागजिह्वा (अनन्तमूल) की जड़ मंगलवार को लाल डोरे में मंगल मंत्र से अभिमंत्रित कर बाँधने से मंगल बाधा की शान्ति होती है।

३. सोंठ, सौंफ, लालचन्दन, सिंगरफ, मालकाँगनी और मौलीश्री के फूल को जल में डालकर स्नान करने से भी मंगल बाधा शान्त होती है।

४. मसूर की दाल, गेंहू, गुड, केसर, कस्तूरी, लालचन्दन, लालपुष्प, लालवस्त्र, मूँगा, सोना, ताँबा, लालबैल इत्यादि का दान करने से मंगल बाधा शान्त होती है।

ध्यान नित्य हाथ जोडकर मंगल का ध्यान इस प्रकार करें।

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगतो गदाभृत् ।
धरासुतो शक्तिधृतश्च शूली सदायभष्मद्वरद प्रसन्नः ॥

मंत्र- निम्न मंत्रो में से किसी एक मंत्र का नित्य जप करें। यथा-

१. ॐ अङ्गारकाय नमः।

२. ॐ हुं श्रीं मङ्गलाय नमः।

३. ॐ क्रां क्रीं क्रौं सः भौमाय नमः।

४. ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो भौमः प्रचोदयात्।

(जप संख्या-४०हजार प्रत्येक मंत्र की)

आराधना - शिव, हनुमान या सुब्रह्मण्य की स्तुति करें।

॥ श्री मङ्गल अष्टोत्तरशत नामावली ॥

ॐ मं महीसुताय नमः।
ॐ मं महाभागाय नमः।
ॐ मं मङ्गलाय नमः।
ॐ मं मङ्गलप्रदाय नमः।
ॐ मं महावीराय नमः।
ॐ मं महाशूराय नमः।
ॐ मं महाबलपराक्रमाय नमः।
ॐ मं महारौद्राय नमः।
ॐ मं महाभद्राय नमः।
ॐ मं माननीयाय नमः।
ॐ मं दयाकराय नमः।
ॐ मं मानदाय नमः।
ॐ मं अमर्षणाय नमः।
ॐ मं क्रूराय नमः।

ॐ मं तापपापविवर्जिताय नमः।
ॐ मं सुप्रतीपाय नमः।
ॐ मं सुताम्राक्षाय नमः।
ॐ मं सुब्रह्मण्याय नमः।
ॐ मं धर्मात्मजाय नमः।
ॐ मं वक्तृसभादिगमनाय नमः।
ॐ मं वरेण्याय नमः।
ॐ मं वरदाय नमः।
ॐ मं सुखिने नमः।
ॐ मं वीरभद्राय नमः।
ॐ मं विरूपाक्षाय नमः।
ॐ मं विदूरस्थाय नमः।
ॐ मं विभावसवे नमः।
ॐ मं नक्षत्रचक्रसञ्चारिणे नमः।
ॐ मं नक्षत्ररूपाय नमः।
ॐ मं क्षात्रवर्जिताय नमः।
ॐ मं क्षयवृद्धिविनिर्मुक्ताय नमः।
ॐ मं क्षमायुक्ताय नमः।
ॐ मं विचक्षणाय नमः।
ॐ मं अक्षीणफलदाय नमः।
ॐ मं चक्षुर्गोचराय नमः।
ॐ मं शुभ लक्षणाय नमः।
ॐ मं वीतरागाय नमः।
ॐ मं वीतभयाय नमः।
ॐ मं वीचिविरावाय नमः।
ॐ मं विश्वकारणाय नमः।
ॐ मं नक्षत्रराशिसञ्चारिणे नमः।
ॐ मं नानाभय निकृन्तनाय नमः।
ॐ मं कमनीयाय नमः।
ॐ मं दयासाराय नमः।
ॐ मं कनत्कनकभूषणाय नमः।
ॐ मं भयत्राणाय नमः।
ॐ मं भव्यफलदाय नमः।
ॐ मं भक्ताभयवरप्रदाय नमः।
ॐ मं शत्रुहन्त्रे नमः।
ॐ मं शमोपेताय नमः।
ॐ मं शरणागतपोषणाय नमः।
ॐ मं साहसिने नमः।
ॐ मं सद्गुणाध्यक्षाय नमः।
ॐ मं साधवे नमः।
ॐ मं समरदुर्जयाय नमः।
ॐ मं दुष्टदूराय नमः।
ॐ मं शिष्टपूज्याय नमः।
ॐ मं सर्वकष्टनिवारणाय नमः।
ॐ मं दुश्चेष्टावारकाय नमः।
ॐ मं दुःखभञ्जनाय नमः।
ॐ मं दुर्धर्षाय नमः।
ॐ मं हरये नमः।
ॐ मं दुःस्वप्नहन्त्रे नमः।
ॐ मं दुर्धराय नमः।

ॐ मं दुष्टगर्वविमोचनाय नमः।
ॐ मं भरद्वाजकुलोद्भूताय नमः।
ॐ मं भूसुताय नमः।
ॐ मं भव्यभूषणाय नमः।
ॐ मं रक्ताम्बराय नमः।
ॐ मं रक्तवपुषे नमः।
ॐ मं भक्तपालनतत्पराय नमः।
ॐ मं चतुर्भुजाय नमः।
ॐ मं गदाधारिणे नमः।
ॐ मं मेषवाहनाय नमः।
ॐ मं अमिताशनाय नमः।
ॐ मं शक्तिशूलधराय नमः।
ॐ मं शक्ताय नमः।
ॐ मं शस्त्रविद्याविशारदाय नमः।
ॐ मं तार्किकाय नमः।
ॐ मं तामसाधाराय नमः।
ॐ मं तपस्विने नमः।
ॐ मं ताम्रलोचनाय नमः।
ॐ मं तप्तकाञ्चनसङ्काशाय नमः।
ॐ मं रक्तकिंजुल्कसन्निभाय नमः।
ॐ मं गोत्राधिदेवाय नमः।
ॐ मं गोमध्यचराय नमः।
ॐ मं गुणविभूषणाय नमः।
ॐ मं असृजे नमः।
ॐ मं अङ्गारकाय नमः।
ॐ मं अवन्तिदेशाधीशाय नमः।
ॐ मं जनार्दनाय नमः।
ॐ मं सूर्ययाम्यप्रदेशस्थाय नमः।
ॐ मं यौवनाय नमः।
ॐ मं याम्यदिङ्-मुखाय नमः।
ॐ मं लोहिताङ्गाय नमः।
ॐ मं त्रिदशाधिप सन्नुताय नमः।
ॐ मं शुचये नमः।
ॐ मं शुचिकराय नमः।
ॐ मं शूराय नमः।
ॐ मं शुचिवश्याय नमः।
ॐ मं शुभावहाय नमः।
ॐ मं मेषवृश्चिकराशीशाय नमः।
ॐ मं मेधाविने नमः।
ॐ मं मित-भाषणाय नमः।
ॐ मं सुखप्रदाय नमः।
ॐ मं सुरूपाक्षाय नमः।
ॐ मं सर्वाभीष्टफलप्रदाय नमः।
ॐ मं सर्वरोगापहारकाय नमः।

॥ इति श्री मङ्गल अष्टोत्तरशत नामावली ॥

॥ ऋणमोचन मंगल प्रयोगः॥

खेर (कत्था) की लकड़ी के कोयले से तीन आड़ी रेखायें भूमि पर खीचें। फिर नीचे लिखें मन्त्रों को पढ़ते हुये बायें पैर की एडी से मिटा दें।

मन्त्र -

दुःखदौर्भाग्यनाशाय पुत्रसंतान हेतवे ।
कृतरेखात्रयं वामपादेनैतत्प्रमाज्मर्यहम् ॥१ ॥

ऋण दुख विनाशाय मनोभीष्टार्थ सिद्धये ।
मार्जयाम्या सिता रेखातिस्त्रो जन्मत्रयोदयभवा ॥२ ॥

इतना कर लेने के बाद मंगल के चरण कमलों का ध्यान करते हुये स्तुति करें-

धरणीगर्भसंभूतं विद्युत्तेजः समप्रभम् ।
कुमारं शक्तिहस्तं च मंगल प्रणमाम्यहम् ॥१ ॥

ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ।
नमामि द्योतमानाय सर्वकल्याणकारिणे ॥२ ॥

देव दानव गंधर्व यक्ष राक्षसपन्नगा ।
सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥३ ॥

यो वक्रगति मायन्त्रो नृणां विघ्नं प्रयच्छति ।
पूजितः सुखसौभाग्य तस्मै क्ष्मासूनवे नमः ॥४ ॥

प्रसादं कुरु मे नाथ मंगलप्रद ।
मंगल मेषवाहन रुद्रात्मन। पुत्रान् देहि धनं यश ॥५ ॥

विधानम् - प्रतिदिन या केवल मंगलवार को ही यह विधान करने से शीघ्र ऋण मुक्ति होवें।

॥ ऋणहर-धनप्रद मंगल स्तोत्रम्॥

विनियोगः - ॐ अस्य श्री भौम-स्तोत्रस्य श्रीगर्ग ऋषिः। त्रिष्टुप् छन्दः। मंगलो देवता। ऋण-हरणे धन-प्राप्त्यर्थे च विनियोगः।

ऋष्यादिन्यासः - ॐ श्रीगर्ग-ऋषये नमः शिरसि। त्रिष्टुप् छन्दसे नमः

मुखे। मंगल देवतायै नमः हृदि। ऋण-हरणे धन-प्राप्त्यर्थे च विनियोगाय नमः अञ्जलौ।

ध्यानम्—

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगदो गदाभृत्।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद् वरदः प्रशान्तः॥

॥ स्तोत्रम् ॥

ॐ मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः।
स्थिरात्मजो महाकायः सर्वकामार्थसाधकः॥१॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः।
धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः॥२॥
अङ्गारको यमश्चैव सर्वरोगापहारकः।
वृष्टिकर्त्ताऽपहर्त्ता च सर्वकाम फलप्रदः॥३॥

॥ फलश्रुति ॥

एतानि कुजनामानि प्रातरुत्थाय यः पठेत्।
ऋणं न जायते तस्य धनं प्राप्नोति असंशयः॥४॥
अङ्गारकोऽति बलवानपि यो ग्रहाणां
स्वेदोद्भवः त्रि-नयनस्य पिनाकपाणेः।
आरक्त-चन्दन-सुशीतलवारिणा यः।
अभ्यर्चितोऽथ विपुलां प्रददाति सिद्धिम्॥५॥

॥ पुष्पाञ्जलि ॥

ॐ धरणीगर्भ सम्भूतं विद्युत्कान्ति समप्रभम्।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम्॥१॥
ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने।
नभसि द्योतमानाय सर्वकल्याणकारिणे॥२॥
देव-दानव-गंधर्व यक्ष-राक्षस-पन्नगाः।
सुखं यान्ति यतस्तस्मै नमः धरणिसूनवे॥३॥
यो वक्रगतिमापन्नो नृणां दुःखं प्रयच्छति।
पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः॥४॥

प्रसादं कुरु मे नाथ! मङ्गलप्रद मङ्गल !
मेषवाहन रुद्रात्मन्! सुखं देहि धनं यशः ॥५॥
स्तोत्रमङ्गारक स्येतत्पठनीयं सदा नृभिः ।
न तेषां भौमजा पीड़ा स्वल्पाऽपि भवति क्वचित् ॥६॥
अङ्गारक महाभाग भगवन्भक्त वत्सलं ।
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥७॥
ऋणरोगादि दारिद्रयं ये चान्ये ह्यल्पमृत्यु
भयक्लेश-मनस्तापा नश्यन्तु मम सर्वदा ॥८॥
अतिवक्रदुराध्य भोगमुक्तजितात्मनः ।
दुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥
विरिञ्च शक्र विष्णुनां मनुष्याणां तु स्त्रिस्तथा ।
तेन सर्वसहजेन ग्रहराजो महाबलः ॥१०॥
पुत्रान् देहि धनं देहि त्वमामि शरणं गतः ।
ऋणदारिद्र्य दुःखश्च शत्रुणां तु व्यपोहतो ॥११॥

॥ अभिषेक के २१ मंत्र ॥

१.ॐ मङ्गलाय नमः। २.ॐ भूमिपुत्राय नमः। ३.ॐ ऋणहर्त्रे नमः। ४.ॐ धनप्रदाय नमः। ५.ॐ स्थिरात्मजाय नमः। ६.ॐ महाकायाय नमः। ७.ॐ सर्वकामार्थ साधकाय नमः। ८.ॐ लोहिताङ्गाय नमः। ९.ॐ लोहिताक्षाय नमः। १०. ॐ सामगानां कृपाकराय नमः। ११.ॐ धरात्मजाय नमः। १२.ॐ कुजाय नमः। १३.ॐभौमाय नमः। १४.ॐ भूमिदाय नमः। १५.ॐ भूमिनन्दनाय नमः। १६.ॐ अङ्गारकाय नमः। १७.ॐ यमाय नमः। १८.ॐ सर्वरोगापहारकाय नमः। १९.ॐ वृष्टिकर्त्रे नमः। २०.ॐ वृष्ट्यपहर्त्रे नमः। २१.ॐ सर्वकाम-फलप्रदाय नमः।

॥ श्री बुधतन्त्रम् ॥

॥ अथ बुधमंत्रप्रयोग: ॥

मंत्र:- ॐ उद्‌बुध्यस्वाग्नेप्प्रति जागृहित्वमिष्टा पूर्तेसठ. सृजेथा मयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वेदेवा यजमानश्चसीदत ॥१ ॥ इति मन्त्र।

विनियोग:- ॐ उद्‌बुध्यस्वेति मंत्रस्य परमेष्ठी ऋषि:। बृहतीछंद:। बुधो देवता। त्वमिष्टापूर्तेसमिति बीजम्। बुधप्रीत्यर्थे जपे विनियोग: ॥

ऋष्यादि न्यास:- ॐ परमेष्ठी ऋषये नम: शिरसि ॥१ ॥ ॐ बृहती छंदसे नम:मुखे ॥२ ॥ ॐ बुधदेवतायै नम: हृदये ॥३ ॥ ॐ त्वमिष्टापूर्तेसमिति बीजाय नम: गुह्ये ॥४ ॥ ॐ बुधप्रीत्यर्थे जपे विनियोगाय नम: सर्वाङ्गे ॥५ ॥ इति ऋष्यादिन्यास:।

करन्यास:- ॐ उद्‌बुध्यस्वाग्नेप्रतिजागृहि अंगुष्ठाभ्यां नम: ॥१ ॥ ॐ त्वमिष्टापूर्तेसं तर्जनीभ्यां नम: ॥२ ॥ ॐ सृजेथामयं च मध्यमाभ्यां नम: ॥३ ॥ ॐ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् अनामिकाभ्यां नम: ॥४ ॥ ॐ विश्वेदेवा कनिष्ठिकाभ्यां नम: ॥५ ॥ ॐ यजमानश्चसीदत करतलकरपृष्ठाभ्यां नम: ॥६ ॥ इति करन्यास:।

हृदयादि न्यास:- ॐ उद्‌बुध्यस्वाग्नेप्रतिजागृहि हृदयाय नम: ॥१ ॥ ॐत्वमिष्टापूर्तेसं शिरसे स्वाहा ॥२ ॥ ॐ सृजेथामयं च शिखायै वषट् ॥३ ॥ ॐ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्कवचाय हुं ॥४ ॥ ॐ विश्वेदेवा नेत्रत्रयाय वौषट् ॥५ ॥ ॐ यजमानश्चसीदत अस्त्राय फट् ॥६ ॥ ॐ इति हृदयादिन्यास:।

मन्त्रन्यास - ॐ उद्‌बुध्यस्व शिरसि ॥१ ॥ ॐ अग्नेप्रति ललाटे ॥२ ॥ ॐ जागृहित्वं मुखे ॥३ ॥ ॐ इष्टापूर्ते सं हृदये ॥४ ॥ ॐ सृजेथामयं च नाभौ ॥५ ॥ ॐ अस्मिन्त्सधस्थे कट्याम् ॥६ ॥ ॐ अध्युत्तरस्मिन्नूर्वो: ॥७ ॥

ॐ विश्वदेवा जानुनोः ॥८॥ ॐ यजमानश्च पादयोः ॥९॥ ॐ सीदत सर्वाङ्गे ॥१०॥

इति न्यासविधिं कृत्वा ध्यायेत्-

पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी ।
चर्मासिधृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च ॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्।

बुधे चाष्टसहस्त्रकमिति जपसंख्या ८००० जपान्ते अपामार्गसमि त्तिल पायसघृतैर्दशांशहोमः॥अन्यत्सर्वं पूर्ववत्।

अथ दानद्रव्याणि - चैल च नीलं कलधौतकांस्यं मुद्गाज्यगारुत्मकसर्वपुण्यम्॥ दासी च दन्तो द्विरदस्य नूनं वदंति दानं विधुनंदनाय।

॥ इति बुधमंत्रप्रयोगः ॥

॥ बुध तांत्रिक मंत्राः॥

सप्ताक्षर मंत्र- ॐ बुं बुधाय नमः।

इस मंत्र के ऋषि ब्रह्मा। छन्द पंक्ति। देवता बुध। **बं बीजं। आपः शक्तिं। इस प्रकार समझना चाहिए।**

मंत्र कोष में - "**बं बुधाय नमः** " लिखा है।

ध्यानम्-

वन्दे बुधं सदा देवं पीताम्बर-सुभूषणम् ।
ज्ञानुस्थ वामहस्ताढ्यं सभयेतर-पाणिकम ॥

षडंगन्यासः- बां हृदयाय नमः। बीं शिरसे स्वाहा। बूं शिखायै वषट्। बैं कवचाय हुं। बौं नेत्रत्रयाय वौषट्। बः अस्त्राय फट्।

दशाक्षर मंत्रः- ॐ ब्रां ब्रीं ब्रूं सः बुधाय नमः।

मंत्र कोष में- "**ॐ ब्रां ब्रीं ब्रूं सं बुधाय नमः**" लिखा है।

यंत्रार्चनम्- षटकोण एवं भूपूर युक्त बनायें। मध्य में ध्यान पूर्वक ग्रह का आवाहन करें।

षटकोण में- ॐ ब्रां हृदयाय नमः। ब्रीं शिरसे स्वाहा। ब्रूं शिखायै वषट्। ब्रैं कवचाय हुं। ब्रौं नेत्रत्रयाय वौषट्। ब्रः अस्त्राय फट्।

भूपूर में इन्द्रादि देवता व उनके वज्रादि आयुधों का पूजन करें।

|| अथ बुधशान्तिस्तोत्रम् ||

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवदुःखापहर्ता ।
धर्मस्य धृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च ॥१ ॥

ॐ प्रियंगुकलिकश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं नमामि शशिनन्दनम् ॥२ ॥

सोमसूनुर्बुधश्चैव सौम्यः सौम्यगुणान्वितः ।
सदा शांतः सदा क्षेमो नमामि शशिनन्दनम् ॥३ ॥

उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥४ ॥

शिरीषपुष्पसंकाशः कपिशीलो युवा पुनः ।
सोमपुत्रो बुधश्चैव सदा शांतिं प्रयच्छतु ॥५ ॥

श्यामः शिरालश्चकलाविधिज्ञः कौतूहली कोमलवाग्विलासी ।
रजोऽधिको मध्यमरूपधृक् स्यादाताम्रनेत्रो द्विजराजपुत्रः ॥६ ॥

अहो चन्द्रसुत श्रीमान् मगधेषु समुद्भवन् ।
अत्रिगोत्रश्चतुर्बाहुः खड्गखेटकधारकः ॥७ ॥

गदाधरो नृसिंहस्थः स्वर्णनाभसमन्वितः ।
केतकीद्रुमपत्राभ इन्द्रविष्णुप्रपूजितः ॥८ ॥

ज्ञेयो बुधः पंडितश्च रौहिणेयश्च सोमज ।
कुमारो राजपुत्रश्च सुसेव्यः शशिनन्दनः ॥९॥
गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा ।
सौम्यः सौम्यगुणोपेतो रत्नदानफलप्रदः ॥१०॥
एतानि बुधनामानि प्रातःकाले पठेन्नरः ।
बुद्धिर्विवृद्धितां याति बुधपीडा न जायते ॥११॥

॥ इति बुधस्तोत्रं समाप्तम् ॥

॥ बुध पञ्चविंशति नामावली स्तोत्रम् ॥

विनियोग:- अस्य श्री बुधपञ्चविंशत्रिनाम स्तोत्र मंत्रस्य प्रजापतिर्ऋषिः, त्रिष्टुप् छन्दः, बुधो देवता, बुधपीडानिवारणार्थे जपे विनियोगः।

बुधो बुद्धिमतां श्रेष्ठो बुद्धिदाता धनप्रदः ।
प्रियङ्कलिकाश्यामः कञ्जनेत्रो मनोहरः ॥
ग्रहोपमो रौहिणेयो नक्षत्रेशो दयाकरः ।
विरुद्धकार्यहन्ता च सौम्यो बुद्धिविवर्धनः ॥
चन्द्रात्मजो विष्णुरूपी ज्ञानी ज्ञो ज्ञानिनायकः ।
ग्रहपीडाहरो दारपुत्रधान्यपशुप्रदः ॥
लोकप्रियः सौम्यमूर्तिर्गुणदो गुणिवत्सलः ।
पञ्चविंशति नामानि बुधस्यै तानि यः पठेत् ॥
स्मृत्वा बुधं सदा तस्य पीडाः सर्वा विनश्यति ।
तद्दिने वा पठेद्यस्तु लभते स मनोंगतम् ॥

॥ इति श्रीपद्मपुराणे बुधपंचविंशतिनाम स्तोत्रं सम्पूर्णम् ॥

॥ बुध कवचम् ॥

विनियोग:- अस्य श्री बुध कवचस्तोत्र मंत्रस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, बुधो देवता, बुधपीड़ाशमनार्थ जपे विनियोगः।

बुधस्तु पुस्तकधरः कुंकुमस्य समद्युतिः ।
पीताम्बरधरः पातु पीतमाल्यानुलेपनः ॥
कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा ।
नेत्रे ज्ञानमयः पातु श्रोते पातु निशाप्रियः ॥
घ्राणं गंधप्रियः पातु जिह्वां विद्याप्रदो मम ।
कण्ठं पातु विधोः पुत्रो भुजा पुस्तकभूषणः।
वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः ॥
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ।
जानुनी रोहिणेयश्च पातु जंघेऽखिलप्रदः ॥
पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः ।
एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम् ॥
सर्वरोगप्रशमनं सर्वदुःख निवारणम् ।
आयुरारोग्यधनदे पुत्रपौत्रप्रवर्धनम् ॥
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥

॥ इति श्री ब्रह्मवैवर्तक पुराणे बुधकवचं संपूर्णम् ॥

॥ बुध शान्ति प्रयोगः॥

रोग लक्षण-

बुध ग्रह के प्रभाव से हिस्टीरिया, पागलपन, मानसिक विकृतियाँ, कान के रोग, बहरापन, पक्षाघात, पेट का घाव(अलसर), स्मरण शक्ति का ह्रास, हकलाना, सिरदर्द, अनिद्रा, मुर्छावस्था के दौरे, फेफडो में कष्ट, हृदयादि रोग होते है।

उपचार-

१. बुध यंत्र को बुधवार अश्लेषा, ज्येष्ठा, रेवती नक्षत्र के दिन अष्टगंध से अनार

की कलम से भोजपत्र पर लिखकर सोने के ताबीज में प्राणप्रतिष्ठा कर एवं पूजन कर धारण करें।

२. वृद्धदारु (विधारा) की जड़ बुधवार को हरे रंग के डोरे में लपेटकर उसे बुध मंत्र से अभिमंत्रत करके बाँधने से बुध बाधा की शान्ति होती है।

३. हरड़, बहेड़ा, गोमय, अक्षत्, गोरोचन, स्वर्ण, आँवला और मधु को जल में डालकर स्नान करने से बुध बाधा की शान्ति होती है।

४. मूँग, खाण्ड, हरा वस्त्र, पन्ना, स्वर्ण, फल, कर्पूर, घी का दान करने से बुध बाधा की शान्ति होती है।

आराधना - गणेश उपासना करें।

व्रत - अमावस्या का व्रत करें।

नित्य हाथ जोडकर बुध का ध्यान इस प्रकार करें-

ध्यानम् –

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दण्डधरश्च हारी ।
चर्मासिधृक् सोमसुतो गदाभृत् सिंहाधिरूढ़ो वरदो बुधश्च ॥

मंत्र- निम्न मंत्रो में से किसी एक मंत्र का नित्य जप करें-

१. ॐ बुं बुधाय नमः।

२. ॐ ऐं स्त्रीं श्रीं बुधाय नमः।

३. ॐ ब्रां ब्रीं ब्रौं सः बुधाय नमः।

४. ॐ सौम्यरूपाय विद्महे बाणेशाय धीमहि तन्नो बुधः प्रचोदयात्।

॥ श्रीबुध अष्टोत्तरशत नामावली ॥

ॐ बुं बुधाय नमः।
ॐ बुं बुधार्चिताय नमः।
ॐ बुं सौम्याय नमः।
ॐ बुं दृढफलाय नमः।
ॐ बुं श्रुतिजालप्रबोधकाय नमः।
ॐ बुं सत्यवासाय नमः।
ॐ बुं सत्यवचसे नमः।
ॐ बुं श्रेयसां पतये नमः।
ॐ बुं अव्ययाय नमः।
ॐ बुं शशिसुताय नमः।
ॐ बुं सोमजाय नमः।
ॐ बुं सुखदाय नमः।

ॐ बुं श्रीमते नमः।

ॐ बुं सोमवंशप्रदीपकाय नमः।

ॐ बुं वेदविदे नमः।

ॐ बुं वेदतत्त्वज्ञाय नमः।

ॐ बुं वेदान्तज्ञानभास्वराय नमः।

ॐ बुं विद्याविचक्षणविभवे नमः।

ॐ बुं विद्वत्पतिकराय नमः।

ॐ बुं ऋजवे नमः।

ॐ बुं विश्वानुकूलसञ्चारिणे नमः।

ॐ बुं विशेषविनयान्विताय नमः।

ॐ बुं विविधागमसारज्ञाय नमः।

ॐ बुं वीर्यवते नमः।

ॐ बुं विगतज्वराय नमः।

ॐ बुं त्रिवर्गफलदाय नमः।

ॐ बुं अनन्ताय नमः।

ॐ बुं त्रिदशाधिपपूजिताय नमः।

ॐ बुं बुद्धिमते नमः।

ॐ बुं बहुशास्त्रज्ञाय नमः।

ॐ बुं बलिने नमः।

ॐ बुं बन्धविमोचनाय नमः।

ॐ बुं बोधनाय नमः।

ॐ बुं वक्रातिवक्रगमनाय नमः।

ॐ बुं वासवाय नमः।

ॐ बुं वसुधाधिपाय नमः।

ॐ बुं प्रसादवदनाय नमः।

ॐ बुं वन्द्याय नमः।

ॐ बुं वरेण्याय नमः।

ॐ बुं वाग्-विलक्षणाय नमः।

ॐ बुं सत्यवते नमः।

ॐ बुं सत्यसन्धाय नमः।

ॐ बुं सत्यसङ्कल्पाय नमः।

ॐ बुं सदाधाराय नमः।

ॐ बुं सर्वरोगप्रशमनाय नमः।

ॐ बुं सर्वमृत्युनिवारकाय नमः।

ॐ बुं वाणिज्यनिपुणाय नमः।

ॐ बुं वश्याय नमः।

ॐ बुं वाताङ्गिने नमः।

ॐ बुं वातरोगहृते नमः।

ॐ बुं स्थूलाय नमः।

ॐ बुं स्थैर्यगुणाध्यक्षाय नमः।

ॐ बुं स्थूलसूक्ष्मादिकारणाय नमः।

ॐ बुं अप्रकाशाय नमः।

ॐ बुं प्रकाशात्मने नमः।

ॐ बुं धनाय नमः।

ॐ बुं गगनभूषणाय नमः।

ॐ बुं विधिस्तुताय नमः।

ॐ बुं विशालाक्षाय नमः।

ॐ बुं विद्वज्जनमनोहराय नमः।

ॐ बुं चारुशीलाय नमः।

ॐ बुं स्वप्रकाशाय नमः।
ॐ बुं चपलाय नमः।
ॐ बुं जितेन्द्रियाय नमः।
ॐ बुं उदङ्-मुखाय नमः।
ॐ बुं मखासक्ताय नमः।
ॐ बुं मगधाधिपतये नमः।
ॐ बुं हरये नमः।
ॐ बुं सौम्यवत्सरसञ्जाताय नमः।
ॐ बुं सोमप्रियकराय नमः।
ॐ बुं सुफलप्रदाय नमः।
ॐ बुं सुखिने नमः।
ॐ बुं सिंहादिरूढाय नमः।
ॐ बुं सर्वज्ञाय नमः।
ॐ बुं शिखिवर्णाय नमः।
ॐ बुं शिवङ्कराय नमः।
ॐ बुं पीताम्बराय नमः।
ॐ बुं पीतवपुषे नमः।
ॐ बुं खड्गचर्मधराय नमः।
ॐ बुं कार्यकर्त्रे नमः।
ॐ बुं कलुषहराय नमः।
ॐ बुं आत्रेयगोत्रजाय नमः।
ॐ बुं अत्यन्तविनयाय नमः।
ॐ बुं विश्वपावनाय नमः।
ॐ बुं चाम्पेयपुष्प सङ्काशाय नमः।
ॐ बुं चारणाय नमः।
ॐ बुं चारु भूषणाय नमः।
ॐ बुं वीतरागाय नमः।
ॐ बुं वीतभयाय नमः।
ॐ बुं विशुद्धाय नमः।
ॐ बुं कनकप्रभाय नमः।
ॐ बुं बन्धुप्रियाय नमः।
ॐ बुं बन्धमुक्ताय नमः।
ॐ बुं बाणमण्डल संश्रिताय नमः।
ॐ बुं अर्केशाननिवासस्थाय नमः।
ॐ बुं तर्कशास्त्रविशारदाय नमः।
ॐ बुं प्रशान्ताय नमः।
ॐ बुं प्रीतिसंयुक्ताय नमः।
ॐ बुं प्रियकृते नमः।
ॐ बुं प्रियभाषणाय नमः।
ॐ बुं मेधाविने नमः।
ॐ बुं माधवासक्ताय नमः।
ॐ बुं मिथुनाधिपतये नमः।
ॐ बुं सुधिये नमः।
ॐ बुं कन्याराशिप्रियाय नमः।
ॐ बुं कामप्रदाय नमः।
ॐ बुं धनफलाशाय नमः।
ॐ बुं रोहिणेयाय नमः।

॥ श्री बृहस्पति तन्त्रम् ॥

॥ अथ बृहस्पतिमन्त्रप्रयोग:॥

मंत्र-

ॐ बृहस्पतेऽअतियदर्यो ऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऽऋतप्प्रजात तदस्मासुद्रविणंधेहिचित्रम् ॥५॥

विनियोग:- ॐ बृहस्पते इति मन्त्रस्य गृत्समद ऋषि:। त्रिष्टुप् छन्द:। बृहस्पतिर्देवता॥ बृहस्पतिप्रीत्यर्थे जपे विनियोग:॥

ऋष्यादि न्यास:- ॐ गृत्समद ऋषये नम: शिरसि॥१॥ ॐ त्रिष्टुप् छन्दसे नम: मुखे॥२॥ ॐ बृहस्पतिदेवतायै नम: हृदये॥ ॥३॥ विनियोगाय नम: सर्वाङ्गे। इति ऋष्यादिन्यास:।

करन्यास:- ॐ बृहस्पतेऽअति यदर्य्यो इत्यंगुष्ठाभ्यां नम:॥१॥ ॐ अर्हाद्युमदिति तर्जनीभ्यां नम:॥२॥ ॐ विभाति क्रतुमदिति मध्यमाभ्यां नम:॥३॥ ॐ जनेषु अनामिकाभ्यां नम:॥४॥ ॐ यद्दीदयच्छ वसऽऋतप्प्रजाततदस्मासु कनिष्ठिकाभ्यां नम:॥५॥ ॐ द्रविणंधेहि चित्रमिति करतलकरपृष्ठाभ्यां नम:॥५॥ इति करन्यास:।

हृदयादिन्यास:- ॐ बृहस्पतेऽअतियदर्य्यो हृदयाय नम:॥१॥ ॐ अर्हाद्युमदिति शिरसे स्वाहा॥२॥ ॐ विभाति क्रतुमदिति शिखायै वषट्॥३॥ ॐ जनेषु कवचाय हुं॥४॥ ॐ यद्दीदयच्छवस ऽऋतप्प्रजा ततदस्मासु नेत्रत्रयाय वौषट्॥५॥ ॐ द्रविणंधेहिचित्रमित्यस्त्राय फट्॥६॥ ॐ इति हृदयादिन्यास:।

मंत्रन्यास- ॐ बृहस्पते इति शिरसि॥१॥ ॐ अतियदर्यो ललाटे॥२॥ ॐ अर्हाद्युमन्मुखे॥३॥ ॐ विभाति क्रतुमज्जनेषु नाभौ॥४॥ ॐ यद्दीदयत्कट्याम् ॥५॥ ॐ शवसऽऋतप्रजा ऊर्वो:॥६॥ ॐ

ततदस्मासुद्रविणं जानुनोः ॥७॥ ॐ धेहि चित्रं पादयोः ॥८॥ इति मंत्रन्यासः।

एवं न्यासं कृत्वा ध्यायेत्॥

अथ ध्यानम्–

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः ।
दधाति दंडं च कमण्डलुं च तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

एकोनविंशतिर्जीवे सहस्राणि १९००० विदुर्बुधाः इति जपसंख्या। जपांते अश्वत्थसमित्तिलपायसघृतैर्दशांशहोमः। अन्यत्सर्वं पूर्ववत्॥

अथ दानद्रव्याणि–

शर्करा च रजनी तुरंगमः पीतधान्यमपि पीतांबरम् ।
पुष्पराजलवणे च कांचनं प्रीतये सुरगुरोः प्रदीयताम् ॥१॥

॥ ॐ इति गुरु मंत्र जप प्रयोगः ॥

॥ गुरु तांत्रिक मंत्राः॥

अष्टाक्षर (रत्नमंजूषायाम्)– ब्रूं बृहस्पतये नमः।

(मंत्र महौदधौ)– बृं बृहस्पते नमः।

ध्यानम्–

रत्नस्वर्णांशुकादीन् निजकरकमलाद् दक्षिणादथिन्तरम् ।
वासो-राशौ निधायापरममरगुरुं पीतवस्त्रादि भूषणम् ॥

नवाक्षर मंत्रः– **ॐ बृं बृहस्पतये नमः।**

तजोमयं शक्तित्रिशूलहस्तं सुरेन्द्रसंघ स्तुतपादपंकजम् ।
मेघा-निधिं मत्स्यगतं द्विबाहुं गुरुं भजे मानस-पंकजेहम् ॥

दशाक्षर मंत्रः– ॐ ग्रां ग्रीं ग्रौं सः गुरवे नमः।

द्वादशाक्षर मंत्रः– ॐ जां जीं जूं सं बृहस्पतये स्वाहा।

अथ अष्टाक्षर मंत्र विधानम्– (बृं बृहस्पतये नमः)

अस्य विधानम्–

विनियोग:- ॐ अस्य बृहस्पति मंत्रस्य ब्रह्मा ऋषिः। अनुष्टुप् छन्दः। सुराचार्यो देवता। बृं बीजम्। नमः शक्तिः। ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

ऋष्यादि न्यास:- ॐ ब्रह्म ऋषये नमः शिरसि ॥१॥ अनुष्टुप् छन्दसे नमः मुखे ॥२॥ सुराचार्यो देवतायै नमः हृदि ॥३॥ बृं बीजाय नमः गुह्ये ॥४॥ नमः शक्तये नमः पादयोः ॥५॥ विनियोगाय नमः सर्वाङ्गे ॥६॥

करन्यास:- ॐ ब्रां अंगुष्ठाभ्या नमः। ॐ ब्रीं तर्जनीभ्यां नमः। ॐ ब्रूं मध्यमाभ्यां नमः। ॐ ब्रैं अनामिकाभ्यां नमः। ॐ ब्रौं कनिष्ठिकाभ्यां नमः। ॐ ब्रः करतलकर पृष्ठाभ्यां नमः। इति करन्यासः।

हृदयादि षडंगन्यास:-ॐ ब्रां हृदयाय नमः। ॐ ब्रीं शिरसे स्वाहा। ॐ ब्रूं शिखायै वषट्। ॐ ब्रैं कवचाय हुं। ॐ ब्रौं नेत्रत्रयाय वौषट्। ॐ ब्रः अस्त्राय फट्।

ध्यानम्–

रत्नाष्टापदवस्त्रराशिममलं दक्षात्किरन्तं करादासीनं
विपणौ करं निदधतं रत्नादिराशौ परम्।
पीतालेपन पुष्पवस्त्रमखिलालङ्कार संभूषितं
विद्यासागरपारगं सुरगुरुवन्दे सुवर्णप्रभम् ॥

॥ गुरु यंत्रार्चनम् ॥

यंत्र मे पीठ देवताओं का पूजन करें यथा–

पूर्वादि चार. दिशाओं में- ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः। आग्नेयादि चारों कोणो में- ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वर्याय नमः।

प्रथमावरणार्चनम्-(षटकोण केसरों में आग्नेयादि चारों दिशाओं और मध्य दिशा दिशा में)- ॐ ब्रां हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र ॥१॥ ॐ ब्रीं शिरसे स्वाहा। शिरः श्रीपा० पू० त० ॥२॥ ॐ ब्रूं शिखायै वषट् शिखा श्रीपा० पू० त० ॥३॥ ॐ ब्रैं कवचाय हुं। कवच श्रीपा० पू० त० ॥४॥ ॐ ब्रौं नेत्रत्रयाय वौषट्।

नेत्रत्रय श्रीपा० पू० त० ॥५॥ ॐ ब्रः अस्त्राय फट्। अस्त्र श्रीपा० पू० त० ॥६॥

बृहस्पति पूजन यंत्रम्

द्वितीयावरणम् - (अष्टदले) **देवाचार्याय नमः। वेदसिद्धान्त पारगाय नमः। पीड़ाहराय नमः। वाचस्पतये नमः। लम्बकूर्चाय नमः। प्रहृष्टनेत्राय नमः।** विप्राणांपतये नमः। विपन्न हितकारकाय नमः।

तृतीयावरणम् - (भूपुरे) - पूर्वादिक्रम से - **इन्द्रादि दश दिक्पालों का पूजन करें।**

चतुर्थावरणम् - (भूपुरे) - पूर्वादिक्रम से - **इन्द्रादि दश दिक्पालों के अस्त्रों का पूजन करें।**

इसके बाद षडंगो की पूजा करें। इसके बाद पुष्पांजलि निम्न मंत्र से देवें।

अभिष्ट सिद्धि मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

यह मंत्र कहकर पुष्पांजलि देकर **पूजिताः तर्पिताः सन्तु** कहें।

॥ अथ बृहस्पतिमंत्र प्रयोगः॥

मंत्रो यथा- "ॐ बृं बृहस्पतये नमः" (मंत्रमहोदधौ) इत्यष्टाक्षरो मंत्रः॥ ॐ लगाने से **नवाक्षर मन्त्र** हो जाता है।

अस्य विधानम्-

विनियोगः- **अस्य बृहस्पतिमंत्रस्य ब्रह्मात्रृषिः। अनुष्टुप् छंदः। सुराचार्यो देवता। बृं बीजम्। नमः शक्तिः। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥**

ऋष्यादि न्यासः- **ॐ ब्रह्मऋषये नमः, शिरसि ॥१॥ अनुष्टुप्छंदसे नमः, मुखे ॥२॥ सुराचार्यदेवतायै नमः, हृदि ॥३॥ बृं बीजाय नमः, गुह्ये ॥४॥ नमः शक्तये नमः, पादयोः ॥५॥ विनियोगाय नमः सर्वाङ्गे ॥६॥** इति ऋष्यादिन्यासः।

करन्यासः- **ॐ ब्रां अंगुष्ठाभ्यां नमः ॥१॥ ॐ ब्रीं तर्जनीभ्यां नमः ॥२॥ ॐ ब्रूं मध्यमाभ्यां नमः ॥३॥ ॐ ब्रैं अनामिकाभ्यां नमः ॥४॥ ॐ ब्रौं कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ब्रः करतलकरपृष्ठाभ्यां नमः ॥६॥** इति करन्यासः।

षडंगन्यास- **ॐ ब्रां हृदयाय नमः ॥१॥ ॐ ब्रीं शिरसे स्वाहा ॥२॥ ॐ ब्रूं शिखायै वषट् ॥३॥ ॐ ब्रैं कवचाय हुम् ॥४॥ ॐ ब्रौं नेत्रत्रयाय वौषट् ॥५॥ ॐ ब्रः अस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः॥**

इति न्यासं कृत्वा ध्यायेत्॥

अथ ध्यानम्-

रत्नाष्टापदवस्त्रराशिममलं दक्षात्किरन्तं करादासीनं ।
विपणौ करं निदधतं रत्नादिराशौ परम् ॥
पीतालेपनपुष्पवस्त्रमखिलालंकार संभूषितं ।
विद्यासागरपारगं सुरगुरुं वंदे सुवर्णप्रभम् ॥१॥

॥ यंत्रपूजनम्॥

इति ध्यात्वासर्वतोभद्रमंडले धर्माधर्मादिपीठांत पीठदेवताः संस्थापयेत्॥

अत्र पीठशक्तयो न संति॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात्।

प्रथमावरणार्चनम्-तद्यथा षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च-**ॐ ब्रां हृदयाय नमः। हृदय श्रीपादुकां पूजयामि तर्पयामि नमः॥ इति सर्वत्र ॥१॥ ॐ ब्रीं शिरसे स्वाहा शिरः श्रीपा०पू०त० ॥२॥ ॐ ब्रूं शिखायै वषट्। शिखा श्रीपा०पू०त० ॥३॥ ॐब्रैं कवचाय हुम्। कवच श्रीपा०पू०त ० ॥४॥ ॐ ब्रौं नेत्रत्रयाय वौषट्। नेत्रत्रय श्रीपा०पू०त०**

॥५ ॥ ॐ ब्रः अस्त्राय फट्। अस्त्र श्रीपा०पू०त० ॥६ ॥ ॐ इति षडंगानि पूजयेत्॥

ततः पुष्पाञ्जलिमादाय मूलमुच्चार्य-

अभिष्ट सिद्धि मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत्॥ इति प्रथमावरणम्॥१ ॥

ततो भूपूरे पूर्वादिक्रमेण इंद्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात्॥

इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य जपं कुर्यात्॥ अस्य पुरश्चरणमशीतिसहस्त्रजपः॥ तद्दशांशतो घृतहोमः। एवं कृते मंत्रः सिद्धोभवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्।

तथा च-

जपित्वाशीतिसाहस्त्रं हुत्वा तेन घृतेन वा ।
धर्माधर्मादिपीठे तं पूजयेदंगदिग्भवैः ॥१ ॥
सिद्धे मनौ प्रकुर्वीत प्रयोगानिष्टसिद्धये ।
हरिद्राकुसुमैर्हुत्वा घृताक्तैर्दिवसत्रयम् ॥२ ॥
सविंशतिशतं मंत्री वासांसि लभते मणीन् ।
शत्रुरोगादिपीडासु स्वजने कलहोद्भवे ॥३ ॥
जुहुयात्पिप्पलोत्थाभिः समिद्भिस्तन्निवृत्तये ॥४ ॥

॥ इत्यष्टाक्षरबृहस्पतिमंत्रप्रयोगः ॥

॥ श्री बृहस्पति नामावलिस्तोत्रम् ॥

विनियोगः- ॐ अस्य श्रीबृहस्पति स्तोत्रस्य गृत्समद ऋषिः, अनुष्टुप् छन्दः, श्रीबृहस्पतिः देवता, श्रीबृहस्पति प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः- शिरसि गृत्समद ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीबृहस्पति देवतायै नमः। सर्वाङ्गे श्रीबृहस्पति प्रीत्यर्थे पाठे विनियोगाय नमः।

॥ मूल स्तोत्र पाठ ॥

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदांवरः ।
वागीशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ॥
सुधादृष्टिर्ग्रहाधीशो ग्रहपीड़ापहारकः ।
दयाकरः सौम्य मूर्तिः सुरार्च्यः कुङ्कुमद्युतिः ॥
लोकपूज्यो लोकगुरुर्नीतिज्ञो नीतिकारकः ।
तारापतिश्चांगिरसो वेद वैध पितामहः ॥

॥ फलश्रुति ॥

भक्त्या वृहस्पतिं स्मृत्वा नामान्येतानि यः पठेत् ।
अरोगी बलवान् श्रीमान् पुत्रवान स भवेन्नरः ॥
जीवेद् वर्षशतं मर्त्यः पापं नश्यति तत्क्षणात् ।
यः पूजयेद् गुरु दिने पीतगन्धाक्षताम्बरैः ॥
पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्राह्मणान् भोजयित्वा च पीड़ा शान्तिर्भवेद् गुरोः ॥

॥ श्री स्कन्द पुराणे वृहस्पति स्तोत्रम् ॥

॥ श्रीबृहस्पति कवचम् ॥

विनियोगः- ॐ अस्य श्रीबृहस्पति कवचस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, देवगुरु श्रीबृहस्पतिः देवता, गं बीजं, श्रीं शक्तिः, क्लीं कीलकं बृहस्पति पीड़ा शमनार्थे पाठे विनियोगः।

ऋष्यादिन्यासः- शिरसि ईश्वर ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीबृहस्पति देवतायै नमः। गुह्ये गं बीजाय नमः। पादयोः श्रीं शक्तये नमः। नाभौ क्लीं कीलकाय नमः। सर्वाङ्गे बृहस्पति पीड़ा शमनार्थे पाठे विनियोगाय।

अङ्गन्यास	करन्यास	षडङ्गन्यास
गाँ	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
गीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
गूँ	मध्यमाभ्यां नमः।	शिखायै वषट्।
गैं	अनामिकाभ्यां नमः।	कवचाय हुम्।
गौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
गः	करतल करपृष्ठाभ्यां नमः	अस्त्राय फट्।

ध्यानम् :-

अभीष्ट फलदं देवं सर्वज्ञं सुर पूजितम् ।
अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम् ॥

॥ कवचपाठ ॥

बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः ।
कर्णौ सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः ॥
जिह्वां पातु सुराचार्यो नासां मे वेदपारगः ।
मुखं मे पातु सर्वज्ञो कण्ठं मे देवता गुरुः ॥
भुजावाङ्गिरसः पातु करौ पातु शुभप्रदः ।
स्तनौ मे पातु वागीशः कुक्षिं मे शुभलक्षणः ॥
नाभिं देवगुरुः पातु मध्यं पातु सुखप्रदः।
कटिं पातु जगद्वन्द्यः ऊरू मे पातु वाक्पतिः ॥
जानु जङ्घे सुराचार्यो पादौ विश्वात्मकस्तथा ।
अन्यानि यानि चाङ्गानि रक्षेन् मे सर्वतोगुरुः ॥

॥ फलश्रुति ॥

इत्येतत् कवचं दिव्यं त्रिसन्ध्यं यः पठेन्नरः ।
सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत् ॥

॥ इतिश्रीब्रह्मयामले बृहस्पति कवचम् ॥

॥ अथ बृहस्पतिस्तोत्रा: ॥

(१)

क्रौं शकादिदेवैः परिपूजितोऽसि त्वं जीवभूतो जगतो हिताय ।
ददाति यो निर्मलशास्त्रबुद्धिं स वाक्पतिर्मे वितनोतु लक्ष्मीम् ॥१ ॥
पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः ।
दधाति दण्डं च कमण्डलुं च तथाक्षसूत्रं वरदोऽस्तु मह्यम् ॥२ ॥
बृहस्पतिः सुराचार्य्यो दयावाञ्छुभलक्षणः ।
लोकत्रयगुरुः श्रीमान्सर्वज्ञः सर्वतो विभुः ॥३ ॥
सर्वेशः सर्वदा तुष्टः श्रेयस्कृत्सर्वपूजितः ।
अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता महाबलः ॥४ ॥
विश्वात्मा विश्वकर्ता च विश्वयोनिरयोनिजः ।
भूर्भुवो धनदाता च भर्ता जीवो जगत्पतिः ॥५ ॥
पंचविंशतिनामानि पुण्यानि शुभदानि च ।
नन्दगोपालपुत्राय भगवत्कीर्तितानि च ॥६ ॥
प्रातरुत्थाय यो नित्यं कीर्तियेत्तु समाहितः ।
विप्रस्तस्यापि भगवान् प्रीतः स च न संशयः ॥७ ॥

(२)

(तंत्रांतरेऽपि)—

देवानां च ऋषीणां च गुरुं कांचनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥१ ॥
अमराणां बुद्धिदाता वाग्मी यः करुणाकरः ।
यावंतो ये च मुनयः पुरुषाकारपीतभाः ॥२ ॥
बृहस्पतिः सुराचार्य्यो गीष्पतिर्धिषणो गुरुः ।
जीव आंगिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥३ ॥
सकलसुरविनेता ब्रह्मतुल्यप्रभाव
स्त्रिदशपतिकरैर्यो घृष्टपादारविंदः ।

विमलमतिविकासी सर्वमांगल्यहेतुर्दिशतु
मम विभूर्तिं वाक्पतिः सुप्रभावः ॥४॥

बृहस्पतिमहं नौमि गुरुं देवेन्द्रपूजितम् ।
सर्वशास्त्रप्रवक्तारं सर्वकामफलप्रदम् ॥५॥

सर्वसंशयच्छेत्तारं वेत्तारं सर्वकर्मणाम् ।
परब्रह्ममयं नित्यं परमानंदरूपिणम् ॥६॥

सर्वसिद्धिप्रदं देवं शरण्यं भक्तवत्सलम् ।
वरेण्यं वरदं शान्तं त्रिदशार्तिहरं परम् ॥७॥

लंबकूर्च सुवर्णाभं स्वर्णयज्ञोपवीतिनम् ।
पीतवस्त्रपरीधानं मार्तण्डतिलकान्वितम् ॥८॥

चन्दनागुरु कर्पूरैः सुगंधैः शतपत्रकैः ।
संपूज्य ध्यायते यस्तु भवत्या सुदृढया नरैः ॥९॥

धनं धान्यं जयं सौख्यं सौभाग्यं नृपमान्यता ।
भवंति सर्वदा तेषां त्वत्प्रसादात्सुरैश्वर ॥१०॥

रोगाग्निसर्पचौराद्यास्तेषां न प्रभवंति हि ।
सुस्थानस्थोऽधि देशे च ध्यानात्सर्वार्थसाधकः ॥११॥

(३)

पुनः (तंत्रांतरेऽपि)

नमः सुरेन्द्रवंद्याय देवाचार्याय ते नमः ।
नमोऽत्वनंतसामर्थ्य वेदसिद्धान्त पारग ॥१॥

सदानंद नमस्तेऽस्तु नमः पीडाहराय च ।
नमो वाचस्पते तुभ्यं नमस्ते पतिवाससे ॥२॥

नमोऽद्वितीयरूपाय लंबकूर्चाय ते नमः ।
नमः प्रहृष्टनेत्राय विप्राणां पतये नमः ॥३॥

नमो भार्गवशिष्याय विपन्नहितकारक ।
नमस्ते सुरसैन्याय विपन्नत्राणहेतवे ॥४॥

विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम् ।

प्रत्यहं तु पठेद्यो वै तस्य कामफलप्रदम् ॥५॥

बृहस्पतिमंत्रो- यथा **"ॐ नमोऽस्तु बृहस्पतये पीतवस्त्राभरणाय यज्ञोपवीत मालाधराय ममार्चनं गृहाण कुरु कुरु स्वाहा"।** इति चत्वारिंशदशक्षर मंत्र:

॥ इति बृहस्पति स्तोत्राः समाप्तम् ॥

॥ बृहस्पति शान्ति प्रयोग: ॥

रोगलक्षण -

हृदय रोग, यकृत रोग, पीलिया, फेफड़े के रोग, टाइफाइड, अजीर्ण, मोतियाबिन्द, पेट के अल्सर, रक्त कैंसर , रक्तवाहिनी शिराओं में पीड़ा ॥

उपचार -

१. उक्त बृहस्पति यन्त्र को बृहस्पतिवार या पुनर्वसु, विशाखा, पूर्वा भाद्रपद नक्षत्र के दिन अष्टगन्ध से अनार की कलम से भोजपत्र पर लिखकर सोने के ताबीज में प्राण प्रतिष्ठा कर पूजन कर धारण करें।

२. केले की जड़ बृहस्पतिवार को पीले डोरे में बृहस्पति मन्त्र से अभिमन्त्रित करके बाँधने से बृहस्पति बाधा की शान्ति होती है।

३. मदयन्ती के पत्ते, मुलैठी, सफेद सरसों और मालती के फूल को जल में ड़ालकर स्नान करने से बृहस्पति बाधा की शान्ति होती है।

४. चने की दाल, हल्दी, शर्करा, पीला अन्न, पीला वस्त्र, पीले पुष्प, पुखराज, अश्व, पुस्तक, मधु, लवण, स्वर्ण, छत्र आदि का दान करने से बृहस्पति बाधा की शान्ति होती है ।

ध्यानम् - नित्य हाथ जोड़कर बृहस्पति का ध्यान इस प्रकार करें -

पीताम्बर: पीतवर्णः किरीटी, चतुर्भुजो देवगुरु : प्रशान्तः ।
तथाऽक्ष सूत्रं च कमण्डलुञ्च, दण्डञ्च विभ्रद्वरदोऽस्तु मह्यम् ॥

मंत्र - निम्न मंत्रों में से किसी एक मंत्र का नित्य जप करें।

यथा - **१ ॐ बृं बृहस्पतये नमः। २ ॐ ऐं क्लीं बृहस्पतये नमः । ३ ॐ ग्रां ग्रीं ग्रौं सः गुरवे नमः । ४ ॐ अङ्गिरसाय विद्महे दण्डायुधाय धीमहि तन्नो जीवः प्रचोदयात् ।**

(जप संख्या ७६ हजार , प्रत्येक)

॥ श्रीगुरु कवचम् ॥

शास्त्रों में लिखा है कि बृहस्पति दोपशान्ति हेतु गुरु एवं ब्राह्मणों की सेवा वन्दना करें। अतः आप अपने गुरु का स्त्रीगुरु या पुरुषगुरु हो उनके हेतु कवच एवं स्तोत्र का पाठ करें।

गुरुदेव ध्यानम्–

सहस्त्रदल पङ्कजे सकलशीत रश्मिप्रभम् ।
वराभय कराम्बुजं विमलगंधपुष्पाम्बरम् ॥
प्रसन्नवदनेक्षणं सकल - देवतारूपिणम् ।
स्मरेच्छिरसि हंसगं तदभिधान पूर्वं गुरुम् ॥

ध्यान करने के बाद पादुका मंत्र का उच्चारण कर सम्प्रदाय परम्परा से गुरुदेव के नाम का उच्चारण कर पूजा करें।

पादुका मंत्र- **ऐं ह्रीं श्रीं हसखफ्रें ह स क्ष म ल व र यूं सहखफ्रें सहक्षमलवरयीं हसौः श्रीअमुकानन्दनाथ श्रीअमुकीदेव्याम्बा श्रीगुरुपादुकां पूजयामि नमः।**

उक्त पादुकामंत्र से पूजन और जप करने के बाद वाग्भववीज "ऐं" से प्राणायामत्रय कर कुलगुरुओं का स्मरण करें-यथा-

॥ कुलगुरु स्मरणम् ॥

प्रह्लादानन्दनाथाख्यं सनकानन्दनाथकम् ।
कुमारानन्दनाथाख्यं वशिष्ठानन्दनाथकम् ॥
क्रोधानन्द सुखानन्दौ ध्यानानन्दं ततः परम् ।
बोधानान्दं ततश्चैव ध्यायेत् कुलमुखोपरि ॥
महारस रसोल्लास-हृदयाघूर्णलोचनाः ।
कुलालिङ्गन - सम्भिन्नचूर्णिताशेष - तामसाः ॥
कुलशिष्यैः परिवृताः पूर्णान्तः करणोद्यताः ।
वराभयकराः सर्वे कुलतन्त्रार्थवादिनः ॥

इसके बाद गुरुमंत्र वाग्भव वीज ऐं का १०८ बार जप करें। तदन्तर गुरुस्तोत्र और कवच का पाठ कर संयतचित्त होकर गुरुदेव को नमस्कार करें।

॥ कवच पाठः ॥

॥ देव्युवाच ॥

भूतनाथ महादेव! कवचं तस्य मे वद ।
गुरुदेवस्य देवेश! साक्षाद् ब्रह्मस्वरूपिणः ॥

॥ इश्वरोवाच ॥

अथातः कथयामीशे कवचं मोक्षदायकम् ।
यस्य ज्ञानं विना देवि! न सिद्धिर्न च सद्गतिः ॥
ब्रह्मादयोऽपि गिरिजे सर्वत्र याजिनः स्मृताः ।
अस्य प्रसादात् सकला वेदागमपुरः सराः ॥
कवचस्यास्य देवेशि! ऋषिर्विष्णुरुदाहृतः ।
छन्दो विराड् देवता च गुरुदेवः स्वयं शिवः ॥
चतुर्वर्गज्ञानमार्गे विनियोगः प्रकीर्तितः ।
सहस्त्रारे महापद्मे कर्पूरधवलो गुरुः ॥
वामोरुस्थित-शक्तिर्यः सर्वत्र परिरक्षतु ।
परमाख्यो गुरुः पातु शिरसं मम वल्लभे! ॥
परापराख्यो नासां मे परमेष्ठी मुखं सदा ।
कण्ठं मम सदा पातु प्रह्लादानन्द नाथकः ॥
बाहू द्वौ सनकानन्दः कुमारानन्दनाथकः ।
वशिष्ठानन्दनाथश्च हृदयं पातु सर्वदा ॥
क्रोधानन्दः कटिं पातु सुखानन्दः पदं मम ।
ध्यानानन्दश्च सर्वाङ्गं बोधानन्दश्च कानने ॥
सर्वत्र गुरवः पातु सर्व ईश्वररूपिणः ।
इति ते कथितं भद्रे! कवचं परमं शिवे ॥
भक्तिहीने दुराचारे दत्वैतं मृत्युमाप्नुयात् ।
अस्यैव पठनाद् देवि! धारणात् श्रवणात् प्रिये! ॥
जायते मंत्रसिद्धिश्च किमन्यत् कथयामि ते ।
कण्ठे वा दक्षिणे बाहौ शिखायां वीरवन्दिते! ॥

धारणान्नाशयेत् पापं गङ्गायां कल्मषं यथा ।
इदं कवचमज्ञात्वा यदि मंत्र जपेत् प्रिये! ॥
तत् सर्वं निष्फलं कृत्वा गुरुर्याति सुनिश्चतम् ।
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥

॥ इति कङ्कालमालिनी तंत्रे गुरु कवचम् सम्पूर्णम् ॥

॥ श्रीगुरु स्तोत्रम् ॥

॥ ॐ नमः श्रीनाथाय ॥

॥ श्रीमहादेव्युवाच ॥

गुरोरर्मन्त्रस्य देवस्य धर्मस्य तस्य एव वा ।
विशेषस्तु महादेव! तद् वदस्व दयानिधे ॥

॥ श्रीमहादेव उवाच ॥

जीवात्मनं परमात्मनं दानं ध्यानं योगो ज्ञानम् ।
उत्कलकाशीगङ्गामरणं न गुरोरधिकं न गुरोरधिकम् ॥१ ॥
प्राणं देहं गेहं राज्यं स्वर्गं भोगं योगं मुक्तिम् ।
भार्यामिष्टं पुत्रं मित्रं न गुरोरधिकं न गुरोरधिकम् ॥२ ॥
वानप्रस्थं यतिविधधर्मं पारमहंस्यं भिक्षुकचरितम् ।
साधोः सेवां बहुसुखभुक्तिं न गुरोरधिकं न गुरोरधिकम् ॥३ ॥
विष्णो भक्तिं पूजनरक्तिं वैष्णवसेवां मातरि भक्तिम् ।
विष्णोरिव पितृसेवनयोगं न गुरोरधिकं न गुरोरधिकम् ॥४ ॥
प्रत्याहारं चेन्द्रिययजनं प्राणायां न्यासविधानम् ।
इष्टे पूजा जप तपभक्तिर्न न गुरोरधिकं न गुरोरधिकम् ॥५ ॥
काली दुर्गा कमला भुवना त्रिपुरा भीमा बगला पूर्णा ।
श्रीमातङ्गी धूमा तारा न गुरोरधिकं न गुरोरधिकम् ॥६ ॥
मात्स्यं कौर्मं श्रीवाराहं नरहरिरूपं वामनचरितम् ।
नरनारायण चरितं योगं न गुरोरधिकं न गुरोरधिकम् ॥७ ॥

श्रीभृगुदेवं श्रीरघुनाथं श्रीयदुनाथं बौद्धं कल्क्यम् ।
अवतारा दश वेदविधानं न गुरोरधिकं न गुरोरधिकम् ॥८॥

गङ्गा काशी काञ्ची द्वारा मायाऽयोध्याऽवन्ती मथुरा ।
यमुना रेवा पुष्करतीर्थं न गुरोरधिकं न गुरोरधिकम् ॥९॥

गोकुलगमनं गोपुररमणं श्रीवृन्दावन-मधुपुर-रटनम् ।
एतत् सर्वं सुन्दरि! मातर्न गुरोरधिकं न गुरोरधिकम् ॥१०॥

तुलसीसेवा हरिहरभक्तिः गङ्गासागर-सङ्गममुक्तिः ।
किमपरमधिकं कृष्णेभक्तिर्न गुरोरधिकं न गुरोरधिकम् ॥११॥

एतत् स्तोत्रं पठति च नित्यं मोक्षज्ञानी सोऽपि च धन्यम् ।
ब्रह्माण्डान्तर्यद्-यद् ध्येयं न गुरोरधिकं न गुरोरधिकम् ॥१२॥

॥ वृहद्विज्ञान परमेश्वरतंत्रे त्रिपुराशिवसंवादे श्रीगुरोःस्तोत्रम् ॥

॥ स्त्रीगुरु कवचम् ॥

॥ शिव उवाच ॥

स्तोत्रं समाप्तं देवेशि! कवचं शृणु सादरम् ।
यस्य स्मरण मात्रेण वागीश समतां व्रजेत् ॥

स्त्रीगुरु कवचस्यास्य सदाशिव ऋषिः स्मृतः ।
तवाख्या देवता ख्याता चतुर्वर्गफलप्रदा ॥

क्लीं बीजं चक्षुषोर्मध्ये सर्वाङ्गे मे सदाऽवतु ।
ऐं बीजं मे मुखं पातु ह्रीं जिह्वां परिरक्षतु ॥

श्रीं बीजं स्कन्धदेशं मे हसखफ्रें भुजद्वयम् ।
हकारः कण्ठ देशं मे सकारः षोडशं दलम् ॥

क्ष-वर्णस्तदधः पातु लकारो हृदयं मम ।
वकारः पृष्ठदेशं च रकारो दक्षपार्श्वकम् ॥

युङ्कारो वामपार्श्वं च सकारो मेरुमेव च ।
हकरो मे दक्षभुजं क्षकारो वामहस्तकम् ॥

मकारश्चांगुलि पातु लकारो मे नखं वतु ।
वकारो मे नितम्बं च रकारो जठरं वतु ॥
यीङ्कारः पाद युगलं हसौः सर्वाङ्गमेव च ।
हसौर्लिङ्गं च लोमानि केशं च परिरक्षतु ॥
ऐं वीजं पातु पूर्वे मे ह्रीं वीजं दक्षिणे वतु ।
श्री वीजं पश्चिमे पातु उत्तरे भूतसम्भवम् ॥
श्रीं पातु अग्निकोणे च वेदाख्या नैर्ऋते वतु ।
देव्यम्बा पातु वायव्यां शम्भौ श्रीपादुका तथा ॥
पूजयामि तथा चोर्ध्वं नमश्चाधः सदाऽवतु ।
इति ते कथितं कान्ते! कवचं परमाद्भुतम् ॥
गुरुमन्त्रं जपित्वा तु कवचं प्रपठेद् यदि ।
स सिद्धः सगणः सोऽपि शिव न संशयः ॥
पूजा काले पठेद् यस्तु कवचं मंत्रविग्रहं ।
पूजाफलं भवेत् तस्य सत्यं सत्यं सुरेश्वरि ॥
त्रिसन्ध्यं यः पठेद् देवि स सिद्धौ नात्र संशयः ।
भुर्जे विलिखितं चैव स्वर्णस्थं धारयेद् यदि ॥
तस्य दर्शन मात्रेण वादिनो निष्प्रभां गताः ।
विवादे जयमाप्नोति रणे च निर्ऋतेः समः ॥
सभायां जयमाप्नोति मम तुल्यो न संशयः ।
सहस्त्रारे भावयन् तां त्रिसंध्यं प्रपठेद् यदि ॥
स एव सिद्धो लोकेषु निर्वाणं पदमीयते ।
समस्त मंगलं नाम कवचं परमाद्भुतम् ॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
देयं शिष्याय शान्ताय चान्यथा पतनं भवेत् ॥
अभक्तेभ्यश्च देवेशि! पुत्रेभ्योऽपि न दर्शयेत् ।
इदं कवचमज्ञात्वा दशविद्यां च यो जपेत् ॥
स नाप्नोति फलं तस्य चान्ते च नरकं व्रजेत् ।

॥ इति मातृकाभेद तंत्रे स्त्रीगुरु कवचम् ॥

॥ स्त्रीगुरु स्तोत्रम् ॥

नमस्ते देव-देवेशि! नमस्ते हरपूजिते! ।
ब्रह्मविद्यास्वरूपायै तस्यै नित्यं नमो नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जन-शलाकया ।
यया चक्षुरुन्मीलितं तस्यै नित्यं नमो नमः ॥
भवबंधन पाशस्य तारिणी जननी परा ।
ज्ञानदा मोक्षदा नित्या तस्यै नित्यं नमो नमः ॥
श्रीनाथवामभागस्था सदया सुरपूजिता ।
सदाविज्ञानदात्री च तस्यै नित्यं नमो नमः ॥
सहस्त्रारे महापद्मे सदाऽऽनन्दस्वरूपिणी ।
महामोक्षप्रदा देवि तस्यै नित्यं नमो नमः ॥
ब्रह्माविष्णुस्वरूपा च महारुद्रस्वरूपिणी ।
त्रिगुणात्मस्वरूपा च सदा घूर्णितलोचना ।
स्व-नाथं च समालिङ्ग्य तस्यै नित्यं नमो नमः ॥
ब्रह्मविष्णुशिवत्वादि - जीवन्मुक्तिप्रदायिनी ।
ज्ञानविज्ञानदात्री च तस्यै श्रीगुरवे नमः ॥

॥ श्रीमातृकाभेदतन्त्रे हरपार्वती संवादे स्त्रीगुरोः स्तोत्रम् ॥

॥ श्रीबृहस्पति अष्टोत्तरशत नामावली ॥

ॐ वृं गुरवे नमः ।
ॐ वृं गुणवराय नमः ।
ॐ वृं गोप्त्रे नमः ।
ॐ वृं गोचराय नमः ।
ॐ वृं गो-पतिप्रियाय नमः ।
ॐ वृं गुणिने नमः ।
ॐ वृं गुणवतां श्रेष्ठाय नमः ।
ॐ वृं गुरुणां गुरवे नमः ।
ॐ वृं अव्ययाय नमः ।
ॐ वृं जेत्रे नमः ।
ॐ वृं जयन्ताय नमः ।
ॐ वृं जयदाय नमः ।

ॐ वृं जीवाय नमः।
ॐ वृं अनन्ताय नमः।
ॐ वृं जयावहाय नमः।
ॐ वृं आङ्गीरसाय नमः।
ॐ वृं अध्वरासक्ताय नमः।
ॐ वृं विविक्ताय नमः।
ॐ वृं अध्वरकृत्पराय नमः।
ॐ वृं वाचस्पतये नमः।
ॐ वृं वशिने नमः।
ॐ वृं वश्याय नमः।
ॐ वृं वरिष्ठाय नमः।
ॐ वृं वाग्विचक्षणाय नमः।
ॐ वृं चित्तशुद्धिकराय नमः।
ॐ वृं श्रीमते नमः।
ॐ वृं चैत्राय नमः।
ॐ वृं चित्रशिखण्डिजाय नमः।
ॐ वृं बृहद्रथाय नमः।
ॐ वृं बृहद्भानवे नमः।
ॐ वृं वृहस्पतये नमः।
ॐ वृं अभीष्टदाय नमः।
ॐ वृं सुराचार्याय नमः।
ॐ वृं सुराध्यक्षाय नमः।
ॐ वृं सुरकार्यहितकराय नमः।
ॐ वृं गीर्वाणपोषकाय नमः।
ॐ वृं धन्याय नमः।

ॐ वृं गीष्पतये नमः।
ॐ वृं गिरीशाय नमः।
ॐ वृं अनघाय नमः।
ॐ वृं धीवराय नमः।
ॐ वृं दिव्यभूषणाय नमः।
ॐ वृं देवपूजिताय नमः।
ॐ वृं धनुर्धराय नमः।
ॐ वृं दैत्यहन्त्रे नमः।
ॐ वृं दयासाराय नमः।
ॐ वृं दयाकराय नमः।
ॐ वृं दारिद्र्यविनाशनाय नमः।
ॐ वृं धन्याय नमः।
ॐ वृं धिषणाय नमः।
ॐ वृं दक्षिणायनसम्भवाय नमः।
ॐ वृं धनुर्वीराधिपाय नमः।
ॐ वृं देवाय नमः।
ॐ वृं धनुर्बाणधराय नमः।
ॐ वृं हरये नमः।
ॐ वृं अङ्गीरसाब्दसञ्जाताय नमः।
ॐ वृं अंगिरसकुलोद्धवाय नमः।
ॐ वृं सिन्धुदेशाधिपाय नमः।
ॐ वृं धीमते नमः।
ॐ वृं स्वर्णकायाय नमः।
ॐ वृं चतुर्भुजाय नमः।
ॐ वृं हेमाङ्गदाय नमः।

ॐ वृं हेमवपुषे नमः।
ॐ वृं हेमभूषणभूषिताय नमः।
ॐ वृं पुष्यनाथाय नमः।
ॐ वृं पुष्यरागमणि मण्डनमण्डिताय नमः।
ॐ वृं काशपुष्पसमानाभाय नमः।
ॐ वृं कलिदोषनिवारकाय नमः।
ॐ वृं इन्द्रादिदेवदेवेशाय नमः।
ॐ वृं देवताऽभीष्टदायकाय नमः।
ॐ वृं असमानबलाय नमः।
ॐ वृं सत्त्वगुणसम्पद्विभावसवे नमः।
ॐ वृं भूसुराभीष्टफलदाय नमः।
ॐ वृं भूरियशसे नमः।
ॐ वृं पुण्यविवर्धनाय नमः।
ॐ वृं धर्मरूपाय नमः।
ॐ वृं धनाध्यक्षाय नमः।
ॐ वृं धनदाय नमः।
ॐ वृं धर्मपालनाय नमः।
ॐ वृं सर्वदेवतार्थतत्त्वज्ञाय नमः।
ॐ वृं सर्वापद्विनिवारकाय नमः।
ॐ वृं सर्वपापप्रशमनाय नमः।
ॐ वृं स्वमतानुगतामराय नमः।
ॐ वृं ऋग्वेदपारगाय नमः।

ॐ वृं सदानन्दाय नमः।
ॐ वृं सत्यसन्धाय नमः।
ॐ वृं सत्यसङ्कल्प मानसाय नमः।
ॐ वृं सर्वागमज्ञाय नमः।
ॐ वृं सर्वज्ञाय नमः।
ॐ वृं सर्ववेदान्तविदुषे नमः।
ॐ वृं ब्रह्मपुत्राय नमः।
ॐ वृं ब्राह्मणेशाय नमः।
ॐ वृं ब्रह्मविद्याविशारदाय नमः।
ॐ वृं समानाधिक निर्मुक्ताय नमः।
ॐ वृं सर्वलोक वशंकराय नमः।
ॐ वृं सुरासुरगन्धर्ववन्दिताय नमः।
ॐ वृं सत्यभाषणाय नमः।
ॐ वृं सुराचार्याय नमः।
ॐ वृं दयावते नमः।
ॐ वृं शुभलक्षणाय नमः।
ॐ वृं लोकत्रयगुरवे नमः।
ॐ वृं श्रीमते नमः।
ॐ वृं सर्वगाय नमः।
ॐ वृं सर्वतोविभवे नमः।
ॐ वृं सर्वेशाय नमः।
ॐ वृं सर्वदा तुष्टाय नमः।
ॐ वृं सर्वगाय नमः।
ॐ वृं सर्वपूजिताय नमः।

॥ श्रीशुक्रतन्त्रम् ॥

॥ अथ शुक्रवैदिकमंत्र प्रयोगः॥

मंत्रः-

ॐ अन्नात्परिस्त्रुतोरसं ब्रह्मणाव्यपिबत्
क्षत्रम्पयः सोमम्प्रजापतिः ।
ऋतेनसत्यमिंद्रियंव्विपानठं. शुक्रमन्धस
ऽइंद्रस्येंद्रियमिदम्पयोमृतम्मधु ॥१ ॥

विनियोगः- ॐ अन्नात्परिस्त्रुत इति मन्त्रस्य पराशर ऋषिः। शक्वरी छन्दः। शुक्रो देवता। रसं ब्रह्मणा इति बीजम्। शुक्रप्रीत्यर्थे जपे विनियोगः।

हृदयादि न्यासः- ॐ पराशर ऋषये नमः शिरसि ॥१ ॥ ॐ शक्वरीछन्दसे नमः मुखे ॥२ ॥ ॐ शुक्रदेवतायै नमः हृदये ॥३ ॥ ॐ रसंब्रह्मणा इति बीजाय नमः गुह्ये ॥४ ॥ विनियोगाय नमः सर्वाङ्गे ॥५ ॥

करन्यासः- ॐ अन्नात्परिस्त्रुत इत्यङ्गुष्ठाभ्यां नमः ॥१ ॥ ॐ रसंब्रह्मणा व्यपिबत् इति तर्जनीभ्यां नमः ॥२ ॥ ॐ क्षत्रंपय इति मध्यमाभ्यां नमः ॥३ ॥ ॐ सोमं प्रजापतिरित्यनामिकाभ्यां नमः ॥४ ॥ ॐ ऋतेनसत्यमिंद्रियंव्विपानठं.शुक्रमंधसः कनिष्ठि काभ्यां नमः ॥५ ॥ ॐ इंद्रस्येंद्रियमिदंपयोमृतंमधु इति करतलकरपृष्ठाभ्यां नमः ॥६ ॥ इति करन्यासः।

हृदयादिन्यासः- ॐ अन्नात्परिस्त्रुतो हृदयाय नमः ॥१ ॥ ॐ रसंब्रह्मणा व्यपिबत् शिरसे स्वाहा ॥२ ॥ ॐ क्षत्रंपयः शिखायै वषट् ॥३ ॥ ॐ सोमं प्रजापतिरिति कवचाय हुं ॥४ ॥ ॐ ऋतेनसत्यमिंद्रियंव्विपानठं.शुक्रमंधसो नेत्रत्रयाय वौषट् ॥५ ॥ ॐ इन्द्रस्येंद्रियमिदंपयोमृतम्मधु इत्यस्त्राय फट् ॥६ ॥ इति हृदयादिन्यासः।

मन्त्रन्यासः - ॐ अन्नात्परिस्त्रुत इति शिरसि ॥१॥ ॐ रसंब्रह्मणा ललाटे ।।२॥ ॐ व्यपिबत्क्षत्रं मुखे ॥३॥ॐ पयः सोमं हृदये ॥४॥ ॐ प्रजापतिर्नाभौ ॥५॥ ॐ ऋतेनसत्यं कट्याम् ॥६॥ ॐ इंद्रियंविपानम् गुदे ॥७॥ ॐ शुक्रं वृषणयोः ॥८॥ ॐ अन्धस ऊर्वोः ॥९॥ ॐ इन्द्रस्येंद्रियमिदम्पयो जानुनोः ॥१०॥ ॐ अमृतं पादयोः ॥११॥ ॐ मधु सर्वशरीरे च ॥१२॥ न्यसेत् ॥

इति मन्त्रन्यासः। एवं न्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्—

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः ।
तथाक्षसूत्रं च कमंडलुं च दण्डं च बिभ्रद्वरदोऽस्तु मह्यम् ॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्य्यात् ।

शुक्रे एकादशैव तु इति जपसंख्या ११०००।

अथ दानद्रव्याणि—

चित्रांबरं शुभ्रतुरङ्गमश्च धेनुश्च वज्रं रजतं सुवर्णम् ।
सुतंडुलानुत्तमगंधयुक्तान् वदंति दानं भृगुनन्दनाय ॥३॥

॥ इति शुक्रमन्त्रजपप्रयोगः ॥

॥ शुक्र तांत्रिक मंत्राः॥

१ सप्ताक्षरी मंत्रः- ॐ शुं शुक्राय नमः।

२ नवाक्षरी मंत्रः- ॐ शुं शुक्राय नमः स्वाहा।

इस मंत्र के ऋषि ब्रह्मा। छन्द पंक्ति। देवता शुक्र। बीज- शुं। तथा शक्ति स्वाहा है।

ध्यानम्—

सन्तप्त कांचननिभं द्विभुजं दयालुं
पीताम्बरं धृत सरोरुह केशयुग्मम् ।
क्रौञ्चासनं असुर सेवितं पादपद्मं शुक्रं
भजे द्विनयनं हृदि पङ्कजेऽहम् ॥

दशाक्षर मंत्रः- ॐ द्रां द्रीं द्रौं सः शुक्राय नमः।

अन्यच्च- ॐ ह्रां ह्रीं ह्रौं सं शुक्राय स्वाहा।

अन्य मंत्रः- ब वस्त्रं मे देहि शुक्र स्वाहा।

ध्यानम्—

वासो रत्नादि कार्तस्वरमपि सततं साधकाय प्रयच्छन्।
व्याख्यानमुद्रा कलितकर वर स्वपाणालिन्द-संस्थः॥

एकादशाक्षरी मंत्रः (मंत्रमहौदधौ)- ॐ वस्त्रं मे देहि शुक्राय स्वाहा।

अस्य विधानम्—

विनियोगः- **ॐ अस्य शुक्रमंत्रस्य ब्रह्मा ऋषिः। विराट् छन्दः। दैत्य पूज्यः शुक्रो देवता। ॐ बीजम्। स्वाहा शक्तिः। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादि न्यासः- **ॐ ब्रह्म ऋषये नमः शिरसि॥१॥ विराट् छन्दसे नमः मुखे॥२॥ दैत्यपूज्य शुक्र देवतायै नमः हृदि॥३॥ ॐ बीजाय नमः गुह्ये॥४॥ स्वाहा शक्तये नमः पादयोः॥५॥ विनियोगाय नमः सर्वाङ्गे॥६॥**

हृदयादि षडंगन्यासः- **ॐ हृदयाय नमः। वस्त्रं शिरसे स्वाहा। मे शिखायै वषट्। देहि कवचाय हुं। शुक्राय नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।**

इसी प्रकार कराङ्गन्यास करें। इस प्रकार न्यास विधि करके ध्यान करें-

ध्यानम्—

श्वेतांभोजनिषण्णमापणतटे श्वेतांबरालेपनं नित्यं -
भक्तजनाय संप्रददतं वासो मणीन् हाटकम्।
वामेनैव करेण दक्षिणकरे व्याख्यानमुद्रांकितं
शुक्रं दैत्यवरार्चितं स्मितमुखं वंदे सितांगं प्रभुम्॥१॥

॥ यंत्रपूजनम्॥

इस प्रकार ध्यान करे। यंत्र मध्य धर्मादिपीठ देवताओं का पूजन करें-

पूर्वादि चारों दिशाओं में- **ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ ऐश्वर्याय नमः।** आग्नेयादि चारों कोणो में- **ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ अवैराग्याय नमः। ॐ अनैश्वर्याय नमः।**

षट्कोण में हृदयादिन्यास मन्त्रों से आवाहन करें अथवा निम्न विधि से करें-

शुक्र पूजन यंत्रम्

प्रथमावरणम्- (षट्कोणे)- **ॐ शां हृदयाय नमः। श्रीपादुकां पूजयामि तर्पयामि। ॐ शीं शिरशक्त्यै नमः। ॐ शूं शिखाशक्त्यै नमः श्रीपा०। ॐ शें कवचशक्त्यै नमः श्रीपा०। ॐ शौं नेत्रत्रयशक्त्यै नमः श्रीपा०। ॐ शः अस्त्रशक्त्यै नमः श्रीपा०।**

द्वितीयावरणम्-(अष्टदले)पूर्वादिक्रमेण- **ॐ भार्गव श्रेष्ठाय नमः। ॐ दानव पूजिताय नमः। ॐ वृष्टिकर्त्रे नमः। ॐ वेदवेदाङ्ग पारगाय नमः। ॐ लोकशङ्कराय नमः। ॐ मंगलरूपाय नमः। ॐ कविनन्दनाय नमः। ॐ गीर्वाणवंदिताय नमः।**

तृतीयावरणम् में इन्द्रादि लोकपालों का पूजन भूपूर में करें।

चतुर्थावरणम्- भूपूर में दिक्पालों के वज्रादि आयुधों का पूजन करें।

पुष्पाञ्जलि मंत्र-

अभिष्ट सिद्धि मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं अमुकावरणार्चनम् ॥

जप करके श्वेत पुष्पो से शुक्रवार को होम करें। अभीष्ट सिद्धि होवें।

॥ अथ शुक्रअन्यमंत्रप्रयोगः॥

(मंत्रमहोदद्यौ) मंत्रो यथा- **''ॐ वस्त्रं मे देहि शुक्राय स्वाहा''** । इत्येकादशाक्षरो मंत्रः ॥

विनियोगः- **अस्य मंत्रस्य ब्रह्मा ऋषिः। विराट् छन्दः। दैत्यपूज्यः शुक्रो देवता॥ ॐ बीजम्। स्वाहा शक्तिः। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादि न्यासः- **ब्रह्मऋषये नमः, शिरसि॥१॥ विराट्छंदसे नमः, मुखे॥२॥ दैत्यपूज्यशुक्रदेवतायै नमः, हृदि॥३॥ ॐ बीजाय नमः, गुह्ये॥४॥ स्वाहा शक्तये नमः, पादयोः॥५॥ विनियोगाय नमः, सर्वाङ्गे॥६॥** इति ऋष्यादिन्यासः।

हृदयादि षडंगन्यास- **ॐ हृदयाय नमः॥१॥ वस्त्रं शिरसे स्वाहा॥२॥ मे शिखायै वषट्॥३॥ देहि कवचाय हुम्॥४॥ शुक्राय नेत्रत्रयाय वौषट्॥५॥ स्वाहा अस्त्राय फट्॥६॥** इति हृदयादि षडंगन्यासः॥

एवमेव करांग न्यासं कुर्यात् एवं न्यासविधिं कृत्वा ध्यायेत्।

अथ ध्यानम्—

श्वेतांभोजनिषण्णमापणतटे श्वेतांबरालेपनं नित्यं
भक्तजनाय संप्रददतं वासो मणीन् हाटकम्।
वामेनैव करेण दक्षिणकरे व्याख्यानमुद्रांकितं
शुक्रं दैत्यवरार्चितं स्मितमुखं वंदे सितांगं प्रभुम्॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य सर्वतोभद्रमंडले धर्मादिपरतत्त्वांत पीठदेवताः पूजयेत्। ततः स्वर्णादिनिर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्यपुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य मूलेन मूर्ति प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्य्यात्।

प्रथमावरणम् - षट्कोणकेसरेषु- **आग्नेय्यादिचतुर्दिक्षु मध्येदिक्षु च पूर्वोक्तषडंगन्यास मंत्रेण षडंगानि पूजयेत्॥**

जो हृदयादिन्यास दिये गये हैं उनके मन्त्रों से षट्कोण में पूजा करें।

ततः पुष्पांजलिमादाय मूलमुच्चार्य-

अभिष्ट सिद्धि मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति पठित्वा पुष्पांजलिं च दत्त्वा पूजिताः सर्पिताः सन्तु इति वदेत्॥ इति प्रथमावरणार्चनम्॥

द्वितीयावरणम् - ततो भूपूरे इन्द्रादि दशदिक्पालान् वज्राद्यायुधानि च संपूज्य जपं कुर्यात्।

अस्य पुरश्चरणमयुतजपः। तद्दशांशतो घृतहोमः। एवं कृते मंत्रः सिद्धोभवति। सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्।

तथा च-

अयुतंप्रजपेन्मंत्रं दशांशं जुहुयाद्घृतैः ।
सिद्धे मंत्री प्रकुर्वीत प्रयोगानिष्टसिद्धये ॥१॥
सुगंधैः श्वेतकुसुमैर्जुहुयाच्छुभवासरे ।
एकविंशतिवारं यो लभते सोंऽशुकं मणीन् ॥२॥

(इत्येकादशाक्षरशुक्रमंत्रप्रयोगः)

॥ श्री शुक्र स्तवराज स्तोत्रम्॥

विनियोगः- **ॐ अस्य श्री शुक्रस्तवराज स्तोत्रस्य प्रजापतिः ऋषिः, अनुष्टुप् छन्दः, श्रीशुक्रः देवता, श्रीशुक्र प्रीत्यर्थे पाठे विनियोगः।**

ऋष्यादिन्यासः- **शिरसि प्रजापति ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीशुक्रदेवतायै नमः। सर्वाङ्गे श्रीशुक्र-प्रीत्यर्थे पाठे विनियोगाय नमः।**

॥ स्तोत्र पाठ ॥

नमस्ते भार्गव श्रेष्ठः दैत्य दानव पूजितः ।
वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमो नमः ॥
देवयानि पितस्तुभ्यं वेद वेदाङ्ग पारगः ।

परेण तपसा शुद्धः शंकरो लोकसुन्दरः ॥
प्राप्तौ विद्यां जीवनाख्यां तस्मै शुक्रात्मने नमः ।
नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥
तारामण्डलमध्यस्थः स्व-भासामिताम्बरः ।
यस्योदये जगत् सर्वं मङ्गलार्हं भवेदिह ॥
अस्तं याते ह्यरिष्टं स्यात् तस्मै मङ्गलरूपिणे ।
त्रिपुरा वासिनो दैत्यान् शिवबाण प्रपीडितान् ॥
विद्ययाऽजीवयच्छुक्रो नमस्ते भृगुनन्दनः ।
ययाति-गुरवे तुभ्यं नमस्ते कविनन्दनः ॥
बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नमः ।
भार्गवाय नमस्तुभ्यं पूर्वगीर्वाणवन्दितः ॥
जीव पुत्राय यो विद्यां प्रदात् तस्मै नमो नमः ।
नमः शुक्राय काव्याय भृगुपुत्राय धीमहि ॥
नमः कारणरूपाय नमस्ते कारणात्मने ।

॥ फलश्रुति ॥

स्तवराजमिमं पुण्यं भार्गवस्य महात्मनः ।
यः पठेच्छृणुयाद् वापि लभते वाञ्छितं फलम् ॥
पुत्रकामो लभेत् पुत्रान् श्रीकामो लभते श्रियम् ।
राज्यकामो लभेद् राज्यं स्त्रीकामोस्त्रियमुत्तमाम् ॥
भृगुवारे प्रयत्नेन पठितव्यं समाहितैः ।
अन्यवारे तु होरायां पूजयेत् भृगुनन्दनम् ॥
रोगार्तो मुच्यते रोगात् भयार्तो मुच्यते भयात् ।
यद्यत् प्रार्थयते जन्तुस्तत्तत् प्राप्नोति सर्वदा ॥
प्रातः काले प्रकर्तव्या भृगु पूजा प्रयत्नतः ।
सर्वपापविनिर्मुक्तः प्राप्नुयाच्छिवसन्निधिम् ॥

॥ इति श्री ब्रह्मयामले श्रीशुक्र स्तवराज स्तोत्रम् ॥

॥ श्रीशुक्र नामावलिस्तोत्रम् ॥

विनियोगः- ॐ अस्य श्री शुक्र स्तोत्रस्य भरद्वाज ऋषिः, गायत्री छन्दः, श्रीशुक्रः देवता, श्रीशुक्र-पीड़ा-परिहारार्थे विनियोगः।

ऋष्यादि न्यासः- शिरसि भरद्वाज ऋषये नमः। मुखे गायत्री छन्दसे नमः। हृदि श्रीशुक्र-देवतायै नमः। सर्वाङ्गे शुक्र पीड़ा-परिहारार्थे विनियोगाय नमः।

॥ स्तोत्र पाठ ॥

शुक्रः काव्यः शुक्र रेता शुक्लाम्बरधरः सुधीः ।
हिमाभः कुन्दधवलः शुभ्रांशुः शुक्लभूषणः ॥
नीतिज्ञो नीतिकृन्नीति मार्गगामी ग्रहाधिपः ।
उशना वेद वेदाङ्ग पारगः कविरात्म-वित् ॥
भार्गवः करुणा सिन्धुर्ज्ञान गम्यः सुतप्रदः ।

॥ फलश्रुति ॥

शुक्रस्यैतानि नामानि शुक्रं स्मृत्वा तु यः पठेत् ।
आयुर्धनं सुखं पुत्रं लक्ष्मीं वसतिमुत्तमाम् ॥
विद्यां चैव स्वयं तस्मै शुक्रस्तुष्टो ददाति च ॥

॥ श्रीस्कंद पुराणे श्रीशुक्र स्तोत्रम् ॥

॥ श्री शुक्र कवचम् ॥

विनियोगः- ॐ अस्य श्री शुक्र कवचस्य भरद्वाज ऋषिः, अनुष्टुप् छन्दः, श्रीशुक्रः देवता, श्रीशुक्र प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः- शिरसि भरद्वाज ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीशुक्रदेवतायै नमः। सर्वाङ्गे श्रीशुक्र प्रीत्यर्थे पाठे विनियोगाय नमः।

ध्यानम्-

मृणाल कुन्देन्दु-पयोज सुप्रभं
पीताम्बरं प्रसृतमक्षमालिनम् ।

समस्त शास्त्रार्थनिधिं महान्तं
ध्यायेत् कविं वाञ्छितमर्थ सिद्धये ॥

॥ कवच पाठ ॥

शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः ।
नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः ॥
पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः ।
जिह्वां मे चोशना पातु कण्ठं श्रीकण्ठ-भक्तिमान् ॥
भुजौ तेजोनिधिः पातु कुक्षिं पातु मनोव्रजः ।
नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः ॥
कटिं मे पातु विश्वात्मा ऊरू मे सुरपूजितः ।
जानू जाड्यहरः पातु जङ्घे ज्ञानवतां बरः ॥
गुल्फौ गुणनिधिः पातु पातु पादौ वरां वरः ।
सर्वाण्यङ्गानि मे पातु स्वर्णमालापरिष्कृतः ॥

॥ फलश्रुति ॥

य इदं कवचं दिव्यं पठति श्रद्धयाऽन्वितः ।
न तस्य जायते पीड़ा भार्गवस्य प्रसादतः ॥

॥ इति श्रीब्रह्माण्ड पुराणे श्रीशुक्र कवचम् ॥

॥ शुक्रशान्ति प्रयोगः ॥

रोगलक्षण -

त्वचा रोग, त्वचा पर छाले , नीलें- काले धब्बे, एग्जिमा, डिम्बाशय रोग, गुप्त रोग, मधुमेह, नेत्र रोग, मोतियाबिन्द, रक्ताल्पता।

उपचार -

१. उक्त शुक्रयन्त्र को शुक्रवार या भरणी पूर्वा फाल्गुनी या पूर्वाषाढ़ा नक्षत्र के दिन अष्टगन्ध से अनार की कलम से भोजपत्र पर लिखकर चाँदी के ताबीज में प्राणप्रतिष्ठा एवं पूजन कर धारण करें।

२. सिंह पुच्छ अथवा सरपोंखा को [illegible]

से अभिमन्त्रित करके बाँधने से शुक्र बाधा की शान्ति होती है।

३. मूल सहित हरड़, बहेड़ा, आँवला, इलायची, केशर और मैनसिल को जल में डालकर स्नान करने से शुक्र बाधा की शान्ति होती है।

४. चाँदी, चावल, मिश्री, दूध, श्वेत पुष्प, श्वेतवस्त्र, श्वेतचन्दन, दही, सुगन्धित वस्तुऐं, हीरा, श्वेतगाय, श्वेतघोड़ा आदि का दान करने से शुक्र बाधा की शान्ति होती है ।

ध्यान नित्य हाथ जोड़कर शुक्र का ध्यान इस प्रकार करें –

श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरु : प्रशान्तः ।
तथाऽक्ष सूत्रञ्च कमण्डलुं च, दण्डं च विभ्रद्वरदोऽस्तु मह्यम् ॥

निम्न मंत्रों में से किसी एक मंत्र का नित्य जप करें।

विविध मन्त्राः – १ ॐ शुं शुक्राय नमः । २ ॐ ह्रीं श्रीं शुक्राय नमः । ३ॐ द्रां द्रीं द्रौं सः शुक्राय नमः।

शुक्रगायत्री – ४ ॐ भृगु वंश जाताय विद्महे श्वेत वाहनाय धीमहि तन्नो कविः प्रचोदयात् ।

(जप – संख्या – ६४ हजार, प्रत्येक)

॥ श्रीशुक्र अष्टोत्तरशत नामावली ॥

ॐ शुं शुक्राय नमः।
ॐ शुं शुचये नमः।
ॐ शुं शुभगुणाय नमः।
ॐ शुं शुभदाय नमः।
ॐ शुं शुभलक्षणाय नमः।
ॐ शुं शोभनाक्षाय नमः।
ॐ शुं शुभग्रहाय नमः।
ॐ शुं शुभ्रवाहाय नमः।
ॐ शुं शुद्धस्फटिकभास्वराय नमः।
ॐ शुं दीनार्तिहराय नमः।
ॐ शुं दैत्यगुरवे नमः।
ॐ शुं देवाभिनन्दिताय नमः।
ॐ शुं काव्यासक्ताय नमः।
ॐ शुं कामपालाय नमः।
ॐ शुं कवये नमः।
ॐ शुं कल्याणदायकाय नमः।
ॐ शुं भद्रमूर्तये नमः।
ॐ शुं भद्रगुणाय नमः।

ॐ शुं भार्गवाय नमः।
ॐ शुं भक्तपालनाय नमः।
ॐ शुं भोगदाय नमः।
ॐ शुं भुवनाध्यक्षाय नमः।
ॐ शुं चारुशीलाय नमः।
ॐ शुं चारुचन्द्र
-निभाननाय नमः।
ॐ शुं निधये नमः।
ॐ शुं निखिलशास्त्रज्ञाय नमः।
ॐ शुं नीतिविद्याधुरन्धराय नमः।
ॐ शुं सर्वलक्षणसम्पन्नाय नमः।
ॐ शुं सर्वपूजिताय नमः।
ॐ शुं सर्वावगुण वर्जिताय नमः।
ॐ शुं समानाधिक निर्मुक्ताय नमः।
ॐ शुं सकलागम पारगाय नमः।
ॐ शुं भृगवे नमः।
ॐ शुं भोगकराय नमः।
ॐ शुं भूसुरपालन तत्पराय नमः।
ॐ शुं मनस्विने नमः।
ॐ शुं मानदाय नमः।
ॐ शुं मान्याय नमः।
ॐ शुं मायातीताय नमः।
ॐ शुं महाशयाय नमः।
ॐ शुं बलिप्रसन्नाय नमः।
ॐ शुं अभयदाय नमः।

ॐ शुं बलिने नमः।
ॐ शुं बलपराक्रमाय नमः।
ॐ शुं भवपाशपरित्यागाय नमः।
ॐ शुं बलिबन्धविमोचनाय नमः।
ॐ शुं धनाशयाय नमः।
ॐ शुं धनाध्यक्षाय नमः।
ॐ शुं कम्बुग्रीवाय नमः।
ॐ शुं कलाधराय नमः।
ॐ शुं कारुण्यरसपूर्णाय नमः।
ॐ शुं कल्याणगुणवर्धनाय नमः।
ॐ शुं श्वेताम्बराय नमः।
ॐ शुं श्वेतवपुषे नमः।
ॐ शुं चतुर्भुज समन्विताय नमः।
ॐ शुं अक्षमालाधराय नमः।
ॐ शुं अचिन्त्याय नमः।
ॐ शुं अक्षीणगुणभासुराय नमः।
ॐ शुं नक्षत्रगणसञ्चाराय नमः।
ॐ शुं नयदाय नमः।
ॐ शुं नीतिमार्गदाय नमः।
ॐ शुं वर्षप्रदाय नमः।
ॐ शुं हृषीकेशाय नमः।
ॐ शुं क्लेशनाशकराय नमः।
ॐ शुं कवये नमः।
ॐ शुं चिन्तितार्थप्रदाय नमः।
ॐ शुं शान्तिमते नमः।

ॐ शुं चित्तसमाधिकृते नमः।
ॐ शुं आधिव्याधिहराय नमः।
ॐ शुं भूरिविक्रमाय नमः।
ॐ शुं पुण्यदायकाय नमः।
ॐ शुं पुराणपुरुषाय नमः।
ॐ शुं पूज्याय नमः।
ॐ शुं पुरुहूतादिसन्नुताय नमः।
ॐ शुं अजेयाय नमः।
ॐ शुं विजितारातये नमः।
ॐ शुं विविधाभरणोज्ज्वलाय नमः।
ॐ शुं कुन्दपुष्पप्रतीकाशाय नमः।
ॐ शुं मन्दहासाय नमः।
ॐ शुं महामनसे नमः।
ॐ शुं मुक्ताफल समानाभाय नमः।
ॐ शुं मुक्तिदाय नमः।
ॐ शुं मुनिसन्नुताय नमः।
ॐ शुं रत्नसिंहासनारूढाय नमः।
ॐ शुं रथस्थाय नमः।
ॐ शुं रजतप्रभाय नमः।
ॐ शुं सूर्यप्राग्-देशसञ्चाराय नमः।
ॐ शुं सुरशत्रुसुहृदे नमः।
ॐ शुं कशये नमः।
ॐ शुं तुलावृषभराशीशाय नमः।
ॐ शुं दुर्धराय नमः।
ॐ शुं धर्मपालनाय नमः।
ॐ शुं भाग्यदाय नमः।
ॐ शुं भव्यचारित्राय नमः।
ॐ शुं भवबन्धविमोचनाय नमः।
ॐ शुं गौडदेशेश्वराय नमः।
ॐ शुं गोप्त्रे नमः।
ॐ शुं गुणिने नमः।
ॐ शुं गुणविभूषणाय नमः।
ॐ शुं ज्येष्ठानक्षत्रसम्भूताय नमः।
ॐ शुं ज्येष्ठाय नमः।
ॐ शुं श्रेष्ठाय नमः।
ॐ शुं शुचिस्थिताय नमः।
ॐ शुं अपवर्गप्रदाय नमः।
ॐ शुं अनन्ताय नमः।
ॐ शुं सन्तानफल दायकाय नमः।
ॐ शुं सर्वैश्वर्यप्रदायकाय नमः।
ॐ शुं सर्वगीर्वाणसन्नुताय नमः।

॥ इति श्रीशुक्र अष्टोत्तरशत नामावली ॥

॥ श्री शनितन्त्रम् ॥

॥ अथ शनैश्चरवैदिक मन्त्रप्रयोगः॥

मंत्रः-

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्त्रवन्तुनः।

विनियोगः- ॐ शन्नोदेवीरिति मंत्रस्य दध्यङ्ङथर्वण ऋषिः। गायत्री छन्दः। शनिर्देवता। आपो बीजम्। वर्तमान इति शक्तिः। शनैश्चरप्रीत्यर्थे जपे विनियोगः॥

ऋष्यादि न्यासः- ॐ दध्यङ्ङथर्वणऋषये नमः शिरसि॥१॥ ॐ गायत्रीछंदसे नमः मुखे॥२॥ ॐ शनैश्चरदेवतायै नमः हृदये॥३॥ ॐ आपोबीजाय नमः गुह्ये॥४॥ ॐ वर्त्तमानशक्तये नमः पादयोः॥५॥ विनियोगाय नमः सर्वाङ्गे॥ इति ऋष्यादिन्यासः।

करन्यासः- ॐ शन्नोदेवीरित्यङ्गुष्ठाभ्यां नमः॥१॥ ॐ अभिष्टये तर्जनीभ्यां नमः॥२॥ ॐ आपोभवंतु मध्यमाभ्यां नमः॥३॥ ॐ पीतये अनामिकाभ्यां नमः॥४॥ ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः॥५॥ ॐ अभिस्त्रवंतुनः करतलकरपृष्ठाभ्यां नमः॥६॥ इति करन्यासः।

हृदयादि न्यासः- ॐ शन्नोदेवीरिति हृदयाय नमः॥१॥ ॐ अभिष्टये शिरसे स्वाहा॥२॥ ॐ आपो भवंतु शिखायै वषट्॥३॥ ॐ पीतये कवचाय हुं॥४॥ ॐ शंय्योरिति नेत्रत्रयाय वौषट्॥५॥ ॐ अभिस्त्रवंतुनः अस्त्राय फट्॥६॥ इति हृदयादिन्यासः।

मंत्रन्यासः- ॐ शन्न इति शिरसि॥१॥ ॐ देवीरिति ललाटे॥२॥ ॐ अभिष्टये मुखे॥३॥ ॐ आपो हृदये॥४॥ ॐ भवन्तु नाभौ॥५॥ ॐ

पीतये कट्याम् ॥६ ॥ ॐ शंय्योरूर्वो: ॥७ ॥ ओं अभिस्त्रवन्तु जानुनो: ॥८ ॥ ॐ न: पादयो: ॥९ ॥ इति मन्त्रन्यास:।

एवं न्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्–

नीलद्युति: शूलधर: किरीटी गजस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुज: सूर्यसुत: प्रशांत: सदास्तु मह्यं वरदो महात्मा ॥१० ॥

इति ध्यात्वा मानसोपचारै: संपूज्य जपं कुर्य्यात्।

त्रयोविंशतिर्मन्दे चेति जपसंख्या २३००० ॥ जपांते शमीसमित्तिलपायस घृतैर्दशांशहोम:। अन्यत्सर्वं पूर्ववत्।

अथ दानद्रव्याणि–

माषांश्च तैलं विमलेन्द्रनीलं तिला: कुलित्था महिषी च लोहम् ।
कृष्णा च धेनु: प्रवदन्ति नूनं दुष्टाय दानं रविनंदनाय ॥१ ॥

॥ इति शनैश्चरमंत्रप्रयोग: ॥

॥ अथ शनैश्चर तान्त्रिक मंत्रा: ॥

अष्टाक्षर मंत्र– ॐ शनैश्चराय नम:।

ध्यानम्–

वन्दे शनैश्चर वक्रदंष्ट्रं नीलविभूषणम् ।
वामानुजस्थितं वामकरं दक्षे वरं दधत् ॥

नवाक्षर मंत्र– ॐ शं शनैश्चराय नम:।

इसके ऋषि ब्रह्मा। छन्द गायत्री। देवता शनैश्चर। शं बीजं तथा "आप" शक्ति है।

नीलञ्जनाभं मिहिरस्यपुत्रं ग्रहेश्वरं पाशभुजङ्गपाणिम् ।
सुराऽसुराणां भयदं द्विबाहुं भजे शनिं मानसपङ्कजेऽहम् ॥

दशाक्षर मंत्र– ॐ प्रां प्रीं प्रौं स: शनये नम:।

द्वादशाक्षर मंत्र– ॐ प्रां प्रीं प्रौं सं शनैश्चराय नम:।

॥ श्रीशनि यंत्र पूजनम् ॥

यंत्र मध्य पीठ पूजा करें। **ॐ सर्वात्मने शनि योगपीठाय नमः।** आसन पीठ पूजा करें। **ॐ स्वर्ण पीठाय नमः। ॐ रौप्य पीठाय नमः। ॐ ताम्रपीठाय नमः। ॐ लोहपीठाय नमः। ॐ काँस्यपीठाय नमः। ॐ पीत्तलासनाय नमः। ॐ कत्तीरासनाय नमः। ॐ रत्नपीठाय नमः।**

ॐ प्रां प्रीं प्रूं सः शनवे नमः से शनि का आवाहन करें।

शनि पूजन यंत्रम्

प्रथमावरणम्-(षट्कोणे)- ॐ हृदयशक्त्यै नमः। ॐ प्रीं शिरसे स्वाहा। ॐ प्रूं शिखायै वौषट्। ॐ प्रें कवचाय हुं। ॐ प्रौं नेत्रत्रयाय वौषट्। ॐ प्रः अस्त्राय फट्।

द्वितीयावरणम्-(अष्टदले)- **ॐ ध्वाजिन्यै नमः। ॐ धामिन्यै नमः। ॐ कंकाल्यै नमः। ॐ कलहप्रियायै नमः। ॐ कलह्यै नमः। ॐ कण्टक्यै नमः। ॐ अजायै नमः। ॐ तुरङ्गमायै नमः।** मध्ये- **ॐ महिष्यै नमः।**

तृतीयावरणम्-(दशदले)-शनि के नामों से पूजन करें। **ॐ कोणसंस्थाय नमः। ॐ पिङ्गलाय नमः। ॐ बभ्रुरूपाय नमः। ॐ कृष्णाय नमः। ॐ रौद्रदेहाय नमः। ॐ अन्तकाय नमः। ॐ यमाय नमः। ॐ सौरये नमः। ॐ मंदाय नमः। ॐ क्रोडाय नमः।**

चतुर्थावरणम्-(अष्टदले) पूर्वादिक्रम से ग्रहों का पूजन करें। **ॐ राहवे नमः। ॐ केतवे नमः। ॐ भृगवे नमः। ॐ गुरवे नमः। ॐ बुधाय नमः। ॐ भौमाय नमः। ॐ चन्द्रमसे नमः। ॐ सूर्याय नमः।**

पंचमावरणम्-(भूपूरे प्रथम रेखायाम्)- पूर्वादि १० दिशाओं में शनि वाहनों का आवाहन करें। **ॐ गंर्धवाय नमः। ॐ अश्वाय नमः। ॐ गजाय नमः। ॐ अजाय नमः। ॐ जंबूकाय नमः। ॐ सिंहाय नमः। ॐ कागाय नमः। ॐ मृगाय नमः।**

पूर्व ईशानयोर्मध्ये- **ॐ मयूराय नमः।** नैऋत्य पश्चिमायोर्मध्ये- **ॐ महिषाय नमः।**

षष्टमावरणम्-(भूपूरे-द्वितीय रेखायाम्) पूर्वादिक्रमेण- **ॐ इन्द्राय नमः। ॐ आग्नये नमः। ॐ यमाय नमः। ॐ नैऋत्यै नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ कुबेराय नमः। ॐ ईशानाय नमः। पूर्व ईशानयोर्मध्ये- ॐ ब्रह्मणे नमः। नैऋत्यपश्चिमेयोर्मध्ये- ॐ अनन्ताय नमः।**

सप्तावरणम्- (भूपूरे तृतीय रेखायाम्)- पूर्वादि क्रमेण- **ॐ व्रजाय नमः। ॐ शक्त्यै नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अंकुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

इस तरह पूजा कर शनि के तांत्रिक या वैदिक मंत्र का जप करें।

॥ नराकार शनि यंत्रम् ॥

इस यंत्र का काले घोडे की नाल अथवा नाव की कील के पत्र पर लिखें। इनके अभाव में ताम्रपत्र या भोजपत्र पर काले आसन पर पूर्व की ओर मुँह करके लिखें।

अष्टगंध अथवा गुलाब जल में काली स्याही मिलाकर लिखें। लोह के पत्र पर भी यंत्र खुदवा कर बना सकते है ।

मूल मंत्र- ॐ नमो भगवते शनैश्चराय सूर्यपुत्राय नमः।

इस मंत्र के जप करें। कम से कम २३ हजार जप करें। चौगुना करने से विशिष्ट लाभ होवें। तेल का दीपक जलाकर षोडशोपचार पूजन करें।

भोजपत्र पर लिखे यंत्र को पीड़ित व्यक्ति हाथ के बाँधे तो शनि प्रसन्न होकर पीड़ा दूर करें।

मंत्र पश्चात् शनि की वस्तुओं का दान करें।

॥ शनिस्तोत्रम् ॥

विनियोग :- **ॐ अस्य श्रीशनिस्तोत्र मन्त्रस्य कश्यप ऋषिः, त्रिष्टुप् छन्दः, सौरिदेवता, शं बीजं, निः शक्ति, कृष्णवर्णोति कीलकम् धर्मार्थ काम-मोक्षात्मक चतुर्विदपुरुषार्थ सिद्ध्यर्थं जपे विनियोगः।**

॥ अथ न्यासः ॥

मन्त्र	करन्यास	हृदयादिन्यास
शनैश्चरायं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
मन्दगतये	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
अधोक्षजाय	मध्यमाभ्यां नमः।	शिखायै वषट्।
कृष्णाङ्गाय	अनामिकाभ्यां नमः।	कवचाय हुम्।
शुष्कोदराय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
छायात्मजाय	करतलकरपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् :-

नीलाम्बरः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्त सदाऽस्तु मह्यं वरदोऽल्पगामी ॥

प्रणाम मन्त्र :-

प्रणम्य देवदेवेशं सर्वग्रहनिवारणम् ।
शनैश्चर प्रसादार्थं चिन्तयामास पार्थिव ॥

॥ स्तोत्रम् ॥

नमः कृष्णाय नीलाय शितिकण्ठनिभाय च ।
नमः कालाग्निरूपाय कृतान्ताय च वै नमः ॥
नमो निर्मांसदेहाय दीर्घशमश्रुजटाय च ।
नमो विशालनेत्राय शुष्कोदर भयाकृते ॥
नमः पुष्कलगात्राय स्थूलरोम्णेऽथ वै नमः ।
नमो दीर्घायशुष्काय कालदष्ट्रं नमोऽस्तुते ॥
नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः ।
नमो घोराय रौद्राय भीषणाय कपालिने ॥
नमस्ते सर्वभक्षाय वलीमुखनमोऽस्तुते ।
सूर्यपुत्र नमस्तेऽस्तु भास्करेऽभयदाय च ॥
अधोदृष्टे नमस्तेऽस्तु संवर्तक नमोऽस्तुते ।
नमो मन्दगते तुभ्यं निस्त्रिंशाय नमोऽस्तुते ॥
तपसा दग्धदेहाय नित्यं योगरताय च ।
नमो नित्यं क्षुधार्ताय अतृप्ताय च वै नमः ॥
ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मजसूनवे ।
तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ॥
देवासुरमनुष्याश्च सिद्धविद्यारोरगाः ।
त्वया विलोकिताः सर्वे नाशंयान्ति समूलतः ।
प्रसांद कुरु मे देव वरार्होऽहमुपागतः ।
एवं स्तुतस्तदा सौरिर्ग्रहराजो महाबलः ॥

(पद्मपुराणे)

॥ अथ दशरथकृत शनिस्तोत्रम्॥

(१)

॥श्री गणेशाय नमः॥

विनियोगः- ॐ अस्य श्री शनि स्तोत्र मंत्रस्य, कश्यप ऋषिः, त्रिष्टुप् छन्दः, सौरिः देवता, रां बीजम्, निः शक्तिः,कृष्णवर्णेति कीलकम्, धमार्थ काम मोक्षात्मक चतुर्विध पुरुषार्थ सिद्धये जपे विनियोगः।

विनियोग पश्चात् न्यासादि करें यथा-

करन्यासः- शनैश्चराय अंगुष्ठाभ्यां नमः। मन्दगतये तर्जनीभ्यां नमः। अधोक्षजाय मध्यमाभ्यां नमः। कृष्णांगाय अनामिकाभ्यां नमः। शुष्कोदराय कनिष्ठिकाभ्यां नमः। छायात्मजाय करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः- शनैश्चराय नमः हृदये। मन्दगतये शिरसे स्वाहा। अधोक्षजाय शिखायै वषट्। कृष्णांगाय कवचाय हुम्। शुष्कोदराय नेत्रत्रयाय वौषट्। छायात्मजाय अस्त्राय फट्।

दिग्बंधनम्- ॐ भुर्भुवः स्वः इति दिग्बंधनम्। इस मंत्र को पाँच बार पढकर दिग्बंधन करना चाहिए।

ध्यानम्—

नीलद्युतिं शूलधरं किरीटिनं गृध्रस्थितं त्रासकरं धनुर्द्धरम्।
चतुर्भुजं सूर्यसुतं प्रशान्तं वन्दे सदाऽभीष्टकरं वरेण्यम् ॥१॥

प्रणम्य देवदेवेशं सर्वग्रह निवारणम्।
शनैश्चर प्रसादार्थं चिन्तयामास पार्थिवः ॥२॥

रघुवंशेषु विख्यातो राजा दशरथः पुराः।
चक्रवर्ती स विज्ञेयः सप्तद्वीपाधिपोऽभवत् ॥३॥

कृतिकान्ते शनिंर्ज्ञात्वा दैवज्ञैर्ज्ञापितो हि सः।
रोहिणी भेदयित्वातु शनिर्यास्थिति साम्प्रतम्।
शकट मेधमित्युक्तं सुराऽसुरभयंकरम्।
द्वादशाब्दं तु दुर्भिक्षं भविष्यति सुदारुणम् ॥४॥

एतच्छ्रुत्वातुतद्वाक्यं मन्त्रिभिः सह पार्थिवः।

व्याकुलं च जगद् दृष्ट्वा पौर जानपदादिकम् ॥५॥
ब्रुवन्ति सर्वलोकाश्च भयमेतत्समागतम् ।
देशाश्च नगरग्रामाः भयभीताः समागताः ॥६॥
पप्रच्छ प्रयतोराजा वसिष्ठप्रमुखां द्विजान् ।
समाधानं किमत्राऽस्ति ब्रूतमे द्विजसत्तमाः ॥७॥

॥ वशिष्ठ उवाच ॥

प्रजापत्ये तु नक्षत्रे तस्मिन् भिन्नेकुतः प्रजाः ।
अयं योगोध्यसाध्यश्च ब्रह्मा शक्रादिभिः सुरैः ॥८॥
तदा सञ्चिन्त्य मनसा साहसं परमं ययौ ।
समाधाय धनुर्दिव्यं दिव्यायुध समन्वितम् ॥९॥
रथमारुह्य वेगेन गतो नक्षत्रमण्डलम् ।
त्रिलक्षयोजनं स्थानं चन्द्रस्योपरिसंस्थितम् ॥१०॥
रोहिणीपृष्ठमासाद्य स्थितो राजा महाबलः ।
रथकेतुकञ्चने च दिव्ये मणिविभूषिते ॥११॥
हंसवर्णहयैर्युक्ते महाकेतु समुच्छ्रिते ।
दीप्यमानो महारत्नैः किरीटमुकुटोज्वलैः ॥१२॥
विराजत तदाकाशै द्वितीय इव भास्करः ।
आकर्णचापमाकृष्य सहशस्त्रं नियोजितम् ॥१३॥
कृणिकान्तं शनिर्ज्ञात्वा प्रविशतांच रोहिणीम् ।
दृष्ट्वा दशरथंचाग्रे तस्थौच भृकुटामुखः ॥१४॥
संहारास्त्रं शनिर्दृष्ट्वा सुराऽसुरनिषूदनम् ।
प्रहस्य चमयात् सौरिरिदं वचनं ब्रवीत् ॥१५॥

॥ शनिरुवाच ॥

पौरुषं तव राजेन्द्र! मया दृष्टं न कस्यचित् ।
देवासुरामनुष्याश्च सिद्ध विद्याधरोरगाः ॥१६॥
मयाविलोकिताः सर्वेभयं गच्छन्ति तत्क्षणात् ।
तुष्टोऽहं तव राजेन्द्र! तपसा पौरुषेण च ।

वरं ब्रूहि प्रदास्यामि स्वेच्छया रघुनन्दन ॥१७॥

॥ दशरथ उवाच ॥

प्रसन्नो यदि मे सौरे! एकश्चास्तु वरः परः,
रोहिणीं भेदयित्वा तु न गन्तव्यं कदाचन ।
सरितः सागरा यावद्यावच्चन्द्रर्कमेदिनी ॥
यपितु तु महासौरे! नाऽन्यमिच्छाम्यहं परम् ।
एवमस्तु शनि प्रौक्तं वरंलब्ध्वा तु शाश्वतम् ॥
प्राप्यैवं तु वरं राजा कृतकृत्योऽभवत्तदा ।
पुनरेवाऽब्रवीत्तुष्टो वरं वरय सुब्रत ॥
प्रार्थयामास दृष्टात्मा वरमन्यं शनिस्तदा ।
न भेतव्यं न भेतव्यं त्वया भास्करनन्दन ॥
द्वादशाब्दं तु दुर्भिक्षं न कर्त्तव्यं कदाचन ।
कीर्तिरेषामदीया च त्रैलोक्ये स्थापय प्रभो ॥
एवं वरं तु संप्राप्य हृष्टरोमा स प्रार्थिवः ।
रथोपरिधनुः स्थाप्यभूत्वा चैव कृताञ्जलिः ॥
ध्यात्वां सरस्वतीं देवो गणनाथं विनायकम् ।
राजा दशरथं स्तोत्रं सौरेरिदमथाऽकरोत् ॥

॥ दशरथ उवाच ॥

नमः कृष्णाय नीलाय शितिकण्ठनिभाय च ।
नमः सुरूपगात्राय स्थूलरोम्णे नमो नमः ॥
नमो नित्यं क्षुधार्त्ताय अतृप्ताय च वै नमः ।
नमः कालाग्निरूपाय कृष्णांगाय च वै नमः ॥
नमो दीर्घाय शुष्काय कालदृष्टे नमो नमः ।
नमोऽस्तु कोटराक्षाय दुर्भिक्षाय कपालिने ॥
नमो घौराय रौद्राय भीषणाय कपालिने ।
नमो मन्दमते! रौद्रं भानुजे! भयदायिने ॥
अधोदृष्टे! नमस्तेऽस्तु संवर्तकमयाय च ।

तपसा दग्धदेहाय नित्यं योगरताय च ॥
ज्ञानचक्षुर्नमस्तेषु कश्यपात्मजसूनवे ।
तुष्टो ददासि वै राज्यं रुष्टोहरसि तत्क्षणात् ॥
सूर्यपुत्र! नमस्तेऽस्तु सर्वभक्षाय वै नमः ।
देवाऽसुर मनुष्याश्च पशुपक्षिसरीसृपाः ॥
त्वया विलोकिताः सर्वे दैनामाशुव्रजन्ति ते ।
ब्रह्माशक्रोहरिश्चैव ऋषयः सप्ततारकाः ॥
राज्यभ्रष्टाः पतन्त्येतेत्वया दृष्ट्यावलोकिताः ।
देशाश्चनगरग्रामाः द्वीपाश्चैव तथाद्रुमाः ॥
त्वयालोकिता सर्वे विनश्यन्ति समूलतः ।
प्रसादं कुरु हे सौरे! वरदो भव भानुजः ॥
एवं स्तुतस्तदा सौरिग्रहराजो महाबलः ।
अब्रवीच शनिर्वाक्यं हृष्टरोमा च पार्थिवः ॥
तुष्टोऽहं तव राजेन्द्र! स्तोत्रेणाऽनेन सुव्रत ।
एवं वरं प्रदास्यामि यत्ते मनसि वर्तते ॥

॥ दशरथ उवाच ॥

प्रसन्नो यदि मे सौरे! वरं देहि ममेप्सितम् ।
अद्य प्रभृतिपिंगाक्ष! पीडादेया न कस्यचित् ॥
प्रसादं कुरु मे सौरे! वरोऽयं मे ममेप्सितः ।

॥ शनिरुवाच ॥

अदेयऽस्तु वरोऽस्माकं तुष्टोऽहं च ददामि ते ।
त्वयाप्रोक्तं च मे स्तोत्रं ये पठिष्यन्ति मानवाः ॥
देवासुर मनुष्याश्चसिद्ध विद्याधरोरगाः ।
न तेषां बाधते पीडा मत्कृता वै कदाचन ॥
मृत्युस्थान चतुर्थेता जन्मव्यय द्वितीयगे ।
गोचरे जन्मकाले वा दशास्वन्तर्दशासु च ॥
यः पठेद् द्वित्रिसन्ध्यां वा शुचिर्भूत्वासमाहितः ।

न तस्य जायते पीडा कृता वै मम निश्चितम् ॥
प्रतिमां लोहजां कृत्वा मम राजन् चतुर्भुजाम् ।
वरदां च धनुः शूलं बाणांकितकरां शुभाम् ॥
अयुतं मेकजप्यं च तद्दशांशेन होमतः ।
कृष्णैस्तिलैः शमीपत्रैर्घृतं च नीलपंकजेः ॥
पायसं शर्करायुक्तं घृतमिश्रं च होमयेत् ।
ब्राह्मणाम्भोजयेतत्र स्वशक्त्या घृत पायसैः ॥
तैले वा तिलराशौ वा प्रत्यक्षं च यथाविधिः ।
पूजनं चैव मन्त्रेण कुंकुमाद्यं च लेपयेत् ॥
नील्या वा कृष्णतुलसी शमीपत्रादिभिः शुभैः ।
दद्यान्मे प्रीतये यस्तु कृष्णवस्त्रादिकं शुभम् ॥
धेनुं वा वृषभंवाऽपि सवत्सां च पयस्विनीम् ।
एवं विशेष पूजां च मे द्वारे कुरुते नृप ॥
मन्त्रोद्धारां विशेषे च स्तोत्रेणानेन पूज्येत् ।
पूजयित्वा जपेत्स्तोत्रं भूत्वा चैव कृताञ्जलिः ॥
तस्य पीडा न चैवाहं करिष्यामि कदाचन ।
रक्षामि सततं तस्य पीडां चान्यग्रहस्य च ॥
अनेनैव प्रकारेण पीडामुक्तं जगद्भवेत् ।
वरद्वयं तु सम्प्राप्य राजा दशरथस्तदा ॥
मत्वा कृतार्थमात्मनं नमस्कृत्य शनैश्चरं ।
शनैश्चराभ्यनुज्ञातो रथमारूह्य वीर्यवान् ॥
स्वस्थानं च गतो राजा प्राप्तकामोऽभवत्तदा ।
स्वार्थसिद्धिमवाप्याथ विजयी सर्वदाऽभवत् ॥
कोणस्थः पिंगलोवभ्रुः कृष्णौरौद्रान्तकोयमः ।
सौरिः शनैश्चरौ मन्दः पिप्पलाश्रयं संस्थितः ॥
एतानि शनि नामानि जपेदश्वत्थ सन्निधौ ।
शनैश्चरकृता पीडा न कदाऽपि भविष्यति ॥

अल्पमृत्यु विनाशाय दुःखस्योद्धारणाय च ।
दातव्यं तिलतैलेन धान्य माषादिकं तथा ॥
लौहं देयं च विप्राय सौवर्णेन समन्वितम् ।
शनिस्तोत्रं पठेद्यस्तु श्रृणुयाद्वा समाहितः ॥
विजयांचार्थ कामंचारोग्यं सुखमवाप्नुयात् ॥

॥ इति श्रीशनि स्तोत्रं सम्पूर्णम् ॥

॥ अथ दशरथकृत शनिस्तोत्रम् द्वितीयम् ॥

॥ दशराथ उवाच ॥

नमः कृष्णाय नीलाय शिति कण्ठ निभाय च ।
नमो नील मयूखाय नीलोत्पल निभाय च ॥१॥
नमो निर्मांस देहाय दीर्घश्मश्रु जटाय च ।
नमो विशाल नेत्राय स्थूल रोम्णे नमो नमः ॥२॥
नमो दीर्घाय शुष्काय कालदंष्ट्र नमोऽस्तुते ।
नमस्ते कोटरस्थाय दुर्निरीक्ष्याय ते नमः ॥३॥
नमो घोराय रौद्राय भीषणाय करालिने ।
नमस्ते सर्व भक्ष्याय बली मुख नमोऽस्तुते ॥४॥
सूर्यपुत्र नमस्तेऽस्तु सर्वातक्र्य नमोऽस्तुते ।
नमः कालाग्नि रुद्राय कृतान्ताय च वै नमः ॥५॥
नमो मन्दगते तुभ्यं निस्त्रिंशाय नमो नमः ।
तपसा दग्ध देहाय नित्यं योगरताय च ॥६॥
ज्ञानचक्षुर्नमस्तेऽस्तु कश्यपात्मज सूनवे ।
तुष्टो ददासि वै राज्यं रुष्टौ वै हरसि क्षणात् ॥७॥
देवासुर मनुष्याश्च सिद्ध विद्याधरोरगाः ।
त्वया विलोकिताः सर्वे दैन्यमाशु व्रजन्ति ते ॥८॥
ब्रह्मा शक्रो मनुश्चैव ऋषयः सप्त तारकाः ।
भ्रष्टराज्याः पतन्त्येते तव दृष्ट्यावलोकिता: ॥९॥

देशाश्च नगरग्रामा दिशश्चैव द्रुमास्तथा ।
त्वया विलोकिताः सर्वे नाशं यान्ति समूलतः ॥१०॥
प्रसादं कुरु मे सौरे वरार्थे तव संस्थितः ।
एवं स्तुत स्तदा सौरिर्ग्रहराजो महाबलः ॥११॥
अब्रवीच्च शनिर्वाक्यं हृष्ट रोमा स पार्थिवम् ।

॥ शनिरुवाच ॥

तुष्टोऽहं तव राजेन्द्र स्तवेनानेन मानद ।
वरं ब्रूहि प्रदास्यामि स्वेच्छया रघुनन्दन ॥१२॥

॥ दशरथ उवाच ॥

प्रसन्नस्त्वं यदा सौरे वरं देहि ममेप्सितम् ।
अद्य प्रभृति सौरे ते पीड़ा कार्या न कस्यचित् ॥१३॥
देवासुर मनुष्याणां पशु पक्षि शरीरिणाम् ।

॥ शनिरुवाच ॥

ग्रहाणां स ग्रहो ज्ञेयो यस्तु पीड़ाकरः स्मृतः ।
अदेयो हि वरो यस्तु तुभ्यं चैव ददामि तम् ॥१४॥
त्वया प्रोक्तं च मे स्तोत्रं यः पठिष्यति मानवः ।
एककालं द्विकालं वा पीड़ां मुञ्चामि तस्य वै ॥१५॥
देवासुर मनुष्याणां सिद्ध विद्याधर रक्षसाम् ।
मृत्युस्थान स्थितो वापि जन्मस्थानगतोपि वा ॥१६॥
यः पुनः श्रद्धया युक्तः शुचिः स्नातः समाहितः ।
भक्त्योपचारैः संपूज्य प्रतिमां लोहजां मम ॥१७॥
मद्दिने तु विशेषेण स्तोत्रेणानेन पूजयेत् ।
पूजयित्वा जपः स्तोत्रं भूत्वा चैव कृताञ्जलिः ॥१८॥
माषौदनं तिलैर्मिश्र दद्याल्होहं च दक्षिणाम् ।
कृष्णांगां वृषभं वापि दद्याद् विप्राय धीमते ॥१९॥
तस्य पीड़ा न चैवाहं करिष्यामि कदाचन ।
गोचरे जन्मलग्ने वा दशास्वन्तर्दशासु च ॥२०॥

रक्षामि सततं तस्य पीड़ा मन्यग्रहैः कृताम् ।
अनेनैव विधानेन पीड़ामुक्तं जगद् भवेत् ॥२१।
वरद्वयं तु सम्प्राप्य राजा दशरथ स्तदा ।
स्वस्थानं च ततो गत्वा प्राप्त कामोऽभवन्नृपः ॥२२॥

॥ इति स्कन्द पुराणे दशरथ कृतं शनिस्तोत्रम् ॥

॥ श्रीशनि रक्षास्तवम् ॥

॥ श्रीनारद उवाच ॥

ध्यात्वा गणपतिं राजा धर्मराजो युधिष्ठिरः ।
धीरः शनैश्चरस्येमं चकार स्तवमुत्तमम् ॥

॥ मूल पाठ ॥

विनियोग :- ॐ अस्य श्रीशनैश्चर स्तव राजस्य सिन्धुद्वीपः ऋषिः, गायत्री छन्दः, श्रीशनैश्चरः देवता, श्रीशनैश्चर प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादिन्यास :- शिरसि सिन्धुद्वीप ऋषये नमः। मुखे गायत्री छन्दसे नमः। हृदि श्रीशनैश्चर देवतायै नमः। सर्वाङ्गे श्रीशनैश्चर प्रीत्यर्थे पाठे विनियोगः।

ध्यानम् :-

शिरो मे भास्करिः पातु भालं छाया सुतोऽवतु ।
कोटराक्षो दृशौ पातु शिखिकण्ठनिभः श्रुति ॥
घ्राणं मे भीषणः पातु मुखं बलिमुखोऽवतु ।
स्कन्धौ संवर्तकः पातु भुजो मे भयदोऽवतु ॥
सौरिर्मे हृदयं पातु नाभिं शनैश्चरोऽवतु ।
ग्रहराजः कटिं पातु सर्वतः रविनन्दनः ॥
पादौ मन्दगतिः पातु कृष्णः पात्वखिलं वपुः ।
रक्षामेतां पठेन्नित्यं सौरेर्नाम बलैर्युतम् ।
सुखी पुत्री चिरायुश्च स भवेन्नात्र संशयः ॥

॥ श्रीशनि वज्रपञ्जर कवचम् ॥

॥ श्रीब्रह्मोवाच ॥

शृणुध्वमृषयः सर्वे शनि पीडाहरं महत् ।
कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥
कवचं देवतावासं वज्र पञ्जर संज्ञकम् ।
शनैश्चर प्रीतिकरं सर्व सौभाग्य दायकम् ॥

॥ मूल पाठ ॥

विनियोगः– ॐ अस्य श्रीशनैश्चर वज्र पञ्जर कवचस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, श्रीशनैश्चरः देवता, श्रीशनैश्चर प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः– शिरसि कश्यप ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीशनैश्चरः देवतायै नमः। सर्वाङ्गे श्रीशनैश्चर प्रीत्यर्थे पाठे विनियोगाय नमः।

ध्यानम् :–

नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितः त्रासकः धनुष्करो ।
चतुर्भुजः सूर्यसुतः प्रसन्नः सदा मम स्यात् वरदः प्रशान्तः ॥

॥ श्रीब्रह्मोवाच ॥

शृणुध्वगृषय सर्वे शनिपीड़ाहरं महत् ।
कवचं शनिराजस्य सौरेरिद मनुत्तमम ॥१॥
कवचं देवतावासं वज्रपञ्जर अंशकम् ।
शनैश्चर प्रीतिकरं सर्वसौभाग्यदायकम् ॥२॥
शिरः शनैश्चरः पातु भालं मे सूर्य नन्दनः ।
नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः ॥३॥
नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।
स्निग्ध कण्ठश्च मे कण्ठं भुजौ पातु महाभुजः ॥४॥
स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः ।
वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्तथा ॥५॥

नाभिं ग्रह पतिः पातु मन्दः पातु कटिं तथा ।
ऊरू ममान्तकः पातु यमो जानु युगं तथा ॥६॥
पादौ मन्द गतिः पातु सर्वाङ्गं पातु पिप्पलः ।
अङ्गोपाङ्गानि सर्वाणि रक्षेत् मे सूर्यनन्दनः ॥७॥

॥ फलश्रुति ॥

इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः ।
न तस्य जायते पीडा प्रीतो भवति सूर्यजः ॥१॥
व्यय जन्म द्वितीयस्थो मृत्युस्थान गतोऽपि वा ।
कालस्थ गतो वाऽपि सुप्रीतस्तु सदा शनिः ॥२॥
अष्टमस्थे सूर्यसुते व्यये जन्म द्वितीयगे ।
कवचं पठतो नित्यं न पीडा जायते क्वचित् ॥३॥
इत्येतत् कवचं दिव्यं सौरेर्यन्निर्मितं पुरा ।
द्वादशाष्टम जन्मस्थ दोषान्नाशयते सदा
जन्मलग्नस्थितान् दोषान् सर्वान् नाशयते प्रभु ॥४॥

॥ श्रीब्रह्माण्ड पुराणे श्रीशनिवज्र पञ्जर कवचं ॥

॥ श्रीशनि अष्टोत्तरशतनामावलि स्तोत्रम् ॥

सौरिः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः ।
शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः ॥१॥
शितिकण्ठ निभो नीलश्छाया - हृदयनन्दनः ।
कालदृष्टिः कोटराक्षः स्थूलरोमावली मुखः ॥२॥
दीर्घो निर्मांस-गात्रस्तु शुष्को घोरो भयानकः ।
नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुर्जटाधरः ॥३॥
मन्दोमन्दगतिः खञ्जोऽतृप्तः संवर्तको यमः ।
ग्रहराजः कराली च सूर्यपुत्रो रविः शशी ॥४॥
कुजो बुधो गुरुः काव्यो, भानुजः सिंहिका सुतः ।

केतुर्देव पतिर्बाहुः कृतान्तो नैर्ऋतस्तथा ॥५॥
शशी मरुत् कुबेरश्च ईशानः सुरः आत्मभूः ।
विष्णुर्हरो गणपतिः कुमारः कामो ईश्वरः ॥६॥
कर्त्ता हर्त्ता पालयिता राज्येशो राज्यदायकः ।
छायासुतः श्यामलांगो धनहर्त्ता धनप्रदः ॥७॥
क्रूरकर्मविधाता च सर्वकर्मावरोधकः ।
तुष्टो रुष्टः कामरूपः कामदो रविनन्दनः ॥८॥
ग्रहपीडा हरः शान्तो नक्षत्रेशो ग्रहेश्वरः ।
स्थिरासनः स्थिरगतिः महाकायो महाबलः ॥९॥
महाप्रभो महाकालः कालात्मा कालकालकः ।
आदित्यभयदाता च मृत्युरादित्य - नन्दनः ॥१०॥
शतभिद्रुक्ष - दायिने त्रयोदशी तिथि प्रियः ।
तिथ्यात्मा तिथिगणनो नक्षत्रगण नायकः ॥११॥
योग राशिर्मुहूर्त्तात्मा कर्त्ता दिनपतिः प्रभुः ।
शमीपुष्पप्रियः श्यामः त्रैलोक्य भयदायकः ॥१२॥
नीलवासाः क्रियासिन्धुः नीलाञ्जन च यच्छविः ।
सर्वरोगहरो देवः सिद्धो देवगण स्तुतः ॥१३॥

॥ फलश्रुति ॥

अष्टोत्तर शतंनाम्नां सौरेश्छाया सुतस्य यः ।
पठेन्नित्यं तस्य पीडा समस्ता नश्यति ध्रुवम् ॥१॥
कृत्वा पूजां पठेन् मर्त्यो भक्तिमान् यो स्तव राजम् ।
विशेषतः शनिदिने पीडा तस्य विनश्यति ॥२॥
जन्म लग्ने स्थितिर्वाऽपि गोचरे क्रूरराशिगे ।
दशासु च गते सौरे तदा स्तवमिमं पठेत् ॥३॥
पूजयेद् यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः ।
विधाय लौहप्रतिमां नरो दुःखात् विमुच्यते ॥४॥

बाधा याऽन्य ग्रहाणां च यः पठेत् तस्य नश्यति ।
भीतो भयात् विमुच्येत् बद्धो मुच्येत् बन्धनात् ।
रोगी रोगात् विमुच्येत् नरः स्तवमिमं पठेत् ॥५॥

॥ शनि अष्टकस्तोत्रम् ॥

विनियोगः- ॐ अस्य श्री शनैश्चर स्तोत्रस्य दशरथ ऋषिः, श्री शनैश्चरो देवता, त्रिष्टुप् छन्दः, शनैश्चर प्रीत्यर्थं जपे विनियोगः।

॥ दशरथ उवाच ॥

कोणान्तगो रौद्र यमोऽथ बभ्रूः कृष्णः शनिः पिङ्गल मन्दसौरिः ।
नित्यं स्मृतो यो हरते च पीड़ां तस्मै नमः श्रीरविनन्दनाय ॥१॥
सुरासुराः किं पुरुषा गजेन्द्रा गन्धर्व विद्याधर पन्नगाश्च ।
पीड्यन्ति सर्वे विषमस्थिते च तस्मै नमः श्रीरविनन्दनाय ॥२॥
नरा नरेन्द्राः पशवो गजेन्द्राः सरीसृपाः कीट पतङ्ग भृङ्गाः ।
पीड्यन्ति सर्वे विषमस्थिते च तस्मै नमः श्रीरविनन्दनाय ॥३॥
देशाश्च दुर्गाणि वनानि येन ग्रामाश्च देशाः पुर पत्तनानि ।
पीड्यन्ति सर्वे विषमस्थिते च तस्मै नमः श्रीरविनन्दनाय ॥४॥
स्त्रष्टा स्वयं भूर्भुवन त्रयस्य त्राणे हरिः संहरणे महेशः ।
एक-स्त्रिधा ऋग् यजु साम मूर्ति स्तस्मै नमः श्रीरविनन्दनाय ॥५॥
प्रयागकूले यमुना तटे च सरस्वती पुण्य जले गुहायाम् ।
यो योगिभिर्ध्येय शरीरसूक्ष्म-स्तस्मै नमः श्रीरविनन्दनाय ॥६॥
अन्यत्र देशात् स्वगृहं प्रविष्टा यदीय वारे सुखिनो नराः स्युः ।
गृहाद् गता ये न पुनः प्रयान्ति तस्मै नमः श्रीरविनन्दनाय ॥७॥
तिलैर्यवै र्माष गुडान्नदानै-र्लोहेन नीलाम्बर दानतो वा ।
प्रीणाति मन्त्रैर्निज वासरेण तस्मै नमः श्रीरविनन्दनाय ॥८॥
शन्यष्टकं यः पठति प्रभाते नित्यं स सूतैः पशु बान्धवैश्च ।
करोति राज्यं भुवि भूरि सौख्यं प्राप्नोति निर्वाणपदं तथाऽन्ते ॥९॥

॥ शनैश्चर स्तवराजः॥

॥ श्रीगणेशाय नमः॥

॥ श्रीनारद उवाच ॥

ध्यात्वा गणपतिं राजा धर्मराजो युधिष्ठिरः ।
धीरः शनैश्चरस्येमं चकार स्तवमुत्तमम् ॥१॥
शिरो मे भास्करिः पातु भालं छाया सुतोऽवतु ।
कोटराक्षो दृशौ पातु शिखिकण्ठ निभः श्रुती ॥२॥
घ्राणं मे भीषणः पातु मुखं बलिमुखोऽवतु ।
स्कन्धौ संवर्तकः पातु भुजौ मे भयदोऽवतु ॥३॥
सौरिर्मे हृदयं पातु नाभिं शनैश्चरोऽवतु ।
ग्रहराजः कटिं पातु सर्वतो रविनन्दनः ॥४॥
पादौ मन्दगतिः पातु कृष्णः पात्वखिलं वपुः ।
रक्षामेतां पठेन्नित्यं सौरेर्नाम बलैर्युताम् ॥५॥
सुखी पुत्री चिरायुश्च स भवेन्नात्र संशयः ।
ॐ सौरीः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः ॥६॥
शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः ।
शितिकण्ठनिभो नीलश्छाया हृदयनन्दनः ॥७॥
कालदृष्टिः कोटराक्षः स्थूलरोमा बलीमुखः ।
दीर्घोनिर्मांस-गात्रस्तु शुष्को घोरो भयानकः ॥८॥
नीलांशुः क्रोधनो रौद्रो दीर्घ श्मश्रुर्जटाधरः ।
मन्दो मन्दगतिः खञ्जोऽतृप्तः संवर्तको यमः ॥९॥
ग्रहराजः कराली च सूर्यपुत्रो-रविः शशी ।
कुजोबुधोगुरुः काव्यो भानुजः सिंहिकासुतः ॥१०॥
केतुर्देवपतिर्बाहुः कृतान्तो नैर्ऋतस्तथा ।
शशीमरुत्कुबेरश्च ईशानः सुर आत्मभूः ॥११॥

विष्णुर्हरो गणपतिः कुमारः काम ईश्वरः ।
कर्ताहर्ता पालयिता राज्यभुग् राज्यदायकः ॥१२॥
छायासुतः श्यामलांगो धनहर्ता धनप्रदः ।
क्रूरकर्मविधाता च सर्वकर्मावरोधकः ॥१३॥
तुष्टो रुष्टः कामरूपः कामदो रविनन्दनः ।
ग्रहपीड़ाहरः शान्तो नक्षत्रेशो ग्रहेश्वरः ॥१४॥
स्थिरासनः स्थिरगतिर्महाकायो महाबलः ।
महाप्रभो महाकालः कालात्मा कालकालकः ॥१५॥
आदित्यभयदाता च मृत्युरादित्यनन्दनः ।
शतभिरुक्ष दयितः त्रयोदशतिथिप्रियः ॥१६॥
तिथ्यात्मातिथिगणो नक्षत्रगणनायकः ।
योगराशि-र्मुहुर्तात्मा कर्ता दिनपतिः प्रभुः ॥१७॥
शमीपुष्पप्रियः श्याम स्त्रैलोक्याभावदायकः ।
नीलवासाः क्रियासिन्धुर्नीलाञ्जन च यच्छविः ॥१८॥
सर्वरोगहरो देवः सिद्धो देवगण स्तुतः ।
अष्टोत्तरशतं नाम्नां सौरेश्छाया सुतस्य यः ॥१९॥
पठेन्नित्यं तस्य पीड़ा समस्ता नश्यन्ति ध्रुवम् ।
कृत्वा पूजां पठेन्मर्त्यो भक्तिमान् यः स्तवं सदा ॥२०॥
विशेषतः शनिदिने पीड़ा तस्य विनश्यति ।
जन्मलग्ने स्थितिर्वापि गोचरे क्रूरराशिगे ॥२१॥
दशासु च गते सौरेस्तदा स्तवमिमं पठेत् ।
पूजयेद्यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः ॥२२॥
विधायलोहप्रतिमां नरो दुःखाद्विमुच्यते ।
बाधात्वन्यग्रहाणां च यः पठेत्तस्य नश्यति ॥२३॥
भीतो भयाद्विमुच्येत बद्धो मुच्येत बन्धनात् ।
रोगी रोगाद्विमुच्येत नरः स्तवमिमं पठेत् ॥२४॥

पुत्रवान्धनवान् श्रीमान् जायते नात्र संशयः ।

॥ नारद उवाच ॥

स्तवं निशम्य पार्थस्य प्रत्यक्षोऽभूच्छनैश्चरः ।
दत्त्वा राज्ञे वरं कार्मं शनिश्चान्तर्दधे तदा ॥२६॥

॥ इति श्रीभविष्य पुराणे शनैश्चरस्तवराजः समाप्तः ॥

॥ पिप्पलादऋषिकृत शनिस्तोत्रम् ॥

यः पुरा नष्टराज्याय नलाय प्रददौ किल ।
स्वप्ने तस्मै निजं राज्यं स मे सौरिः प्रसीद तु ॥१॥

केशनीलाञ्जन प्रख्यं मनश्चेष्टा प्रसारिणम् ।
छाया मार्तण्ड संभूतं नमस्यामि शनैश्चरम् ॥२॥

नमोऽर्कपुत्राय शनैश्चराय नीहार वर्णाञ्जनमेचकाय ।
श्रुत्वा रहस्यं भव कामदश्च फलप्रदो मे भव सूर्य पुत्र ॥३॥

नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः ।
शनैश्चराय ते तद्व शुद्धबुद्धि प्रदायिने ॥४॥

य एभिर्नामभिः स्तौति तस्य तुष्टो ददात्य सौ ।
तदीयं तु भयं तस्यस्वप्नेपि न भविष्यति ॥५॥

कोणस्थः पिङ्गलो बभ्रूः कृष्णो रौद्रोऽन्तको यमः ।
सौरिः शनैश्चरो मन्दः प्रीयतां मे ग्रहोत्तमः ॥६॥

नमस्ते कोणसंस्थाय पिङ्गलाय नमोऽस्तुते ।
नमस्ते बभ्रुरूपाय कृष्णाय च नमोऽस्तुते ॥७॥

नमस्ते रौद्र देहाय नमस्ते बालकाय च ।
नमस्ते यज्ञ संज्ञाय नमस्ते सौरये विभो ॥८॥

नमस्ते मन्दसंज्ञाय शनैश्चर नमोऽस्तुते ।
प्रसादं कुरु देवेश दीनस्य प्रणतस्य च ॥९॥

॥ श्रीशनि नाम स्तुतिम् ॥

॥ श्रीशन्युवाच ॥

क्रोडं नीलाञ्जनप्रख्यं नीलवर्ण समस्त्रजं ।
छायामार्तण्ड-सम्भूतं नमस्यामि शनैश्चरम् ॥
नमोऽर्क पुत्राय शनैश्चराय नीहारवर्णाञ्जनमेचकाय ।
श्रुत्वा रहस्यं भव कामदश्च फलप्रदो मे भव सूर्यपुत्र ॥
नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः ।
शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने ॥

॥ फलश्रुति ॥

य एभिर्नामभिः स्तौति तस्य तुष्टो भवाम्यहं ।
मदीयं तु भयं तस्य स्वप्नेऽपि न भविष्यति ॥

॥ इति श्री भविष्य पुराणे श्रीशनि नाम स्तुतिम् ॥

॥ श्रीशनि एवं शनिभार्या स्तोत्रम् ॥

यः पुरा राज्यभ्रष्टाय नलाय प्रददो किल ।
स्वप्ने शौरिः स्वयं मन्त्रं सर्वकामफलप्रदम् ॥
क्रोडं नीलाञ्जनप्रख्यं नीलजीमूत सन्निभम् ।
छायामार्तण्ड-संभूतं नमस्यामि शनैश्चरम् ॥२॥
ॐ नमोऽर्कपुत्रायशनैश्चराय नीहार वर्णाञ्जननीलकाय ।
स्मृत्वा रहस्यं भुवि मानुषत्वे फलप्रदो मे भव सूर्य पुत्र ॥३॥
नमोऽस्तु प्रेतराजाय कृष्ण वर्णाय ते नमः ।
शनैश्चराय क्रूराय सिद्धि बुद्धि प्रदायिने ॥४॥
य एभिर्नामभिः स्तौति तस्य तुष्टो भवाम्यहम् ।
मामकानां भयं तस्य स्वप्नेष्वपि न जायते ॥५॥
गार्गेय कौशिकस्यापि पिप्पलादो महामुनिः ।
शनैश्चर कृता पीड़ा न भवति कदाचन ॥६॥

क्रोडस्तु पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ।
शौरिः शनैश्चरो मन्दः पिप्पलादेन संयुतः ॥७॥
एतानि शनि नामानि प्रातरुत्थाय यः पठेत् ।
तस्य शौरेः कृता पीड़ा न भवति कदाचन ॥८॥

॥ शनिभार्या नामानि ॥

ध्वजनी धामनी चैव कङ्काली कलहप्रिया ।
कलही कण्टकी चापि अजा महिषी तुरङ्गमा ॥९॥
नामानि शनि-भार्यायाः नित्यं जपति यः पुमान् ।
तस्य दुःखाः विनश्यन्ति सुखसौभाग्यं वर्द्धते ॥१०॥

॥ शनिमृत्युञ्जय स्तोत्रम् ॥

नीलाद्रि शोभांचित दिव्य मूर्तिः
खड्गी त्रिदण्डी शर चाप हस्तः ।
शम्भूर्महाकाल शनि पुरारि
जयत्यशेषासुर नाशकारी ॥
मेरुपृष्ठे समासीनं सामरस्ये स्थितं शिवम् ।
प्रणम्य शिरसा गौरी पृच्छतिस्म जगद्धितम् ॥

॥ पार्वत्युवाच ॥

भगवन्! देवदेवेश! भक्तानुग्रहकारक !
अल्पमृत्युविनाशाय यत्त्वया पूर्व सूचितम् ॥
तदेव त्वं महाबाहो! लोकानां हितकारकम् ।
तव मूर्ति प्रभेदस्य! महाकालस्य साम्प्रतम् ॥
शनैर्मृर्त्यजयस्तोत्रं ब्रूहि मे नेत्रजन्मनः ।
अकाल - मृत्युहरणमपमृत्यु - निवारणम् ॥
शनिमन्त्रप्रभेदा ये तैर्युक्तं यत्स्तवं शुभम् ।
प्रतिनाम चतुर्थ्यन्तं नमोऽस्तु मनुनायुतम् ॥

॥ श्री ईश्वरोवाच ॥

नित्य प्रियतमे गौरि सर्वलोकहितेरते ।
गुह्याद् गुह्यतमं दिव्यं सर्वलोकहितेरते ॥
शनि मृत्युंजयस्तोत्रं प्रवक्ष्यामि तवाऽधुना ।
सर्वमंगलमांगल्यं सर्वशत्रु विमर्दनम् ॥
सर्वरोगप्रशमनं सर्वापद्विनिवारणम् ।
शरीरारोग्य - करणमायुर्वृद्धिकरं नृणाम् ॥
यदि भक्तासि मे गौरि गोपनीयं प्रयत्नतः ।
गोपितं सर्वतंत्रेषु तच्छृणुष्व महेश्वरि ॥

विनियोगः- ॐ अस्य श्रीमहाकालशनिमृत्युञ्जयस्तोत्रमंत्रस्य पिप्पलाद ऋषिः, अनुष्टुप् छन्दः, महाकालशनिर्देवता, शां बीजं, आयसी शक्तिः, कालपुरुषायेति कीलकं ममाऽकालमृत्युनिवारणार्थे जपे पाठे विनियोगः।

ऋषिन्यासं करन्यासं देहन्यासं समाचरेत् ।
महोग्रं मूर्ध्नि विन्यस्य मुखे वैवस्वतं न्यसेत् ॥
हृदिन्यसेत् महाकालं गुह्ये कृशतनुं न्यसेत् ।
जान्वोस्तूरूचरं न्यस्य पादयोस्तु शनैश्चरम् ।
गले तु विन्यसेन्मन्दं बाह्वोर्महाग्रहं न्यसेत् ।
एवं न्यासविधिं कृत्वा पश्चात् कालात्मनः शनेः ॥
न्यास ध्यानं प्रवक्ष्यामि ततौ ध्यात्वा पठेन्नरः ।
कल्पादियुगभेदांश्च कराङ्गन्यासरूपणिः ॥
कालात्मनो न्यसेद् गात्रे मृत्युंजय! नमोऽस्तुते ।
मन्वतराणि सर्वांगे महाकालस्वरूपिणः ।
भावयेत्प्राप्ति प्रत्यंगं महाकालस्य ते नमः ॥
भावयेत्प्रभवाद्यब्दान् शीर्षे कालजिते नमः ।
नमस्ते नित्यसेव्याय विन्यसेदयने भ्रुवोः ।
सौरये च नमस्तेऽस्तु गण्डयोर्विन्यसेत् ततः ॥
नमो वै दुर्निरीक्ष्याय चाश्विनं विन्यसेन्मुखे ।

नमो नीलमयूखाय ग्रीवायां कार्तिकं न्यसेत् ॥
मार्गशीर्षं न्यसेद् बाह्वोर्महारौद्राय ते नमः ।
उद्ध्र्वलोकनिवासाय पौषं तु हृदये न्यसेत् ॥
नमः कालप्रबोधाय माघं वै चोदरेन्यसेत् ।
मन्दगाय नमो मेढ्रं न्यसेद्वै फाल्गुनं तथा ॥
ऊर्वोर्न्यसेच्चैत्रमासं नमः शिवोत्क्रषाय च ।
वैशाखं विन्यसेज्जान्वोर्नमः संवर्त्तकाय च ॥
जंघयोभौ न्यसेज्ज्येष्ठं भैरवाय नमस्तथा ।
आषाढं पादयोश्चैव शनये च नमस्तथा ॥
कृष्णपक्षं च क्रूराय नमः आपाद मस्तके ।
न्यसेदाशीर्ष पादान्ते शुक्लपक्षं ग्रहाय च ॥
न्यसेन्मूलं पादयोश्च ग्रहाय शनये नमः ।
नमः सर्वजिते चैव तोयं सर्वांगुलौ न्यसेत् ॥
न्यसेद् गुल्फद्वये विश्वं नमः शुष्कतराय च ।
विष्णवयं भावयेज्जंघोभये शिष्टतमाय ते ॥
जानुद्वये धनिष्ठां च न्यसेत् कृष्णारुचे नमः ।
पूर्वाभाद्रं तथाग्रे च करालाय नमस्तथा ।
उरूद्वये च वरुणो न्यसेत् कालभृते नमः ।
पृष्ठउत्तरभाद्रं च करालाय नमस्तथा ।
रेवतीं च न्यसेन्नाभौ नमो मन्दचराय च ।
गर्भदेशे न्यसेदाभो नमो श्यामतराय च ॥
नमो भोगिस्त्रजे नित्यं यमं स्तनयुगे न्यसेत् ।
न्यसेत्कृत्तिका हृदये नमस्तैलप्रियाय च ॥
रोहिणीं भावयेद्धस्ते नमस्ते खड्गधारिणे ।
पुनर्वसुमूर्ध्वभागे नमो वै बाणधारिणे ।
मृगंन्यसेत् द्वामहस्ते त्रिदण्डोल्लासिताय च ।
दक्षोद्ध्र्वे भावयेद्रौद्रं नमो वै बाणधारिणे ॥

तिष्यं न्यसेद्दक्षबाहौं नमस्ते हर मन्यवे ।
सार्पं न्यसेद्वामबाहौ चोग्रचापाय ते नमः ॥
मघां विभावयेत्कण्ठे नमस्ते भस्मधारिणे ।
मुखे न्यसेद्भगर्चं च नमः क्रूरग्रहाय च ॥
भावेद्दक्षनासायामर्यमाणञ्च योगिने ।
भावेद्वामनासायां हस्तञ्च धारिणे नमः ॥
त्वाष्ट्रं न्येसद्दक्षकर्णे नमोऽस्तु ब्राह्मणाय ते ।
विशाखां च दक्षनेत्रे नमस्ते ज्ञानदृष्टये ॥
विष्कुंभ भावयेच्छीर्षसन्धौ कालाय ते नमः ।
प्रीतियोगं भ्रुवोः संधौ महामन्द! नमोऽस्तुते ।
नेत्रयोः संधावायुष्मेऽधोगं भीष्माय ते नमः ॥
सौभाग्यं भावयेन्नासासन्धौ फलाशनाय च ।
शोभनं भावयेत्कर्णौ सन्धौ पुष्यात्मने नमः ।
नमः कृष्णायातिगण्डं हनुसन्धौ विभावयेत् ॥
नमो निर्मांसदेहाय सुकर्माणं शिरोधरे ।
धृतिं न्यसेद्देहवातौ पृष्ठे छायासुताय च ॥
तन्मूलसन्धौ शूलं च न्यसेदग्राय ते नमः ।
तत्कपूरे न्यसद्गण्डे नित्यानन्दाय ते नमः ॥
हर्षणं तन्मूलसन्धौ भूतसन्तापिने नमः ।
तत्कपूरे न्येसद्वज्रं सानन्दाय नमोऽस्तु ते ॥
सिद्धिं तन्मणिबन्धे च न्यसेत् कालाग्नये नमः ।
व्यतीपातं कराग्रेषु न्यसेत्कालकृते नमः ॥
वरीयांसं दक्षपार्श्वसन्धौ कालात्मने नमः ।
परिघं भावयेद्वामपार्श्वसन्धौ नमोस्तु ते ॥
न्यसेद्दक्षोरुसन्धौ च शिवं वै कालसाक्षिणे ।
तज्जानौ भावयेत्सिद्धिं महादेहाय ते नमः ॥

साध्यं न्यसेच्च तद्गुल्फसन्धौ घोराय ते नमः ।
न्यसेत्तदंगुलीसन्धौ शुभं रौद्राय ते नमः ॥
न्यसेद्वामोरुसन्धौ च शुक्लकालविदे नमः ।
ब्रह्मयोगं च तज्जानौ न्यसेत्सद्योगिने नमः ॥
ऐन्द्रं तद्गुल्फसन्धौ च योगोर्वीशाय ते नमः ।
न्यसेत्तदंगुलीसन्धौ नमो भव्याय वैधृतिम् ॥
चर्मणि बवकरणं च भावयेद्यज्वने नमः ।
वालवं भावयेद्रक्ते नमो भव्याय वैधृतिः ॥
कौलवं भावयेदस्थि नमस्ते सर्वभक्षिणे ।
तैतिलं भावयेन्मांसे आममांसप्रियाय ते ॥
गरं न्यसेद्वसायां च सर्वग्रासाय ते नमः ।
न्यसेद्वणिज्यं मज्जायां सर्वान्तक नमोऽस्तुते ॥
वीर्ये च भावयेद्विष्टिं नमो मन्यूग्रतेजसे ।
रुद्रमित्रं पितृवसुवारीयेतांश्च पञ्च च ॥
मुहूर्तांश्च दक्षपादनखेषु भावयेन्नमः ।
पुरूहूर्त्तांश्च वामपादनखेषु भावयेन्नमः ॥
सत्यव्रताय सत्याय नित्यसत्याय ते नमः ।
सिद्धेश्वर! नमस्तुभ्यं योगेश्वर! नमोऽस्तुते ॥
बाघनक्तंचरांश्चैव वरुणार्यमयोनिकान् ।
मुहूर्तांश्च दक्षहस्तनखेषु भावयेन्नमः ॥
लग्नोदयाय दीर्घाय मार्गिणे दक्षदृष्टये ।
वक्राय चातिक्रूराय नमस्ते वामदृष्टये ॥
वामहस्तनखेष्वन्तर्यवर्णेशाय ते नमः ।
गिरिशाहिर्बुध्न्यपूषाजपष्च्छस्त्रांश्च भावयेत् ॥
राशिभोक्त्रे राशिगाय राशिभ्रमणकारिणे ।
राशिनाथाय राशीनां फलदात्रे नमोऽस्तुते ॥

यमाग्निचन्द्रादितिकविधातृंश्च विभायेत् ।
ऊर्ध्वहस्तदक्षनखेष्वन्यत्कालाय ते नमः ॥
तुलोच्चस्थाय सौम्याय नक्रकुम्भगृहाय च ।
समीरत्वष्टजीवांश विष्णु तिग्मद्युतिन्न्यसेत् ॥
ऊर्ध्ववामहस्तेष्वन्यग्रह दोष निवारणे ।
तुष्टाय च वरिष्ठाय नमो राहुसखाय च ॥
रविवारं ललाटे च न्यसेद्भीमदृशे नमः ।
सोमवारं न्यसेत्वान्त्रे नमो जीवस्वरूपिणे ॥
भौमवारं न्यसेत् वान्ते नमो मृतप्रियाय च ।
मेढ्रे न्यसेत्सौम्यवारं नमो जीवस्वरूपिणे ॥
वृषणे गुरुवारे च नमो मंत्रस्वरूपिणे ।
भृगुवारं मलद्वारे नमः प्रलयकारिणे ॥
पादयोः शनिवारं च निर्मांसाय नमोऽस्तुते ।
घटिकां न्यसेत्केशेषु नमस्ते सूक्ष्मरूपिणे ॥
कालरूपिन्नमस्तेऽस्तु सर्वपापप्रणाशक ।
त्रिपुरस्य वधार्थाय शम्भू जाताय ते नमः ॥
नमः कालशरीराय कालनेत्राय ते नमः ।
कालहेतो! नमस्तुभ्यं कालात्मजाय ते नमः ॥
अखण्डदण्डमानाय त्वनाद्यन्ताय वै नमः ।
कालदेवाय कालाय कालकालाय ते नमः ॥
निमेषादिमहाकल्पकालरूपं च भैरवम् ।
मृत्युंजय महाकालं नमस्यामि शनैश्चरम् ॥
दातारं सर्वभव्यानां भक्तानामभयंकरम् ।
मृत्युंजयं महाकालं नमस्यामि शनैश्चरम् ॥
कर्त्तारं सर्वदुःखानां दुष्टानां भयवर्धनम् ।
मृत्युंजय महाकालं नमस्यामि शनैश्चरम् ॥
इतरं ग्रहजातानां फलानामधिकारिणाम् ।

मृत्युंजय महाकालं नमस्यामि शनैश्चरम् ॥
सर्वेषामेव भूतानां सुखदं शान्तिमव्ययम् ।
मृत्युंजय महाकालं नमस्यामि शनैश्चरम् ॥
कारणं सुखदुःखानां भावाऽभावस्वरूपिणम् ।
मृत्यञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥
अकालमृत्युहारिणमपमृत्यु निवारणम् ।
मृत्युंजय महाकालं नमस्यामि शनैश्चरम् ॥
कालरूपेण संसारं भक्षयन्तं महाग्रहम् ।
मृत्युंजय महाकालं नमस्यामि शनैश्चरम् ॥
दुर्निरीक्ष्यं स्थूल रोमं भीषणं दीर्घलोचनम् ।
मृत्युंजयं महाकालं नमस्यामि शनैश्चरम् ॥
कालस्य वशगाः सर्वे न कालः कस्यचिद्वशः ।
तस्मात्त्वां कालपुरुषं प्रणतोऽस्मि शनैश्चरम् ।
कालादेव जगत्सर्वं काले एव विलीयते ।
कालरूपः स्वयं शम्भूः कालात्मा ग्रह देवता ॥
चण्डीशो रुद्रडाकिन्याक्रान्त चण्डीश उच्यते ।
विद्युदाकलितो नद्यां समारूढ़ो रसाधिपः ॥
चण्डीशः शुकसंयुक्तो जिह्वया ललित पुनः ।
चित्तजस्तामसी शोभी स्थिरात्मा विद्युतायुतः ॥
नमोऽन्तो मनुरित्येष शन्नितुष्टिकरः शिवे ।
आद्यन्तेऽष्टोत्तरशतं मनुमेन जपेन्नरः ॥
यः पठेच्छृणुयाद्वापि ध्यात्त्वा सम्पूज्य भक्तितः ।
तस्य मृत्युर्भयं नैव शतवर्षावधिप्रिये ॥
ज्वराः सर्वे विनश्यंति दद्रु-विस्फोटकाच्छुभा ।
दिवा सौरिं स्मरेत् रात्रौ महाकालं यजन् पठेत् ॥
जन्मर्क्षे च यदा सौरिर्जपेदेतत्सहस्त्रकम् ।
वेधगे वामवेधे वा जपेद्वर्षसहस्त्रकम् ॥

द्वितीये द्वादशे मन्दे तनौ वा चाष्टगेऽपि वा ।
तत्तद्राशौ भवेद्यावत् पठेत्तावद्दिनावधि ॥
चतुर्थे दशमे वाऽपि सप्तमे नवपञ्चमे ।
गोचरे जन्मलग्नेशो दशास्वन्तर्दशासु च ॥
गुरुलाघवज्ञानेन पठेत्तावद्दिनावधि ।
शतमेकं त्रयं वाऽयं शतयुग्मं कदाचन ॥
आपदस्तस्य नश्यन्ति पापानि न जयं भवेत् ।
महाकालालये पीठे ह्यथवा जलसन्निधौ ॥
पुण्यक्षेत्रेऽश्वत्थमूले तैलकुम्भाग्रतो ग्रहे ।
नियमेवैकमत्तेन ब्रह्मचर्येण मौनिना ॥
श्रौतव्यं पठितव्यं च साधकानां सुखावहम् ।
परं स्वस्त्ययनं पुण्यं स्तोत्रं मृत्युञ्जयाभिधम् ॥
कालक्रमेण कथितं न्यासक्रम समन्वितम् ।
प्रातःकाले शुचिर्भूत्वा पूजायां च निशामुखे ॥
पठतां नैव दुष्टेभ्यो व्याघ्रसर्पादितो भयम् ।
नाग्नितो न जलाद्वायोर्देशे देशान्तरेऽथवा ॥
नाऽकाले मरणं तेषां नाऽपमृत्युभयं भवेत् ।
आयुर्वर्षशतं साग्रं भवन्ति चिरजीविनः ॥
नाऽतः परतरं स्तोत्रं शनितुष्टिकरं महत् ।
शान्तिकं शीघ्रशाफल्यं स्तोत्रमेतन्मयोदितम् ॥
तस्मात्सर्वप्रयत्नेन यदीच्छेदात्मनो हितम् ।
कथनीयं महादेवि! नैवाभक्तस्य कस्यवित् ॥

॥ इति मार्तण्डभैरव तंत्रे शनिमृत्युञ्जय स्तोत्रम् ॥

॥ अथ कीड़ी नगरा साधना ॥

ॐ योजन गंधा जोगिनी, ऋद्धि सिद्धि में भरपूर
मैं आयो तोय जाचणे, करजो कारज जरूर ॥

विधानम् - गेहूँ का आटा सवा सेर, घी ढ़ाई पाव, चीनी ढ़ाई पाव, इनका कंसार भूनकर तैयार कर लेवें। शनिवार को सूर्योदय से पहिले जंगल में जाकर कीड़ी नगरा (चींटा-चींटी के बिलों) में थोड़ा-थोड़ा कंसार गिराते जावे और ऊपर लिखे मंत्र का उच्चारण करते जावे। इस तरह दिन भर जंगल में खूब फिरे थकने पर किसी वृक्ष के नीचे विश्राम करें। उसी समय निद्रावस्था प्राप्त होने से एकाकी पुरुष या स्त्री सामने आकर खड़े हो जायेगी और साधक के मनोप्सित कार्य को अच्छे स्पष्ट वचनों से बतावेगा। उसकी बात सब साधक को अच्छी तरह सुनायी देवेगी। यह चार पहर का प्रयोग निराहार व्रत करके करना योग्य है। यह पहले ही दिन प्रश्न का उत्तर दे देता है इसमें कुछ सन्देह नहीं। कई दिनों तक करने से तो मनोवांछित फल प्राप्त होता है। रात्रि को घर में आकर भोजन करना चाहिये। इस प्रयोग से शनि, राहु, केतु आदि क्रूर ग्रह प्रसन्न होकर मनोकामना पूर्ण करते है तथा योजन गंधा योगिनी के रूप में उत्तर देते है।

॥ शनिशान्ति प्रयोग: ॥

रोगलक्षण -

ऋण, दु:ख, पैरों की तकलीफ, मंदाग्नि, वातवमन, शरीर में कंपन, अकस्मात् चोट दुर्घटना, दीर्घकालीन बिमारियां, शारीरिक दुर्बलता, कदछोटा होना अपयश, मुकदमेबाजी, चोरी, सट्टा एवं नशे की आदत, अकारण शत्रुता, अपयश आदि।

उपचार -

१. शनिवार को शनिनक्षत्र - पुष्य, अनुराधा, उ.भाद्रपद में से किसी नक्षत्र में चन्द्रबल देखकर यंत्र धारण करें।

२. नराकार शनियंत्र पर तैलाभिषेक करायें या शनिमूर्ति पर तैलाभिषेक शनि मन्त्रों से करायें।

३. बिच्छुकांटा की जड़ या हत्थाजोड़ी की महादुर्गा या महाकाली के नाममन्त्रों से पूजन कर धारण करें, अपने पास रखें। हत्थाजोड़ी की पूजा करें सिन्दूर

चढ़ावें, लोबान का धूप देवें।

मन्त्र - ॐ किलि किलि स्वाहा।

४. कालेतिल, लोध्रपुष्प, शतपुष्पी, लाजा, उड़द, लौंग, सुगन्धित पुष्प आदि सब के जल से स्नान करने से शनि पीड़ा दूर होवे।

५. **दान** - कालेतिल, उड़द, भैंस, लोहा, तैल, कालावस्त्र, ऊन, नीलम, कुलथी, कालीगौ, कालेपुष्प, जूता, कस्तूरी एवं स्वर्णादि के दान से शनिपीड़ा दूर होवे।

६. **रत्न** - नीलम, कटैला या लाजवर्त्त धारण करें।

॥ श्रीशनि अष्टोत्तरशत नामावली ॥

ॐ शं शनैश्चराय नमः।
ॐ शं शान्ताय नमः।
ॐ शं सर्वाभीष्टप्रदायिने नमः।
ॐ शं शरण्याय नमः।
ॐ शं वरेण्याय नमः।
ॐ शं सर्वेशाय नमः।
ॐ शं सैन्याय नमः।
ॐ शं सुर वन्द्याय नमः।
ॐ शं सुरलोक विहारिणे नमः।
ॐ शं सुखासनोपविष्टाय नमः।
ॐ शं सुन्दराय नमः।
ॐ शं घनाय नमः।
ॐ शं घनरूपाय नमः।
ॐ शं घनाभरणधारिणे नमः।
ॐ शं खद्योताय नमः।
ॐ शं मन्दाय नमः।
ॐ शं मन्दचेष्टाय नमः।
ॐ शं महनीयगुणात्मने नमः।
ॐ शं मर्त्यपावनपादाय नमः।
ॐ शं महेशाय नमः।
ॐ शं छायापुत्राय नमः।
ॐ शं शर्वाय नमः।
ॐ शं शततूणीर धारिणे नमः।
ॐ शं शुष्काय नमः।
ॐ शं चरस्थिरस्वभावाय नमः।
ॐ शं चञ्चलाय नमः।
ॐ शं नीलवर्णाय नमः।
ॐ शं नित्याय नमः।
ॐ शं नीलाञ्जननिभाय नमः।
ॐ शं नीलाम्बरविभूषाय नमः।
ॐ शं निश्चलाय नमः।
ॐ शं वेद्याय नमः।
ॐ शं विधिरूपाय नमः।
ॐ शं विरोधाधारभूमये नमः।

ॐ शं वेदास्वादस्वभावाय नमः।
ॐ शं वज्रदेहाय नमः।
ॐ शं वैराग्यदाय नमः।
ॐ शं वीराय नमः।
ॐ शं वीतरोगभयाय नमः।
ॐ शं विपत्परं परेशाय नमः।
ॐ शं विश्ववन्द्याय नमः।
ॐ शं गृध्रवाहनाय नमः।
ॐ शं गूढाय नमः।
ॐ शं कर्माङ्गाय नमः।
ॐ शं कुरूपिणे नमः।
ॐ शं कुत्सिताय नमः।
ॐ शं गुणाढ्याय नमः।
ॐ शं गोचराय नमः।
ॐ शं अविद्यामूलनाशनाय नमः।
ॐ शं विद्याऽविद्यास्वरूपिणे नमः।
ॐ शं आयुष्यकारणाय नमः।
ॐ शं आपदुद्धर्ते नमः।
ॐ शं विष्णुभक्ताय नमः।
ॐ शं वशिने नमः।
ॐ शं विविधागमवेदिने नमः।
ॐ शं विधिस्तुत्याय नमः।
ॐ शं वन्द्याय नमः।
ॐ शं विरूपाक्षाय नमः।
ॐ शं वरिष्ठाय नमः।

ॐ शं गरिष्ठाय नमः।
ॐ शं वज्रांकुशधराय नमः।
ॐ शं वरदाय नमः।
ॐ शं अभयहस्ताय नमः।
ॐ शं वामनाय नमः।
ॐ शं ज्येष्ठापत्नीसमेताय नमः।
ॐ शं श्रेष्ठाय नमः।
ॐ शं मितभाषिणे नमः।
ॐ शं कष्टौघनाशिने नमः।
ॐ शं आर्यपुष्टिदाय नमः।
ॐ शं स्तुत्याय नमः।
ॐ शं स्तोत्रकामाय नमः।
ॐ शं भक्तिवश्याय नमः।
ॐ शं भानवे नमः।
ॐ शं भानुपुत्राय नमः।
ॐ शं भव्याय नमः।
ॐ शं पावनाय नमः।
ॐ शं धनुर्मण्डलसंस्थिताय नमः।
ॐ शं धनदाय नमः।
ॐ शं धनुष्मते नमः।
ॐ शं तनुप्रकाशदेहाय नमः।
ॐ शं तामसाय नमः।
ॐ शं अशेषजनवन्द्याय नमः।
ॐ शं विशेषफलदायिने नमः।
ॐ शं वशीकृतजनेशाय नमः।

ॐ शं पशूनां पतये नमः।
ॐ शं खेचराय नमः।
ॐ शं घननीलाम्बराय नमः।
ॐ शं काठिन्यमानसाय नमः।
ॐ शं आर्यगणस्तुताय नमः।
ॐ शं नीलच्छत्राय नमः।
ॐ शं नित्याय नमः।
ॐ शं निर्गुणाय नमः।
ॐ शं गुणात्मने नमः।
ॐ शं निरामयाय नमः।
ॐ शं निन्द्याय नमः।
ॐ शं वन्दनीयाय नमः।
ॐ शं धीराय नमः।
ॐ शं दिव्यदेहाय नमः।
ॐ शं दीनार्तिहरणाय नमः।
ॐ शं दैन्यनाशनाय नमः।
ॐ शं आर्यजनगण्याय नमः।
ॐ शं क्रूराय नमः।
ॐ शं क्रूरचेष्टाय नमः।
ॐ शं कामक्रोधकराय नमः।
ॐ शं कलत्रपुत्रशत्रुत्व कारणाय नमः।
ॐ शं परितोषितभक्ताय नमः।
ॐ शं परभीतिहराय नमः।
ॐ शं भक्तसङ्घमनोभीष्टफलदाय नमः।

॥ इति श्रीशनि अष्टोत्तरशत नामावली ॥

॥ श्री राहुतन्त्रम् ॥

॥ अथ राहुवैदिकमन्त्रप्रयोगः॥

राहुमंत्रः- ॐ कयां नश्चित्रऽआभुवदूतीसदाव्वृधःसखा कयाशचिष्ठ यावृता ॥८ ॥

विनियोगः- ॐ कयान इति मन्त्रस्य वामदेव ऋषिः। गायत्रीछन्दः। राहुर्देवता। कयान इति बीजम्। शचिरिति शक्तिः। राहुप्रीत्यर्थे जपे विनियोगः ॥

ऋष्यादि न्यासः- ॐ वामदेव ऋषये नमः शिरसि ॥१ ॥ ओं गायत्रीछन्दसे नमः मुखे ॥२ ॥ ओं राहुदेवतायै नमः हृदये ॥३ ॥ ओं कयान इति बीजाय नमः गुह्ये ॥४ ॥ ओं शचिरिति शक्तये नमः पादयोः ॥५ ॥ विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादिन्यासः।

करन्यासः- ओं कयान इत्यङ्गुष्ठाभ्यां नमः ॥१ ॥ ओं चित्र इति तर्जनीभ्यां नमः ॥२ ॥ ओं आभुव इति मध्यमाभ्यां नमः ॥३ ॥ ॐ दूतीसदावृध इत्यनामिकाभ्यां नमः ॥४ ॥ ॐ सखाकया इति कनिष्ठिकाभ्यां नमः ॥५ ॥ ॐ शचिष्ठयावृता इति करतलकरपृष्ठाभ्यां नमः ॥६ ॥ इति करन्यासः।

हृदयादि न्यास- ॐ कयान इति हृदयाय नमः ॥१ ॥ ॐ चित्र इति शिरसे स्वाहा ॥२ ॥ ॐ आभुव इति शिखायै वषट् ॥३ ॥ ॐ दूतीसदावृध इति कवचाय हुं ॥४॥ ॐ सखाकया इति नेत्रत्रयाय वौषट् ॥५॥ ॐ शचिष्ठयावृता इत्यस्त्राय फट् ॥६ ॥

मंत्रन्यास- ॐ कया शिरसि ॥१ ॥ ॐ न इति ललाटे ॥२ ॥ ॐ चित्र मुखे ॥३ ॥ ॐ आभुव दूती नाभौ ॥४॥ ॐ सदावृधः कट्याम् ॥५ ॥ ॐ सखा ऊर्वोः ॥६ ॥ ॐ कया जानुनोः ॥७ ॥ ॐ शचिष्ठया गुल्फयोः ॥८ ॥ ॐ वृता पादयोः ॥९ ॥ इति मन्त्रन्यासः।

एवं न्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्–

नीलांबरो नीलवपुः किरीटी करालवाक्त्रः करवलशूली ।
चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यम् ॥१ ॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्य्यात्।

राहोरष्टादशैव तु १८००० इति दूर्वासमित्तिलपायसघृतैर्दशांशहोमः। अन्यत्सर्वं पूर्ववत्।

अथ दानद्रव्याणि–

गोमेदरत्नं च तुरंगमश्च सुनीलचैलाममलकंबलं च ।
तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदंति ॥१ ॥

॥ इति राहुमन्त्रजपप्रयोगः ॥

॥ राहु तांत्रिक मंत्राः ॥

१ षडक्षर मंत्रः– रां राहवे नमः।

इस मंत्र के ऋषि ब्रह्मा। छन्द गायत्री। देवता राहु। है।

२ सप्ताक्षर मंत्रः– ॐ गं राहवे नमः।

ऋषि ब्रह्मा। छन्द पंक्ति। देवता राहु। बीज रां। शक्ति त्वेशः।

ध्यानम्–

वन्दे राहुं धूम्रवर्ण अर्धकायं कृताञ्जलिम् ।
विकृत्यास्यं रक्तनेत्रं धूम्रालङ्कारमन्वहम् ॥

दशाक्षर मंत्र– ॐ सां सीं सौं रां राहवे स्वाहा।

अन्यच्च– ॐ भ्रां भ्रीं भ्रौं सः राहवे नमः।

यंत्रार्चनम्– षटकोण एवं भूपूर युक्त यंत्र बनाये।

प्रथमावरणम्– ॐ रां हृदयाय नमः। ॐ रीं शिरसे स्वाहा। ॐ रूं शिखायै वषट्। ॐ रैं कवचाय हुं। ॐ रौं नेत्रत्रयाय वौषट्। ॐ रः अस्त्राय फट्।

द्वितीवारणम्- भूपूर में इन्द्रादि लोकपालों का एवं **तृतीयावरणम्** में उनके वज्रादि आयुधों का पूजन करें।

मंत्र का पुरश्चरण करके दूर्वा से होम करें।

॥ श्रीराहु पञ्चविंशति नाम स्तोत्रम्॥

विनियोगः- ॐ अस्य श्री राहु पंचविंशन्नाम-स्तोत्रस्य वामदेव ऋषिः, गायत्री छन्दः, श्री राहुर्देवता, श्री राहुप्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः - शिरसि वामदेव ऋषये नमः। मुखे गायत्रीछन्दसे नमः। हृदि श्रीराहुर्देवतायै नमः। सर्वाङ्गे श्रीराहुप्रीत्यर्थे पाठे विनियोगाय नमः।

राहुर्दानवमंत्री च सिंहिका चित्त नंदनः।
अर्धकायः सदा क्रोधी चन्द्रादित्य-विमर्दनः॥
रौद्रो रुद्रप्रियो दैत्यः स्वर्भानुर्भानुभीतिदः।
ग्रहराजः सुधापायी राकातिथ्यभिलाषकः॥
कालदृष्टिः कालरूपः श्रीकण्ठहृदयाश्रितः।
विधुन्तुदः सैंहिकेयो घोररूपो महाबलः॥
ग्रहपीड़ाकरो दंष्ट्री रक्तनेत्रो महोदरः।

॥ फलश्रुति ॥

पञ्चविंशतिनामानि स्मृत्वा राहुं सदा नरः॥
यः पठेन् महतीं पीडां तस्य नश्यति निश्चितम्।
आरोग्यं पुत्रमतुलां श्रियं धान्यं पशूंस्तथा॥

ददाति राहुस्तस्मै यः पठेत् स्तोत्रमनुत्तमम् ।
सततं पठते यस्तु जीवेत् वर्ष शतं नरः ॥

॥ श्री स्कन्द पुराणे श्री राहु स्तोत्रम् ॥

॥ श्रीराहु कवचम् ॥

विनियोग :- ॐ अस्य श्रीराहु कवचस्य चन्द्रमा ऋषिः, अनुष्टुप् छन्दः, श्रीराहुर्देवता, राँ बीजं, नमः शक्तिः, स्वाहा कीलकं, श्रीराहु प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादिन्यास :- शिरसि चन्द्रमा ऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीराहु देवतायै नमः। गुह्ये राँ बीजाय नमः। पादयोः नमः शक्तये नमः। नाभौ स्वाहा कीलकाय नमः। सर्वाङ्गे श्रीराहु प्रीत्यर्थे पाठे विनियोगाय नमः।

मन्त्रः	करन्यास	षडङ्गन्यास
राँ	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
रीँ	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
रूँ	मध्यमाभ्यां नमः।	शिखायै वषट्।
रैं	अनामिकाभ्यां नमः।	कवचाय हुम्।
रौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
रः	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

ध्यानम् :-

प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम् ।
सैंहिकेयं करालास्यं लोकानामभयङ्करम् ॥

॥ स्तोत्रम् ॥

नीलाम्बरः शिरः पातु ललाटं लोक वन्दितः ।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्द्धशरीरवान् ॥
नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम ।
जिह्वा मे सिंहिकासूनुः कण्ठं मे कंठिनाङ्घ्रिकः ॥

भुजङ्गेशो भुजौ पातु नील माल्याम्बरः करौ ।
पातु वक्षस्थलं मन्त्री पातु कुक्षिं विधुन्तुदः ॥
कटिं मे विकटः पातु ऊरू मे सुरपूजितः ।
स्वभानुर्जानुनी पातु जङ्घे मे पातु जाड्यहा ॥
गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः ।
सर्वाण्यङ्गानि मे पातु नीलश्चन्दन भूषणः ॥

॥ फलश्रुति ॥

राहोरिदं कवचमृद्धिदं वस्तुदं यो भक्त्या
पठत्यनुदिनं नियतः शुचिः सन् ।
प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्य-
मात्मविजयं च हि तत् प्रसादात् ॥

॥ इति श्रीमहाभारते द्रोणपर्वे श्रीराहुकवचम् ॥

॥ राहुशान्ति प्रयोगः॥

रोगलक्षण -

वातरोग, हिचकी, शिर:शूल, अतिसार, प्रदर, अम्लीय विकार, मूर्छा, मन्दबुद्धि, आलस्य, अविवेक, हकलाना, हाथ पैरों में कमजोरी, नशे की आदत, जुआ सट्टा प्रवृत्ति, राजनैतिक असफलता, चरित्रहीनता, धोखा, चोरी, अपयश, व अनेक विघ्न राहु के कारण होते हैं।

उपचार -

१. राहुयंत्र को बुधवार या शनिवार को एवं आर्द्रा, स्वाति, शतभिषा नक्षत्रों में पूजन कर धारण करें।

२. श्वेतचन्दन की माला धारण करें। श्वेतचन्दन का प्रयोग करें। स्फटिक के शिवलिङ्ग का पूजन शुभ रहे।

३. लोध्रफूल, भुजेहुये तिल, मोती, गजमद, कस्तूरी, इत्यादि के स्नान से राहु पीड़ा दूर होवे।

गुग्गल, हींग, हरताल, मन:शिला, बिनौला, को लोहपात्र में भिगायें, महिषशृंग या लौहपात्र से स्नान करने से राहुपीड़ा दूर होवे।

४. **दान** - अभ्रक, लोहा, सीसाकत्तीर, कांस्य, तिल, नीलावस्त्र, ऊन, छाग, ताम्रपात्र, सप्तधान्य, उड़द, गोमेद, कालापुष्प, तेल, कम्बल, घोड़ा एवं खड्ग के दान से राहु पीड़ा दूर होवे।

५. **रत्न** - गोमेद, एपीटाइट स्टोन को धारण करना शुभ रहें।

॥ श्रीराहु अष्टोत्तरशत नामावली ॥

ॐ रां राहवे नमः।
ॐ रां सैंहिकेयाय नमः।
ॐ रां विदुतुन्दाय नमः।
ॐ रां सुरशत्रवे नमः।
ॐ रां तमसे नमः।
ॐ रां प्रणये नमः।
ॐ रां गार्ग्याननाय नमः।
ॐ रां सुरागवे नमः।
ॐ रां नीलजीमूतसङ्काशाय नमः।
ॐ रां चतुर्भुजाय नमः।
ॐ रां खड्गखेटकधारिणे नमः।
ॐ रां वरदायकहस्ताय नमः।
ॐ रां शूलायुधाय नमः।
ॐ रां मेघवर्णाय नमः।
ॐ रां कृष्णध्वजपताकवते नमः।
ॐ रां दक्षिणाशामुखस्थाय नमः।
ॐ रां तीक्ष्णदंष्ट्राकराय नमः।
ॐ रां शूर्पाकारासनस्थाय नमः।
ॐ रां गोमेदाभरणप्रियाय नमः।
ॐ रां माषप्रियाय नमः।
ॐ रां काश्यपर्षिनन्दनाय नमः।
ॐ रां भुजगेश्वराय नमः।
ॐ रां उल्कापातयित्रे नमः।
ॐ रां शूलनिधिपाय नमः।
ॐ रां कृष्णसर्पराज्ञे नमः।
ॐ रां वृषत्वराव्रतास्याय नमः।
ॐ रां अर्धशरीराय नमः।
ॐ रां जाड्यप्रदाय नमः।
ॐ रां रवीन्दुभीकराय नमः।
ॐ रां छायास्वरूपिणे नमः।
ॐ रां कठिनाङ्गाय नमः।
ॐ रां द्विषचक्रभेदकाय नमः।
ॐ रां करालास्याय नमः।
ॐ रां भयङ्कराय नमः।
ॐ रां क्रूरकर्मणे नमः।
ॐ रां तमोरूपाय नमः।
ॐ रां श्यामात्मने नमः।
ॐ रां नीललोहिताय नमः।

ॐ रां किरीटिने नमः।
ॐ रां नीलवसनाय नमः।
ॐ रां शनिसामन्त वर्त्मगाय नमः।
ॐ रां चाण्डालवर्णाय नमः।
ॐ रां आत्मर्क्षभवाय नमः।
ॐ रां मेषभवाय नमः।
ॐ रां शनिवत् फलदाय नमः।
ॐ रां शूलाय नमः।
ॐ रां अपसव्यगतये नमः।
ॐ रां उपरागकराय नमः।
ॐ रां सूर्येन्दुच्छविह्लादकराय नमः।
ॐ रां नीलपुष्पविहाराय नमः।
ॐ रां ग्रहश्रेष्ठायनमः।
ॐ रां अष्टमग्रहाय नमः।
ॐ रां कबन्धमात्रदेहाय नमः।
ॐ रां यातुधानकुलोद्भवाय नमः।
ॐ रां गोविन्दवरपात्राय नमः।
ॐ रां देवजातिप्रविष्टकाय नमः।
ॐ रां क्रूराय नमः।
ॐ रां घोराय नमः।
ॐ रां शनेर्मित्राय नमः।
ॐ रां शुक्रमित्राय नमः।
ॐ रां अगोचराय नमः।
ॐ रां मौनये नमः।
ॐ रां गङ्गास्नानदात्रे नमः।

ॐ रां स्वगृहे भूबलाद्याय नमः।
ॐ रां स्वगृहेऽन्येबलहते नमः।
ॐ रां मातामहकारकाय नमः।
ॐ रां चन्द्रयुतचाण्डाल-
जन्मसूचकाय नमः।
ॐ रां जन्मसिंहाय नमः।
ॐ रां राज्यदात्रे नमः।
ॐ रां महाकायाय नमः।
ॐ रां जन्मकर्त्रे नमः।
ॐ रां राज्यधात्रे नमः।
ॐ रां मत्तकाज्ञानदाय नमः।
ॐ रां जन्मकान्याराज्यदात्रे नमः।
ॐ रां जन्महानिदाय नमः।
ॐ रां नवमे पित्ररोगाय नमः।
ॐ रां पञ्चमेशोकदायकाय नमः।
ॐ रां द्यूने कलत्रहन्त्रे नमः।
ॐ रां सप्तमे कलहप्रदाय नमः।
ॐ रां षष्ठे वित्तदात्रे नमः।
ॐ रां चतुर्थे वैरदात्रे नमः।
ॐ रां नवमे पापदात्रे नमः।
ॐ रां दशमेशोकदात्रे नमः।
ॐ रां आदौ यशः प्रदात्रे नमः।
ॐ रां अन्ते वैरप्रदात्रे नमः।
ॐ रां कलात्मने नमः।
ॐ रां गोचराचराय नमः।

ॐ रां धने ककुत्प्रदाय नमः।

ॐ रां पञ्चमे दृषद् श्रृङ्गदाय नमः।

ॐ रां स्वर्भानवे नमः।

ॐ रां बलिने नमः।

ॐ रां महासौख्यप्रदात्रे नमः।

ॐ रां चन्द्रवैरिणे नमः।

ॐ रां शाश्वताय नमः।

ॐ रां सूरशत्रवे नमः।

ॐ रां पापग्रहाय नमः।

ॐ रां पूज्यकाय नमः।

ॐ रां पाठीरपुरनाथाय नमः।

ॐ रां पैठीनसकुलोद्भवाय नमः।

ॐ रां भक्तरक्षाय नमः।

ॐ रां राहुमूर्तये नमः।

ॐ रां सर्वाभीष्टफलप्रदाय नमः।

ॐ रां दीर्घाय नमः।

ॐ रां कृष्णाय नमः।

ॐ रां अशिरसे नमः।

ॐ रां विष्णुनेत्रारये नमः।

ॐ रां देवाय नमः।

ॐ रां दानवाय नमः।

॥ इति श्रीराहु अष्टोत्तरशत नामावली ॥

॥ श्री केतुतन्त्रम् ॥

॥ अथ केतु वैदिकमंत्रप्रयोग:॥

मंत्र:-

ॐ केतुं कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथा ॥१ ॥

विनियोग:- केतुं कृण्वन्निति मंत्रस्य मधुऋषि:। गायत्री छंद:। केतुर्देवता। अपेशसे इति बीजम्। मर्य्या शक्ति:। केतुप्रीत्यर्थे जपे विनियोग:।

ऋष्यादि न्यास:-ॐ मधु ऋषये नम: शिरसि ॥१ ॥ ॐ गायत्री छन्दसे नम: मुखे ॥२ ॥ ॐ केतुदेवतायै नम: हृदये ॥३ ॥ ॐ अपेशसे इति बीजाय नम: गुह्ये ॥४ ॥ मर्य्याशक्तये नम: पादयो: ॥५ ॥ विनियोगाय नम: सर्वाङ्गे। इति ऋष्यादिन्यास:।

करन्यास:- ॐ केतुंकृण्वन् इत्यङ्गुष्ठाभ्यां नम: ॥१ ॥ ॐ अ केतवे इति तर्जनीभ्यां नम: ॥२ ॥ ॐ पेशोमर्य्या इति मध्यमाभ्यां नम: ॥३ ॥ ॐ अपेशसे अनामिकाभ्यां नम: ॥४ ॥ ॐ समुषद्भि: कनिष्ठिकाभ्यां नम: ॥५ ॥ ॐ अजायथा: करतलकरपृष्ठाभ्यां नम: ॥६ ॥ इति करन्यास:।

हृदयादिन्यास- ॐ केतुंकृण्वन्निति हृदयाय नम: ॥१ ॥ ॐ अकेतवे शिरसे स्वाहा ॥२ ॥ ॐ पेशोमर्य्या शिखायै वषट् ॥३ ॥ ॐ अपेशसे कवचाय हुं ॥४ ॥ ॐ समुषद्भिर्नेत्रत्रयाय वौषट् ॥५ ॥ ॐ अजायथा इत्यस्त्राय फट् ॥६ ॥ इति हृदयादिन्यास:।

मंत्रन्यास- ॐ केतुं शिरसि ॥१ ॥ ॐ कृण्वन् ललाटे ॥२ ॥ ॐ अकेतवे मुखे ॥३ ॥ ॐ पेशो हृदये ॥४ ॥ ॐ मर्य्या नाभौ ॥ ॥५ ॥ ॐ अपेशसे कट्याम् ॥६ ॥ ॐ समूर्वो: ॥७ ॥ ॐ उषद्भिर्जानुनो: ॥८ ॥ ॐ अजायथा:

पादयोः ॥१॥ इति मंत्रन्यासः।

एवं न्यासं कृत्वा ध्यायेत्।

अथ ध्यानम्–

धूम्रो द्विबाहुर्वरदो गदाभृद्गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूर विभूषितांबरः सदास्तु मे केतुगणः प्रशांतः ॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात्।

केतोः सप्त सहस्त्राणि ७००० जपसंख्या प्रकीर्तिता॥ ततो जपान्ते कुशसमित्तिलपायसघृतैर्दशांशहोमः॥ अन्यत्सर्वं पूर्ववत्॥

अथ दानद्रव्याणि-

वैडूर्यरत्नं सतिलं च तैलं सुकंबलं चापि मदो मृगस्य ।
शस्त्रं च केतोः परितोषहेतोश्छागस्य दानं कथितं मुनीन्द्रैः ॥

॥ इति केतु मंत्र जप प्रयोगः ॥

॥ केतु तान्त्रिकमंत्राः॥

षडक्षर मंत्रः- कं केतवे नमः।

सप्ताक्षर मंत्रः- ॐ कें केतवे नमः।

दोनो मंत्रो के ऋषि ब्रह्मा। छन्द पंक्ति। षडक्षर के बीज एवं शक्ति कं है।

ध्यानम्–

वन्दे केतुं कृष्णवर्णं कृष्णवस्त्र विभूषणम् ।
वामोरू-न्यस्त-तद्धस्तं साभयेतर-पाणिकम् ॥

दशाक्षर मंत्र- ॐ प्रां प्रीं प्रौं कं केतवे स्वाहा।

अन्यच्च- ॐ स्त्रां स्त्रीं सौं सः केतवे नमः।

यंत्रार्चनम्- षट्कोण एवं भूपूर युक्त बनावें।

प्रथमावरणम् (षट्कोणे)- ॐ कां हृदयाय नमः। ॐ कीं शिरसे स्वाहा। ॐ कूं शिखायै वषट्। ॐ कैं कवचाय हुं। ॐ कौं नेत्रत्रयाय वौषट्। ॐ कः अस्त्राय फट्।

द्वितीयावरणम्- भूपूर में इन्द्रादि लोकपालों एवं तृतीयावरणम् में उनके आयुधों का पूजन करें।

मंत्रो का पुरश्चरण करके कुशों से होम करें।

॥ श्री केतु विंशतिनाम स्तोत्रम्॥

केतुः कालः कलयिता धूम्रकेतुर्विवर्णकः ।
लोककेतुर्महाकेतुः सर्वकेतुर्भयप्रदः ॥
रौद्रो रुद्रप्रियो रुद्रः क्रूरकर्मा सुगन्धधृक्।
पलाशपुष्पसंकाशः चित्रयज्ञोपवीतधृक् ॥
तारागणविमर्दी च जैमिनेयो ग्रहाधिपः ।

॥ फलश्रुति ॥

एतद् विंशति नामानि केतोर्यः सततं पठेत् ।
तस्य नश्यन्ति बाधाश्च सर्वाः केतु-प्रसादतः ॥
धनधान्यपशूनां च भवेत् वृद्धिर्न संशयः ॥

(इति श्री स्कन्द पुराणे श्रीकेतोर्विंशति नाम स्तोत्रम् संपूर्णम्)

॥ श्री केतु कवचम्॥

विनियोगः- ॐ अस्य श्री केतु कवचस्य त्र्यम्बक ऋषिः, अनुष्टुप् छन्दः, श्रीकेतुर्देवता, श्रीकेतु-प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादि न्यासः- शिरसि त्र्यंबकऋषये नमः। मुखे अनुष्टुप् छन्दसे नमः। हृदि श्रीकेतुर्देवतायै नमः। सर्वाङ्गे श्रीकेतुप्रीत्यर्थे पाठे विनियोगाय नमः।

...क शिखिने नमः।

ध्यानम्—

क्रूरं करालवदनं चित्रवर्णं किरीटिनम् ।
प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम् ॥
चित्रवर्णं शिरः पातु भालं धूम्र समद्युतिः ।
पातु नेत्रे पिङ्गलाक्षः श्रुती मे रक्त लोचनः ॥
घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः ।
पातु कण्ठं च मे केतुः स्कन्धौ पातु ग्रहाधिपः ॥
हस्तौ पातु सुरश्रेष्ठः कुक्षिं पातु महाग्रहः ।
सिंहासनः कटिं पातु मध्यं पातु महाऽसुरः ॥
उरू पातु महाशीर्षो जानुनी मेऽति कोपनः ।
पातु पादौ च मे क्रूरः सर्वाङ्गं नरपिङ्गलः ॥

॥ फलश्रुति ॥

इतीदं कवचं दिव्यं सर्वरोगविनाशनम् ।
शत्रु विनाशं भूतानां शमनं सर्व सिद्धिदम् ॥
बहुना किमिहोक्तेन यद्यन्मनसि वर्तते ।
तत् सर्वं भवेत्तस्य कवचस्य च धारणात् ॥
यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत् ॥

(श्रीब्रह्माण्ड पुराणे श्रीकेतु कवचम्)

॥ केतुशान्ति प्रयोगः ॥

रोगलक्षण -

चर्मरोग, हड्डियों की पीड़ा विकार, वातव्याधि, श्वास, कृमिरोग, अनिद्रा, फोड़ा फुंसी, रक्तविकार, चेचक, गर्भपात्, शिशुदौर्बल्यता, आपरेशन योग, दांत की पीड़ा, शस्त्राघात्, दुर्घटना, शत्रुबाधा साधना के विघ्न केतु के कारण होते हैं।

उपचार -

१. केतुयंत्र को बुधवार के दिन या अश्विनी, मघा एवं मूलनक्षत्रों में पूजन कर धारण क

२. अश्वगंधा की जड़ को पूजन कर धारण करें।

३. सूअर के द्वारा खोदी गई मिट्टी, पर्वत की मिट्टी, बकरी का दूध ये सब एक लौह पात्र में भिगो देवें। शनिवार या बुधवार को शाम को स्नान करें।

देवदारु, सरसों तथा लोबान उबाल कर स्नान करने से अनिष्ट दूर होवे।

४. **दान** - कस्तूरी, तिल, छाग, कालावस्त्र, ध्वजा, सप्तधान्य, कम्बल, उड़द, वैडूर्य, लहसुनियां, फिरोजा, कालापुष्प, तेल, सुवर्ण, लोहा एवं शस्त्र का दान करना चाहिये।

५. **रत्न** - लहसुनिया, फिरोजा, वैडूर्य धारण करें।

॥ श्रीकेतु अष्टोत्तरशत नामावलि ॥

ॐ कें केतवे नमः।
ॐ कें स्थूलशिरसे नमः।
ॐ कें शिरोमात्राय नमः।
ॐ कें ध्वजाकृतये नमः।
ॐ कें नवग्रहयुताय नमः।
ॐ कें सिंहिकागर्भसम्भवाय नमः।
ॐ कें महाभीतिकराय नमः।
ॐ कें चित्रवर्णाय नमः।
ॐ कें पिङ्गलाय नमः।
ॐ कें फलधूम्रसङ्काशाय नमः।
ॐ कें तीक्ष्णदंष्ट्राय नमः।
ॐ कें महोरगाय नमः।
ॐ कें रक्तनेत्राय नमः।
ॐ कें चित्रकारिणे नमः।
ॐ कें महासुराय नमः।
ॐ कें तीव्रकोपाय नमः।
ॐ कें पापकण्टकाय नमः।
ॐ कें क्रोधनिधये नमः।
ॐ कें छायाग्रहविशेषकाय नमः।
ॐ कें अन्त्यग्रहाय नमः।
ॐ कें महाशीर्षाय नमः।
ॐ कें सूर्यारये नमः।
ॐ कें पुष्पवत्ग्रहिणे नमः।
ॐ कें वरहस्ताय नमः।
ॐ कें गदापाणये नमः।
ॐ कें चित्रशुभ्रधराय नमः।
ॐ कें चित्रध्वजपताकाय नमः।
ॐ कें घोराय नमः।
ॐ कें चित्ररथाय नमः।
ॐ कें शिखिने नमः।

ॐ कें कुलुत्थभक्षकाय नमः।
ॐ कें वैडूर्याभरणाय नमः।
ॐ कें उत्पातजनकाय नमः।
ॐ कें शुक्रमित्राय नमः।
ॐ कें मन्दसखाय नमः।
ॐ कें शिखिनेनापकाय नमः।
ॐ कें अन्तर्वेदिने नमः।
ॐ कें ईश्वराय नमः।
ॐ कें जैमिनिगोत्रजाय नमः।
ॐ कें चित्रगुप्तात्मने नमः।
ॐ कें दक्षिण-मुखाय नमः।
ॐ कें मुकुन्दवरपात्राय नमः।
ॐ कें असुरकुलोद्भवाय नमः।
ॐ कें घनवर्णाय नमः।
ॐ कें लम्बदेहाय नमः।
ॐ कें मृत्युपुत्राय नमः।
ॐ कें उत्पातरूपधराय नमः।
ॐ कें अदृश्याय नमः।
ॐ कें कालाग्निसन्निभाय नमः।
ॐ कें नरपीठकाय नमः।
ॐ कें ग्रहकारिणे नमः।
ॐ कें सर्वोपद्रवकारकाय नमः।
ॐ कें चित्रप्रसूताय नमः।
ॐ कें अनलाय नमः।
ॐ कें सर्वव्याधिनाशनाय नमः।

ॐ कें अपसव्यप्रचारिणे नमः।
ॐ कें नवमे पापदाय नमः।
ॐ कें पञ्चमे शोकदाय नमः।
ॐ कें उपराग-गोचराय नमः।
ॐ कें पुरुषकर्मणे नमः।
ॐ कें तुरीये सुखप्रदाय नमः।
ॐ कें तृतीये वैरदाय नमः।
ॐ कें पापग्रहाय नमः।
ॐ कें स्फोटकारकाय नमः।
ॐ कें प्राणनाथाय नमः।
ॐ कें पञ्चमे श्रमकारकाय नमः।
ॐ कें द्वितीयेस्फुटवाक्दात्रे नमः।
ॐ कें विषाकुलितवक्त्रकाय नमः।
ॐ कें कामरूपिणे नमः।
ॐ कें सिंहदन्ताय नमः।
ॐ कें सत्येऽप्यनृतवते नमः।
ॐ कें चतुर्थेमातृनाशनाय नमः।
ॐ कें नवमे पितृनाशनाय नमः।
ॐ कें अन्ते वैरप्रदाय नमः।
ॐ कें सुतानन्दनबन्धकाय नमः।
ॐ कें सर्पाक्षिजाताय नमः।
ॐ कें अनङ्गाय नमः।
ॐ कें कर्मराश्युद्भवाय नमः।
ॐ कें उपान्ते कीर्तिदाय नमः।
ॐ कें सप्तमे कलहप्रियाय नमः।

ॐ कें अष्टमे व्याधिकर्त्रे नमः।
ॐ कें धने बहुसुखप्रदाय नमः।
ॐ कें जनने रोगदाय नमः।
ॐ कें ऊर्ध्वमूर्धजाय नमः।
ॐ कें ग्रहनायकाय नमः।
ॐ कें पापदृष्टये नमः।
ॐ कें खेचराय नमः।
ॐ कें शाम्भवाय नमः।
ॐ कें अशेषजनपूजिताय नमः।
ॐ कें शाश्वताय नमः।
ॐ कें नटाय नमः।
ॐ कें शुभाशुभफलप्रदाय नमः।
ॐ कें धूम्राय नमः।
ॐ कें सुधापायिने नमः।
ॐ कें अजिताय नमः।
ॐ कें भक्तवत्सलाय नमः।
ॐ कें सिंहासनाय नमः।
ॐ कें केतु मूर्तये नमः।
ॐ कें रवीन्दु द्युति नाशकाय नमः।
ॐ कें अमराय नमः।
ॐ कें पीडकाय नमः।
ॐ कें अमर्त्याय नमः।
ॐ कें विष्णु दृष्टाय नमः।
ॐ कें असुरेश्वराय नमः।
ॐ कें भक्तरक्षाय नमः।
ॐ कें वैचित्र्यकपोतस्यन्दनाय नमः।
ॐ कें विचित्रफलदायिने नमः।
ॐ कें भक्ताभीष्टफलप्रदाय नमः।

॥ इति श्रीकेतु अष्टोत्तरशत नामावली ॥

॥ श्री नवग्रह पीड़ाहर स्तोत्रम् ॥

ग्रहाणामादिरादित्यो लोकरक्षणकारकः ।
विषमस्थानसम्भूतां पीडां हरतु मे रविः ॥
रोहिणीशः सुधामूर्त्तिः सुधागात्रः सुधाशऽनः ।
विषमस्थानसम्भूतां पीडां हरतु मे विधुः ॥
भूमिपुत्रो महातेजा जगतां भयकृत् सदा ।
वृष्टिकृद् वृष्टिहर्त्ता च पीडां हरतु मे कुजः ॥
उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥
देवमंत्री विशालाक्षः सदालोकहिते रतः ।
अनेकशिष्यसम्पूर्णो पीडां हरतु मे गुरुः ॥
दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः ।
प्रभुस्तारा ग्रहाणां च पीडां हरतु मे भृगुः ॥
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।
मन्द चारः प्रसन्नात्मा पीडां हरतु मे शनिः ॥
महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः ।
अतनुश्चोर्ध्व-केशश्च, पीडां हरतु मे शिखिः ॥
अनेकरूप-वर्णैश्च, शतशोऽथ सहस्त्रशः ।
उत्पात-रूपो जगतां, पीडां हरतु मे केतुः ॥

(ब्रह्माण्ड पुराणे नवग्रह पीडाहर स्तोत्रम्)

॥ नवग्रह कवचम् ॥

ॐ शिरो मे पातु मार्त्तण्डः कपालं रोहिणीपतिः ।
मुखमङ्गारकः पातु कण्ठं च शशिनन्दनः ॥१॥
बुद्धिं जीवः सदा पातु हृदयं भृगुनन्दनः ।
जठरं च शनिः पातु जिह्वां मे दितिनन्दनः ॥२॥

पादौ केतुः सदा पातु वाराः सर्वाङ्गमेव च ।
तिथयोऽष्टौ दिशः पातु न क्षत्राणि वपुः सदा ॥३॥
अंशौ राशिः सदा पातु योगश्च स्थैर्यमेव च ।

॥ फलश्रुति ॥

सुचिरायुः सुखी पुत्री युद्धे च विजयी भवेत् ।
रोगात् प्रमुच्यते रोगी बन्धो मुच्येत बन्धनात् ॥१॥
श्रियं च लभते नित्यमरिष्टिस्तस्य न जायते ।
यः करे धारयेन्नित्यं तस्य रिष्टिर्न जायते ॥२॥
पठनात् कवचस्यास्य सर्व पापात् प्रमुच्यते ।
मृतवत्सां च या नारी काकवन्ध्या च या भवेत् ॥३॥
जीववत्सा पुत्रवती भवत्येव न संशयः ।
एतां रक्षां पठेद् यस्तु अङ्गं स्पृष्ट्वाऽपि वा पठेत् ॥४॥

॥ नवग्रह स्तोत्रम् ॥

जपाकुसुम संकाशं काश्यपेयं महाद्युतिं ।
तमोऽरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥
दधिशंखतुषाराभं क्षीरोदार्णव-सम्भवं ।
नमामि शशिनं सोमं शम्भोर्मुकुट-भूषणम् ॥
धरणीगर्भ-सम्भूतं विद्युत् कान्ति समप्रभं ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥
प्रियङ्गु कलिका श्यामं रूपेणाप्रतिमं बुधं ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥
देवानां च ऋषीणां च गुरुं काञ्चन संन्निभं ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥
हिमकुन्द-मृणालाभं दैत्यानां परमं गुरुं ।
सर्वशास्त्र-प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥

नीलांज्जन-समाभासं रविपुत्रं यमाग्रजं ।
छायामार्त्तण्ड-सम्भूतं तं नमामि शनैश्चरम् ॥
अर्धकायं महावीर्यं चन्द्रादित्य विमर्दनं ।
सिंहिका गर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥
पलाशपुष्प-संकाशं तारकाग्रह मस्तकं ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥
आदित्याय च सोमाय मङ्गलाय बुधाय च ।
गुरु शुक्र-शनिभ्यश्च राहवे केतवे नमः ॥

॥ नवग्रह गायत्री मंत्रा:॥

सूर्य - ॐ आदित्याय विद्महे प्रभकराय धीमहि तन्नः सूर्यः प्रचोदयात्।
चन्द्र -ॐ अमृताङ्गाय विद्महे कलारूपाय धीमहि तन्नः सोमः प्रचोदयात्।
भौम-ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि तन्नः भौमः प्रचोदयात्।
बुध - ॐ सौम्यरूपाय विद्महे वाणेशाय धीमहि तन्नौ सौम्यः प्रचोदयात्।
गुरु - ॐ अङ्गिरसाय विद्महे दिव्यदेहाय धीमहि तन्नौ जीवः प्रचोदयात्।
शुक्र - ॐ भृगुराज विद्महे दिव्यदेहाय धीमहि तन्नौ शुक्रः प्रचोदयात्।
शनि - ॐ भगभवाय विद्महे मृत्युरूपाय धीमहि तन्नौ शनिः प्रचोदयात्।
राहु - ॐ शिरोरूपाय विद्महे अमृतेशाय धीमहि तन्नौ राहुः प्रचोदयात्।
केतु - ॐ पद्मपुत्राय विद्महे अमृतेशाय धीमहि तन्नौ केतुः प्रचोदयात्।

॥ नवग्रह नमस्कार मंत्रा:॥

ग्रहाणामादिरादित्यो लोकलक्षणकारकः ।
विषमस्थानसंभूतां पीडां दहतु मे रवि ॥१॥
रोहिणीशः सुधामूर्तिः सुधागात्रो सुधाशनः ।
विषमस्थानसंभूतां पीडां दहतु मे विधुः ॥२॥

भूमिपुत्रो महातेजा जगतो भयकृत्सदा ।
वृष्टिकृद्-वृष्टिहर्ता च पीडां दहतु मे कुजः ॥३॥
उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युतिः ।
सूर्यप्रियकरो विद्वान पीडां दहतु मे बुधः ॥४॥
देवमंत्री विशालाक्षः सदा लोकहितेरतः ।
अनेकशिष्यैः सम्पूर्णः पीडां दहतु मे गुरुः ॥५॥
दैत्यमंत्री गुरुस्तेषां प्राणदश्च महाद्युति ।
प्रभुस्ताराग्रहणां च पीडां दहतु मे भृगुः ॥६॥
सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः ।
मन्दचारः प्रसन्नात्मा पीडां दहतु मे शनिः ॥७॥
महाशीर्षो महावक्त्रो महादंष्ट्रो महायशः ।
अनुश्चोर्ध्व-केशश्च पीडां दहतु मे तमः ॥८॥
अनेकरूपवर्णश्च शतशोऽथ सहस्त्रशः ।
उत्पातरूपी घोरश्च पीडां दहतु मे शिखीः ॥९॥

॥ नवग्रह मातृका मंत्राः॥

सूर्यादि ग्रहों की पिङ्गलादि नौ माताएँ प्रसिद्ध है। जिनकी उपासना से ग्रहों का दुष्प्रभाव दूर हो जाता है। 'मेरु तंत्र' में उनके नाम निम्न श्लोकों में वर्णित किये गये है।

मङ्गला पिङ्गला धान्या भ्रामरी भद्रिका तथा ।
उल्का सिद्धा सङ्कटा च विकटा गर्भपालिका ॥

१. त्रयोदशाक्षरा सूर्य जननी (पिङ्गला) मंत्रोद्धार- क्षें बीजं तु समुच्चार्य पिङ्गले वैरिवारणि, प्रसीद फडिति प्रोच्याणुस्त्रयोदश-वर्णकः ।

अथ मन्त्रः- क्षें पिङ्गले वैरिवारणि प्रसीद फट् ।

क्षां क्षीं इत्यादि से षडंगन्यास कर ध्यान करें-

ध्यानम्—

पिङ्गवर्णां पिङ्गकेशीं पिङ्गनेत्रां धनुः शरान् ।
हस्ताभ्यां दधतीं पद्मयुगलं तां भजाम्यहम् ॥

पुरश्चरण में एक लाख जप कर उतना ही तर्पण करें।

२. एकादशाक्षरा चन्द्र माता (मङ्गला) मंत्रौद्धार-मायाद्यो वह्नि जायन्तो मङ्गले मङ्गलालये, एकादशाक्षरो मंत्रो मङ्गलायाः प्रकीर्तितः।

अथ मन्त्रः- ह्रीं मङ्गले मङ्गलालये स्वाहा।

ह्रा, ह्रीं इत्यादि से षडंगन्यास कर ध्यान करें-

ध्यानम्–

मंगलांसु - त्रिनयनामुद्यदादित्य - सन्निभां,
दरस्मेरमुखाम्भोजां सिन्दूर-सुन्दराधम् ।
पद्मद्वये धनुर्वाणान् दधतीं भुज पल्लवैः,
सुगुञ्जन्मंजु-मञ्जीरां कांचीगुण विराजिताम् ॥

३. षोडशाक्षरा भौम मातृका (भ्रामरी) मंत्रौद्धार-क्षीं भ्रामरी पदं चोक्त्वा सपत्नान् मे अधीश्वरि, भ्रामय क्लीं षड्दशार्णो।

अथ मन्त्रः- क्षीं भ्रामरी सपत्नान् मे अधीश्वरि भ्रामय क्लीं।

उपरोक्त मंत्र का विधान पिङ्गला के समान ही है।

४. त्रयोविंशत्यक्षरा बुध मातृका 'भद्रिका'- मंत्रौद्धार- व्लं बीजं तोय-भू-योगाज्जातमादौ समुच्चरेत्, भद्रिके मम भद्रं देहीत्येवं पदं वदेत्। पुनश्च परभद्राणि नाशय द्वितयं ततः, स्वाहान्तो जिन-वर्णोऽयं।

अथ मन्त्रः- व्लं भद्रिके मम भद्रं देहि परभद्राणि नाशय नाशय स्वाहा।

व्लां, व्लीं इत्यादि से षडंगन्यास करें एवं इस मंत्र का ध्यान मंगला के समान ही है तथा जपादि विधान पिङ्गला के समान है।

५. अष्टाक्षरा गुरु मातृका (धान्या)-मंत्रौद्धार-श्रीं धनदे समुच्चार्य धान्ये स्वाहाष्टवर्णकः।

अथ मन्त्रः- श्रीं धनदे धान्ये स्वाहा।

श्रां, श्रीं इत्यादि से षडंगन्यास करें। गुरु मातृका धान्या सर्वसम्पदा दात्री है। इसके तीन पुरश्चरण करने से सर्वधनधान्य की वृद्धि होती है

६. षोडशाक्षरा शुक्र मातृका (सिद्धा)- मंत्रौद्धार- ह्रीं सिद्धिदे सर्वं

मम समुक्त्वा साधयद्वयं हृदन्तोऽयं षोडशार्णः।

अथ मन्त्रः- ह्रीं सिद्धिदे सर्वं मम साधय साधय नमः।

७. अष्टाक्षरा शनि मातृका (उल्का)-मंत्रौद्धार- ऐं ह्रीमुल्का पदं पश्चाद्-देव्यै हृच्चाष्टवर्णकः।

अथ मन्त्रः- ऐं ह्रीं उल्कादेव्यै नमः।

ऐं ह्रीं हृदयाय नमः, ऐं ह्रीं शिरसे स्वाहा इत्यादि क्रम से अंगन्यास आदि करें। यह मंत्र धन एवं आरोग्य को देने वाला है।

८. षोडशाक्षर राहु मातृका (सङ्कटा)- मंत्रौद्धार- ह्रीं सङ्कटे च रोगं मे परमं नाशयद्वयं, षोडशार्णः।

अथ मंत्रः- ह्रीं सङ्कटे रोगं मे परमं नाशय नाशय।

जेल मे बन्दी होतो इस मंत्र का १० लाख जप करने से जेल से छुटकारा मिलता है। काशी में वीरेश्वर से पूर्व सङ्कटा देवी का सिद्ध स्थान है। वहाँ १६ लाख जप कर दूर्वा से होम करे, तो मंत्र सिद्ध होता है।

९. एकविंशत्यक्षरा केतु मातृका (विकटा)- मंत्रौद्धार-तारो नमो भगवति विकटे वीरपालिके, प्रसीद युगलं मन्त्रः प्रकृत्यर्णः।

अथ मन्त्रः- ॐ नमः भगवति विकटे वीरपालिके प्रसीद प्रसीद।

